[illegible]

॥ ६० ॥ अर्हं ॥ प्रणम्य परमात्मानं निजं काव्यानुशासनं ॥ आचार्यहेमचंद्रेण विद्वत्प्रीत्यै प्रतन्यते । ग्रंथारंभे शिष्टसमयपरिपालनाय शास्त्रकारः समुचितं इष्टदेवतां प्रणिधत्ते ॥ १ ॥ अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम् ॥ सर्वभाषापरिणतां जैनीं वाचमुपास्महे । रागादिजेतारो जिनास्तेषामियं जैनी जिनोपज्ञा । अनेन कारणशुद्ध्योपादेयतामाह । उच्यते इति वाक् वर्णपदवाक्यादिभावेन भाषाद्रव्यपरिणतिः तामुपास्महे । उपासनं योगप्रणिधानं अकृत्रिमस्वादूनि अनाहार्यमाधुर्याणि पदानि नामिकादीनि यस्यां सा तथा । स्वच्छस्वादुमृदुप्रभृतयो हि गुणा मात्रवचना अपि दृश्यंते । अथवा अकृत्रिमाण्यसंस्कृतान्यत एव स्वादूनि मंदधियामपि पेशलानि पदानि यस्यामिति विग्रहः ॥ उक्तं हि ॥ बालस्त्रीमूढमूर्खाणां नृणां चारित्रकांक्षिणां । अनुग्रहार्थं तत्त्वज्ञैः सिद्धांतः प्राकृतः कृतः । तदेतद्वीतादिसाधारणमिति विशिनष्टि परमार्थो निःश्रेयसं तदभिधानशीलां परमार्थाभिधायिनीं द्रव्याद्यनुयोगानामपि पारंपर्येण निःश्रेयसप्रयोजनत्वात् । तथा सर्वेषां स्करनरतिरश्चां विचित्रासु भाषासु परिणतां । तन्मयतां गतां सर्वभाषापरिणतां । एकरूपापि भगवतोऽर्द्धमागधी भाषा वारिदविमुक्तवारिवदाश्रयानुरूपतया परिणमति ॥ यदाह ॥ देवा दैवीं नरा नारीं शबराश्चापि शाबरीं । तिर्यंचोपि हि तैरश्चीं मेनिरे भगवद्गिरं । नत्वेवंविधं भुवनाद्भुतमतिशयमंतरेण युगपदनेकसत्त्वोपकारः शक्यः कर्तुं । अथ प्रेक्षावत्प्रवृत्त्यंगं प्रयोजनं वक्तुं तत्प्रस्तावनामाह ॥ २ ॥ शब्दानुशासनेऽस्माभिः साध्व्यो वाचो विवेचिताः । तासामिदानीं काव्यत्वं यथावदनुशिष्यते । शब्दानुशासने सिद्धहेमचंद्राभिधाने विवेचिता असाध्वीभ्यो वाग्भ्यः पृथक्कृताः । इदानीं शब्दानुशासनानंतरं तासां वाचां काव्यत्वं काव्यभावो यथावन्नालिंचनरूपेणानुशिष्यते । वाचां हि साधुत्वे निश्चिते सुकरः काव्योपदेशः । अनेन शब्दानुशासनकाव्यानुशासनयोरेककर्तृकत्वं चाह । अत एव हि प्रयोगिकमन्यैरिव नारभ्यते शब्दानुशासनेनैव चरितार्थत्वात् । शास्त्रप्रयोजनमुक्त्वा अभिधेयप्रयोजनमाह ॥ ३ ॥ काव्यमानंदाय यशसे कांतातुल्यतयोपदेशाय च ॥ लोकोत्तरवर्णनानिपुणकविकर्म काव्यम् । यदाह प्रज्ञा नवनवोल्लेखशालिनी प्रतिभा मता । तदनुप्राणनाजीवद्वर्णनानिपुणः कविः । तस्य कर्म स्मृतं काव्यमिति । सद्यो रसास्वादजन्मा निरस्तवेद्यांतरा ब्रह्मास्वादसदृशी प्रीतिरानंदः । इदं सर्वप्रयोजनोपनिषद्भूतं कविसहृदययोः काव्यप्रयोजनं । यशस्तु कवेरेव । यत इयति संसारे चिराती

ध्वनिनो पर्यायकत्वेन जीवतो वर्णनाः स्फुरद्वर्णनाद्यर्थः तदनु जीवनात्मया बलात् भातीति जीवद्वर्णनावर्णनासु निपुणः सकविः ॥ २ ॥

[illegible]

अपद्यथावत्कालिदासादयः सहृदयैः स्तूयंते कवयः । प्रभुतुल्येभ्यः शब्दप्रधानेभ्यो वेदागमादिशास्त्रेभ्यो मित्रसंमितेभ्योऽर्थप्रधानेभ्यः पुराणप्रकरणादिभ्यश्च शब्दार्थयोर्गुणभावे रसप्राधान्येन विलक्षणं काव्यं । कांतेव सरसतापादनेन संमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदिशतीति सहृदयानां प्रयोजनं । तथा चोक्तं हृदयदर्पणे । शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः । अर्थे तत्त्वेन युक्ते तु वदंत्याख्यानमेतयोः । द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेदिति । धनमनेकांतिकं व्यवहारकौशलं शास्त्रेभ्योप्यनर्थनिवारणं प्रकारांतरेणापीति न काव्यप्रयोजनतयास्माभिरुक्तं । प्रयोजनमुक्त्वा काव्यस्य कारणमाह । प्रतिभास्य हेतुः । प्रतिभा नवनवोल्लेखशालिनी प्रज्ञा । अस्य काव्यस्येदं प्रधानं कारणं व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव संस्कारकाविति वक्ष्यते । सा च सहजौपाधिकी चेति द्विधा । तत्र सहजामाह । सा ज्ञानावरणक्षयोपशममात्रात्सहजा सवितुरिव प्रकाशस्वभावस्यात्मनो । भ्रूपटलमिव ज्ञानावरणीयाद्यावरणं तस्योदितस्य क्षयेऽनुदितस्योपशमेन यः प्रकाशाविर्भावः सा सहजा प्रतिभा । मात्रग्रहणं मंत्रादिकारणनिषेधार्थं । सहजप्रतिभाबलाद्धि गणभृतः सद्यो द्वादशांगीमारचयंति स्म । द्वितीयामाह ॥ ५ ॥ मंत्रादेरौपाधिकी । मंत्रदेवतानुग्रहादिप्रभवौपाधिकी प्रतिभा । इयमप्यावरणक्षयोपशमनिमित्तैव दृष्टोपाधिनिबंधनत्वात्तु औपाधिकीत्युच्यते । सा चेयं द्विविधापि प्रतिभा व्युत्पत्त्यभ्यासाभ्यां संस्कार्या । व्युत्पत्त्यभ्यासौ वक्ष्यमाणौ ताभ्यां संस्करणीया । अत एव नतौ काव्यस्य साक्षात्कारणं प्रतिभोपकारिणौ तु भवतः । दृश्यंते हि प्रतिभाहीनस्य विफलौ व्युत्पत्त्यभ्यासौ । व्युत्पत्तिं व्यनक्ति ॥ ७ ॥ लोकशास्त्रकाव्येषु निपुणता व्युत्पत्तिः । लोके स्थावरजंगमात्मके लोकवृत्ते च शास्त्रेषु शब्दच्छंदोनुशासनाभिधानकोशकलाश्रुतिस्मृतिपुराणेतिहासागमतर्कनाट्यार्थकामयोगादिग्रंथेषु काव्येषु महाकविप्रणीतेषु निपुणत्वं तत्त्ववेदित्वं व्युत्पत्तिः । लोकादिनिपुणता संस्कृता प्रतिभा हि तदनतिक्रमेण काव्यमुपनिबध्नाति । अभ्यासं व्याचष्टे ॥ ८ ॥ काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरभ्यासः । काव्यं कर्तुं जानंति विचारयंति वा ये ते काव्यविदः कविसहृदयास्तैर्विनेयान्स्वरूपं । तेषां शिक्षया वक्ष्यमाणलक्षणया काव्य एव पौनःपुन्येन प्रवृत्तिरभ्यासः ॥ अभ्याससंस्कृता हि प्रतिभा काव्यामृतकामधेनुर्भवति ॥ यदाहुः ॥ अभ्यासो हि कर्मसु कौशलमावहति न हि सकृन्निपतितमात्रेणोदबिंदुरपि ग्रावणि निम्नतामादधातीति । शिक्षयेत्युक्तमिति शिक्षां लक्षयति ॥ ९ ॥ सतोप्यनिबंधोऽसतोपि निबंधो नियमश्छायाद्युपजीवनादयश्च शिक्षाः । सतोपि जातिद्रव्यगुणक्रिया

अशानशकुंतलादिषु रघुवंशादिषु

२

देरतिबंधनं॥असतोपिजात्यादेरेवनिबंधनं नियमःतित्रसत्तस्यजात्यादेरेवैकत्रवधारणं॥छायायाःप्रतिबिंबकल्पनयाआलेख्यप्राप्तनयानुत्कंदेदि
तुल्यतयापरपुरप्रवेशप्रतिमतयाचोपजीवनं।आदिशब्दात्पदपादादीनांचकाव्यांतरगद्यर्थोचित्यमुपजीवनं।पुनरादिपदात्समस्यापूरणाद्याःशिक्षाः
तत्रसतोपिसामान्यस्यानिबंधोयथा।मालत्यावसंतेपुष्पफलस्यचंदनद्रुमेषुफलस्याशोकेषु।द्रव्यस्ययथा।कृष्णपक्षेसत्याअपिज्योत्स्नायाः।शुक्लपक्षे
त्वंधकारस्य।गुणस्ययथा।कुंदकुड्मलानांकामिदंतानांचरक्तत्वस्यकमलमुकुलप्रभृतेश्चहरितत्वस्यप्रियंगुपुष्पाणांचपीतत्वस्य।क्रियायायथादि
वानीलोत्पलानांविकासस्यनिशिशेफालिकाकुसुमानांविश्रंसस्यच।असतोपिसामान्यस्यनिबंधोयथा।नदीषुपद्मनीलोत्पलादीनां
जलाशयमात्रेपिहंसादीनाम्।यत्रतत्रपर्वतेसुवर्णरत्नादीनामिति।द्रव्यस्ययथा।तमसिमुष्टिग्राह्यत्वस्यसूच्यग्रभेद्यत्वस्यच॥ज्यो–यांचकुंभ
पवाह्यत्वादेः।गुणस्ययथा।यशोहासादीनांशौक्ल्यस्य अयशःपापादेःकार्ष्ण्यस्य।क्रोधानुरागयोरक्तत्वस्य।क्रियायायथा।चकोरेषुचंद्रिकापानस्य
॥चक्रवाकमिथुनेषुनिशिभिन्नतटाश्रयणस्य।जातेर्नियमोयथा।समुद्रेष्वेवमकराः।ताम्रपर्ण्यामेवमौक्तिकानि।द्रव्यस्ययथा।मलयएवचंदनस्था
नं॥हिमवानेवभूर्जोत्पत्तिपदं।गुणस्ययथा।सामान्योपादानेमाणिक्यानांशोणत्वेपुष्पाणांशुक्लत्वेमेघानांकृष्णत्वेच।क्रियायायथा।ग्रीष्मा
दौसंभवदपिकोकिलरुतंवसंतएव।मयूराणांवर्षास्वेवविरुतंनृत्तंचेति।अथवानियमःसमयकवीनां।यथा।कृष्णनीलयोः।कृष्णहरितयोः
पीतरक्तयोः।शुक्लगौरयोश्चंद्रेशशमृगयोः॥कामकेतनेमकरमत्स्ययोःअत्रिनेत्रसमुद्रोत्पन्नयोश्चंद्रयोः।द्वादशानामप्यादित्यानां।नारायणदामोद
रविष्णुमाधवकूर्मादेःकमलासंपदोः॥नागसर्पयोःक्षीरक्षारसमुद्रयोः।सागरमहासमुद्रयोः।दैत्यदानवासुराणांचैक्यं॥तथाचबालादेरनेक
वर्णापिवर्ण्यतेभूयबहुकालजन्मनोपिशिवचंद्रमसोबालत्वं।कामस्यमूर्तत्वममूर्तत्वंचेत्यादि॥काव्यस्यहेतुमुक्त्वास्वरूपमाह॥५२॥अदोषौसगुणौ
सालंकारौचशब्दार्थौकाव्यम्॥चकारोनिरलंकारयोरपिशब्दार्थयोःक्वचित्काव्यत्वख्यापनार्थः॥७॥यथा॥शून्यंवासगृहंविलोक्यशयनादुत्थ २
यकिंचिच्छनैर्निद्राव्याजमुपागतस्यसुचिरंनिर्वर्ण्यपत्युर्मुखं॥विश्रब्धंपरिचुंब्यजातपुलकामालोक्यगंडस्थलींलज्जानम्रमुखीप्रियेणहसताबालाचि

६

रंचुंबिता॥गुणदोषयोःसामान्यलक्षणमाह॥रसस्योत्कर्षापकर्षहेतूगुणदोषौभक्त्याशब्दार्थयोः॥रसोवक्ष्यमाणस्वरूपस्तस्योत्कर्षहेतवोगुणाः॥अपकर्षहेतव
स्तुदोषाः।तेचरसस्यैवधर्माउपचारेणतुतदुपकारिणोःशब्दार्थयोरुच्यंते।रसाश्रयत्वंचगुणदोषयोरन्वयव्यतिरेकानुविधानात्॥तथाहियत्रैवदोषास्तत्रैवगुणा
रसविशेषेचदोषानशब्दार्थयोः॥यदितयोःस्युस्तद्बीभत्सादौकष्टत्वादयोगुणानभवेयुर्हास्यादौचाश्लीलत्वादयः॥अनित्याश्चैतेदोषायतोयस्यांगिनस्तेदो
षास्तद्भावेनदोषास्तद्भावेतुदोषाइत्यन्वयव्यतिरेकाभ्यांगुणदोषयोरसएवाश्रयः।अलंकाराणांसामान्यलक्षणमाह॥५२॥अंगाश्रिताअलंकाराः।रसस्यांगि
नोयदंगंशब्दार्थौतदाश्रिताअलंकाराःतेचरसस्यसतःक्वचिदुपकारिणःक्वचिदनुपकारिणः॥रसाभावेतुवाच्यवाचकवैचित्र्यमात्रपर्यवसिताभवंति॥न
चरसोपकारप्रकारानाह॥७॥ननुपरत्वेकालेग्रहत्यागयोनातिनिर्वाहेनिर्वाहेप्यंगत्वेरसोपकारिणः।अलंकाराइतिवर्त्तते॥तत्परत्वंरसोपकारकत्वेना
लंकारस्यनिवेशोनबाधकत्वेननापिताटस्थ्येनयथा॥चलापांगांदृष्टिंस्पृशसिबहुशोवेपथुमतींरहस्याख्यायीवस्वनसिमृदुकर्णांतिकचरः॥करौव्याधुन्व
त्याःपिबसिरतिसर्वस्वमधरंवयंतत्वान्वेषान्मधुकरहतास्त्वंखलुकृती॥अत्रभ्रमरस्वभावोक्तिरलंकारोरसपरत्वेनोपनिबद्धोरसोपकारी॥बाधकत्वेनयथा
स्रस्तःस्रग्दामशोभांत्यजतिविरचितामाकुलःकेशपाशःक्षीबायान्नूपुरौचद्विगुणतरमिमौक्रंदतःपादलग्नौ॥व्यस्तःकंपानुबंधादनवरतमुरोहंतिहारोयम
स्याःक्रीडंत्याःपीडयेवस्तनभरविनमन्मध्यभंगानपेक्षं॥अत्रपीडयेवेत्युत्प्रेक्षालंकारोद्दीप्तस्तदनुग्राहकश्चार्थश्लेषःकरुणविभावानुभावान्संपाद
यन्बाधकत्वेनभासतेतिनप्रकृतरसोपकारी॥ताटस्थ्येनयथा॥लीलावधूतपद्माकथयंतीपक्षपातमधिकंनः॥मानसमुपैतिकेयंचित्रगताराजहंसीव
फलहककिलिखितसागरिकाप्रतिबिंबदर्शनाभिजाताभिलाषस्यवत्सराजस्येयमुक्तिस्तटस्थस्यैववकविनोपरचितेतिश्लेषानुगृहीतोपमालंकारप्राधान्य
नप्रस्तुतोरसोगुणीकृतोपरिजिघटिषया॥अंगत्वेपिकालेचसतेग्रहणंयथा॥उद्दामोत्कलिकांविपांडुररुचंप्रारब्धजृंभांक्षणादायासंश्वसनोद्गमैरविरलै
रातन्वतीमात्मनः॥अद्योद्यानलतामिमांसमदनांनारीमिवान्यांध्रुवंपश्यन्कोपविपाटलद्युतिमुखंदेव्याःकरिष्याम्यहं॥अत्रोपमादनुग्राहकश्चश्लेषःपर्यंतविप्रलं
भस्यभाविनश्चेर्ष्याभिमुख्यंकुर्वन्नवसरेरसस्यसंमुखीभावदशायामुपनिबद्धउपकारीभवेयंयथा।बालाहारतयाजगद्धिरथवेगाभ्रास्यनिशोषितेनग्रस्ताः

रसास्वादेन॥ आरंभदशायां॥

[illegible]

३

पुनरभ्यवनोयत्कणिकानीश्वर्वनैर्बहिर्भिः॥ तेपिक्रूरचमरुचर्मवसनैर्नीताःक्षयंलुब्धकैर्दंभस्यस्फुरितंविदन्नपिजनोजाल्मोगुणानीहते॥ अत्रवानाहारत्वंपश्चाद्वाच्यमण्ड दानुक्रमित्यतिशयोक्तिरनयसंगृहीता॥ तथाहिप्रथमतएवप्रथमपादेहैनत्वंप्रदर्शयायदतिशयोक्तिरूपादानंनतत्प्रेक्षयावानाहारतयाआभ्यामपिलेखरूप यायदुत्प्रेक्षयाभतिशयान्वितेनिन्यायादतिशयोक्तिःस्वाभावकृतनक्षयदंभकृतजगरयथारंभेदाध्यवसायरूपायाञ्चयादानंनदर्शनएवप्रथमपादेकृतंकृत इत्याह॥ ननदित्यादिप्रकृतस्यदंभप्रकर्षप्रयाभतिरस्कृतगुणगणानुशांतनमयस्यनिर्वेदस्यांगतामेति॥ नद्विपानाहारत्वादधिकोदंभस्येयकणप्रतंना पिननाधिकदंभनत्वंमृगाजिनवसनमिति॥ गृहीतस्याप्यवसंरस्यागोयथा॥ रत्नस्त्वंनवपद्वैरेद्रुमपिभ्यायोध्यःश्रियायागुणेन्त्यामापौतिद्धि[illegible]मुग्धाःम रधनुर्मुक्ताःसर्वमापि॥ कांतापादनताहतिस्तथमुदेनद्भूमभाष्यायवयाःसर्वतुल्यमशोककेवलमहंधात्रासशोकःकृतः॥ अत्रप्रबंधप्रवृत्तोपिक व्यतिरेकविवक्षयात्यज्यमानोविप्रलंभोपकारी॥ नन्वेवंयथा॥ आज्ञाशक्रशिखामणिप्रणयिनीशास्त्राणिचक्षुर्नवंभक्तिर्भूतपतौपिनाकिनिपदंलंकेति दिव्यापुरी॥ उत्पत्तिर्द्रुहिणान्वयेचतदहोनेदृग्वरोलभ्यतेस्याच्चेदेषनरावणःक्वनुपुनःसर्वत्रसर्वेगुणाः॥ अत्रनरावणेत्युपमादेयत्वांगयुक्तः ।तथाहिरावणइत्येतज्जगदाक्रंदकारित्वाद्यर्थांतरंप्रतिपादयज्जनकस्यधर्मवीरंप्रत्यनुगामितांप्रतिपद्यते॥ ऐश्वर्यपांडित्यपरमेशभक्त्यभिजनादिशालिनो भिजनइत्येतत्सर्वलोकमपबाधमानस्याधर्मपरस्यनार्थक्रियाकारकमितितावतोर्थस्यतिरस्कारकत्वेनैवरावणंचेष्टितंनिर्वाहणीयं॥ यत्वन्यदूपा नंक्तुपुनरिति॥ तद्यदिससंदेहत्वेनयोज्यतेऽर्थाक्षेपत्वेनाथापीदृग्वरोलभ्यतइत्यर्थांतरन्यासत्वेनतथापिप्रकृतस्यधर्मवीरस्यनकथंचिन्निर्वाहः॥ नान्यंतंनिर्वाहोयथा॥ कोपात्कोमललोलबाहुलतिकापाशेनबद्ध्वादृढंनीत्वावासनिकेतनंदयितयासायंसखीनांपुरः॥ भूयोनैवमितिस्खलत्कलगिरासंसूच्यदुश्चेष्टितंधन्योहन्यतएवनिन्हुतिपरःप्रेयान्रुदत्याहसन्॥ अत्ररूपककर्मारंभमनिर्व्यूढंचरसोपकाराय॥ नन्वेवंयथा॥ स्वभि तपक्ष्मकपाटंनयनद्वारंस्वरूपताडनेनउद्घाट्यमेप्रविष्टादेहगेहंहसाहृदयचौरि॥ अत्रनयनद्वारमित्येतावदेवरूपकंदरंशृंगारानुगुणंनत्वन्यद्रूपणं॥ निर्वाहेत्वंगत्वंयथा॥ श्यामास्वंगंचकितहरिणीप्रेक्षतेदृष्टिपातान्वेछायांशशिनिशिखिनांबर्हभारेषुकेशान्॥ उत्पश्यामिप्रतनुषुनदीवीचिषुभ्रूवि

[illegible]

३

लासान्॥ हंतैकस्थंक्वचिदपिनतेभीरुसादृश्यमस्ति॥ अत्रोत्प्रेक्षायालंकारावाध्यारोपरूपायाअनुप्राणकंसादृश्यंयथोपक्रांतंतथानिर्वाहितमपिविप्रलंभरसोपकाराय॥ नन्वेवंयथा॥ प्रत्यक्कुंचितमुत्कटंहसितवत्साकूतमाकेकरंव्यावृत्तंप्रसरत्प्रसादमुकुलंसप्रेमकंपास्थिरं॥ उद्भ्रांतमपांगवृत्तिविकचंमज्जत्तरंगोत्तरंचक्षुःसा — वचनेरतवशादेकैकमन्यत्रियं॥ अत्ररावणस्यदविशतौवैचित्र्येणस्वाभावोक्तिर्निर्वाहितापिरसस्यांगत्वेनयोजितेति॥ शब्दार्थयोःस्वरूपमाह॥ मुख्यगौणलक्ष्यव्यंग्यार्थभेदान्मुख्यगौणलक्षकव्यंजकाःशब्दाः॥ मुख्यार्थविषयोमुख्योगौणार्थविषयोगौणोलक्ष्यार्थविषयोलक्षकोव्यंग्यार्थविषयोव्यंजकःशब्दः॥ विषयभेदाद्धस्यभेदोनस्वाभाविकइत्यर्थः॥ मुख्यमर्थंलक्षयति॥ साक्षात्संकेतविषयोमुख्यः॥ अव्यवधानेनयत्रसंकेतःक्रियतेसमुख्यइवहस्ताद्यवयवेभ्योर्थांतरेभ्यःप्रथमंप्रतीयतइतिमुख्यः॥ सचजातिगुणक्रियाद्रव्यरूपस्तद्विषयःशब्दोमुख्योवाचकइतिचोच्यतेयथा॥ गौःशुक्लश्चलतिडित्थइति॥ यदाह॥ महाभाष्यकारश्चतुष्टयीशब्दानांप्रवृत्तिरिति॥ जात्यादिस्वरूपंचप्रकृतानुपयोगान्नेहनिपञ्च्यते॥ जातिरेवसंकेतविषयइत्येके॥ तद्वानित्यपरे॥ अपोहइत्यन्ये॥ गौणंलक्षयति॥ ५॥ मुख्यार्थबाधेनिमित्तेप्रयोजनेचभेदाभेदाभ्यामारोपितोगौणः॥ गौर्वाहीकोगौरेवायमित्यादौमुख्यस्यार्थस्यसास्नामत्त्वादेःप्रत्यक्षादिनाप्रमाणेनबाधेनिमित्तेचसादृश्यसंबंधादौप्रयोजनेचसादृश्यताद्रूप्यप्रतिपत्तिरूपेसत्यारोप्यारोपविषययोर्भेदेनाभेदेनचसमारोपितोऽतथाभूतोपितथात्वेनाध्यवसितोगुणेभ्यआयातत्वाद्गौणस्तद्विषयःशब्दोपिगौणउपचरितइतिचोच्यते॥ अत्रसादृश्येनिमित्तेभेदेनारोपितोयथा॥ गौर्वाहीकः॥ इदंवक्ष्यमाणस्यरूपकालंकारस्यबीजं॥ अभेदेनयथा॥ गौरेवायमिति॥ इदमतिशयोक्तेःप्रथमभेदस्य॥ अत्रस्वार्थसहचारिणोगुणाजाड्यमांद्यादयोलक्ष्यमाणाअपिगोशब्दस्यपरार्थाभिधानेनिमित्तत्वमुपयांतीतिकेचित्॥ स्वार्थसहचारिगुणाभेदेनपरार्थगतागुणाएवलक्ष्यंतेनतुपरार्थोभिधीयतइत्यन्ये॥ साधारणगुणाश्रयेणपरार्थएवलक्ष्यतइत्यपरे॥ संबंधेकार्यकारणभावेआयुर्घृतं॥ आयुरेवेदं॥ अत्रान्यवैलक्षण्येनाव्यभिचारेणचकार्यकारित्वादिप्रयोजनं॥ तादर्थ्येइंद्रार्थास्थूणाइंद्रः॥ स्वस्वामिभावेराजकीयःपुरुषोराजाग्रामस्वामीग्रामः॥ अवयवावयविभावेअग्रहस्तइत्यत्रप्रमात्रेवयवेहस्तः॥ मानमेयभावेआढकोव्रीहिः॥ संयोगेरक्तद्रव्यसंयोगाद्रक्तःपटः॥ ता

कर्म्येअतश्चानभावैपरीत्येआद्रमुखोभद्रमुखः ॥ लक्ष्यमर्थंलक्षयति ॥ ५१ ॥ मुख्यार्थसंबद्धस्तत्वेनलक्ष्यमाणोलक्ष्यः ॥ मुख्यार्थोगंगादिश
ब्दानांस्थानःप्राप्तिस्तेनसंबद्धस्तटादिरर्थः ॥ तत्वेनाभेदेनलक्ष्यमाणोलक्ष्यः ॥ तत्वेनलक्ष्यमाणइतिवचनाद्भेदाभेदाभ्यामारोपितइतिनवर्त्तते
शेषंतुगौणलक्षणमनुवर्त्तनएव ॥ तद्विषयः ॥ शब्दोलक्षकः ॥ यथा ॥ गंगायांघोषः ॥ कुंताःप्रविशंतिअत्रगंगायांघोषाधिकरणत्वस्यकुंतानांप्रवे
शस्यचासंभवान्मुख्यार्थबाधः ॥ सामीप्यंसाहचर्यंचनिमित्तंगंगातटइतिकुंतवंतइतिचप्रयोगाद्येषांनतथाप्रतिपत्तिस्तेषांपावनत्वशैत्यत्वादी
नांधर्माणांतथाप्रतिपादनंप्रयोजनं ॥ गौरनुबंध्यइतिनोदाहरणीयं ॥ अत्रहिश्रुतिनोदितमनुबंधनंजातौनसंभवतीतिजात्यविनाभावित्वाद्व
क्तिराक्षिप्यते ॥ ननुशक्तिर्नोच्यते ॥ विशेष्यंनाभिधागच्छेत्क्षीणशक्तिर्विशेषणेइतिन्यायात् ॥ नचात्रप्रयोजनमस्ति ॥ अविनाभावादाक्षेपेचयदि
लक्षणत्वमिष्यतेतदाक्रियतामित्यत्रकर्तुः ॥ कुर्वीत्यत्रकर्मणः ॥ प्रविशपिंडीमित्यादौगृहंभक्षयेत्यादेश्चलक्षणत्वंस्यात् ॥ पीनोदेवदत्तोदिवानभुंक्त
इत्यादौनपीनत्वेनरात्रिभोजनंलक्ष्यते;पित्वर्थापत्त्याआक्षिप्यतइति ॥ इहचयत्रवस्त्वंतरेवस्त्वंतरमुपचर्यतेसगौणोर्थोयत्रतुनतथासलक्ष्यइ
तिविवेकः ॥ कुशलद्विरेफद्विकादयस्तुसाक्षात्संकेतविषयत्वान्मुख्याएवेतिनिरूढिर्लक्ष्यस्यार्थस्यहेतुत्वेनास्माभिरुक्ता ॥ व्यंग्यंलक्षयति ॥ ५२ ॥ मु
ख्याद्यतिरिक्तःप्रतीयमानोव्यंग्योध्वनिः ॥ मुख्यागौणलक्ष्यार्थव्यतिरिक्तःप्रतीतिविषयोव्यंग्योर्थः ॥ सचध्वन्यतेद्योत्यतइतिध्वनिरितिपूर्वाचार्यैः
संज्ञितः ॥ अयंचवस्त्वलंकाररसादिभेदात्त्रेधा ॥ तत्राद्यस्तावत्भेदोमुख्यादिभ्योऽत्यंतंभिन्नःसहिवाच्येविधिरूपेप्रतिषेधरूपोयथा ॥ भमधम्मि
अवीसत्थोसोसुणओअज्जमारिओतेण ॥ गोलाणइकच्छकुडंगवासिणादरिअसीहेण ॥ अत्रविस्रब्धोभ्रमेतिविधिवाक्येतत्रनिकुंजेसिंहस
ष्टतित्वंचशुनोपिबिभेषितस्मान्नैयातस्मिन्मार्गेगंतव्यमितिनिषेधःप्रतीयते ॥ क्वचिन्निषेधेविधिर्यथा ॥ अत्ताएत्थनुमज्जइएत्थअहंमठुणहिंदति हेपथि
कमधूकैःकिं ॥ यदिनितंबानिवसनंहरसि ॥ मधूकोपिमधुर्गतःतत्फलैःकिं ॥ अरण्येकरवक-यामिदिअसयंपलोएक ॥ मापहिअरत्तिअंधयसेज्जा ४
एमहंनुमज्जिहसि ॥ अत्रावयोःशय्यायांमानिषस्यसीतिनिषेधवाक्येइयंश्वश्रूशय्याइयंममेतिदिवाप्युपलक्ष्यरात्रौत्वयेहागंतव्यमितिविधिः

प्रतीयतेक्वचिद्विधौविध्यंतरंयथा ॥ बहलतमाहयराईअद्यपउत्थोपईघरंसुन्नं ॥ तहजग्गिज्जसयज्झयनजहाअम्हेमुसिज्जामो ॥ अत्रयथावयं
नमुष्यामहेतथात्वंजागृहीतिविध्यभिधानेरात्रिरत्यंधकारापतिः ॥ प्रोषितोगृहंशून्यमतस्त्वमायामत्पार्श्वमागच्छेतिविध्यंतरंप्रतीयते ॥ क्वचि
न्निषेधेनिषेधांतरं ॥ यथा ॥ आसाइअंअणाएणजेन्तिअंतेत्तिएणबंधदिहिं ॥ उरमसुवसहइण्हिंहरक्खिज्जइगहवईछित्तं ॥ अत्रगृहप
तिक्षेत्रेदुष्टवृषवारणायपरेनिषेधवाक्येउपपतिनिवारणंनिषेधांतरंप्रतीयते ॥ क्वचिदविधिनिषेधेविधिर्यथा ॥ महुएहिंकिंम्वपंथियजइह
रसिनिअंसणंनिअम्बाउ ॥ साहेमिकस्सरन्नेगामोदूरेअहंएक्का ॥ अत्रविधिनिषेधयोरनभिधानेअहमेकाकिनीग्रामोदूरइतिविविक्त
पदेशान्नितम्बवासोपिमेहरेतिविधिःप्रतीयते ॥ क्वचिदविधिनिषेधेनिषेधः ॥ यथा ॥ जीविताशाबलवतीधनाशादुर्बलामम ॥ गच्छवातिष्ठवा
कांतस्वावस्थानुनिवेदिता ॥ अत्रगच्छवातिष्ठवेत्यविधिनिषेधेजीविताशाबलवतीधनाशादुर्बलाममेतिवचनात्त्वयाविनाहंजीवितुंनशक्नोमी
त्यपक्षेपेणगमननिषेधःप्रतीयते ॥ क्वचिद्विधिनिषेधयोर्विध्यंतरंयथा ॥ निअदइअदंसणुक्खित्तपहिअअन्नेणवच्चसुपहेण ॥ गहवइधू
यादुल्लंघवाउराइहहयग्गामे ॥ अत्रान्येनपथाव्रजेतिविधिनिषेधयोरभिधाने ॥ हेस्वकांताभिरूपताविकत्थतयाथाभिरूपकइहग्रामेभवतो
गृहपतिसुताद्रष्टव्यरूपेतिविध्यंतरंप्रतीयते ॥ क्वचिद्विधिनिषेधयोर्निषेधांतरंयथा ॥ उच्चिणसुपडिअकुसुमंमाधुणसेहालिअंहलियसुण्ह
एसअवसाणविरसोससुरेणसुवलयसद्दो ॥ अत्रपतितंकुसुममुच्चिनुमाधुनीहिशेफालिकामितिविधिनिषेधयोरभिधानेसखिचौर्यरतेप्रस
क्तेवलयशब्दोकर्त्तव्यइतिनिषेधांतरंप्रतीयते ॥ क्वचिद्विधावनुभयंयथा ॥ सणिअंवच्चकिसोअरियपपयत्तेणठवसुमहिवट्टे ॥ भज्जिहिसिवि
त्थयत्थणिविहिणादुरकेणनिम्मविया ॥ अत्रशनैर्व्रजेतिविध्यभिधानेनविधिर्नापिनिषेधोपितुवर्णनामात्रंप्रतीयते ॥ क्वचिन्निषेधेऽनुभ
यंयथा ॥ देआपसिअनियत्तसुमुहससिजुण्हाविलुत्ततमनिवहे ॥ अहिसारिआणविग्घंकारसिअन्नाणविहयासे ॥ अत्रनिर्वर्त्तस्वेतिनि
षेधाभिधानेननिषेधोनापिविधिरपितुमुखेंदुकांतिवर्णनामात्रंप्रतीयते ॥ क्वचिद्विधिनिषेधयोरनुभयंयथा ॥ वच्चमहंचियएक्काएहोंतुनीसा

सरोरुहज्जाइं माणु विर्मलविणाद्विज्जदयस्सजायंतु ॥ अत्रममैवनिश्वासरोदितव्यानिनावंतु ॥ मानयाषणाविनानानिजायंतामितिविधिनिषेधयो
रभिधानेनविधिर्नापिनिषेधोपितुकृतव्यलीकप्रियतमोपालंभमात्रंप्रतीयते ॥ क्वचिद्विधिनिषेधेनुभयंयथा ॥ णहमुहपसाहिअंगो निद्दाघुम्मंतलोअणो
नतहा ॥ जहनिव्वणाहरोसामलंगदूमेसिमहहिअयं ॥ विगतमत्सरायाममनतथानखपदादिचिह्नंभवदंगसंगिखेदावहंयथा ॥ इनिष्पन्नसंभोगत
याधरदशनासंपन्नितिरीर्ष्याकोपगोपनमुपालंभोगेदेनरूतंवाच्योर्थः ॥ तद्वलसमुत्कम्पसहृदयोत्प्रेक्षितो ॥ त्वंतयालब्धानुरवचुंबनपरत्वत
स्यास्त्वंयद्वदधरखंडनावसरेस्यावराकानसंपन्नासृतिनकेनचित्तस्याभवानतिवल्लभो ॥ यावद्भवतोपिसापतरांतेव्वनइतिवयमिदानींत्वलेमनिराशाः
संजाताइतिनायिकाभिप्रायोव्यंग्यः ॥ क्वचिद्वाच्याद्भिन्नविषयत्वेनव्यवस्थापितोयथा ॥ कस्सवनहोइरोसोदट्ठूणपियाइसव्वणंअहरं ॥
सामरपउमग्घाइरवारिअवामेसहसुण्हिं ॥ अत्रवाच्यंसखीविषयंव्यंग्यंतुतत्कांतोपपत्यादिविषयं ॥ एवमलंकारभेदारसादिभेदाश्चव्यंग्या
मुख्यादिभ्योव्यतिरिक्ताज्ञेयाः ॥ तद्विषयोव्यंजकः ॥ ७ ॥ मुख्याद्यास्तत्प्रकपः ॥ मुख्यागौणीलक्षणाव्यंजकत्वरूपाः शक्तयोव्यापारामुख्यादी
नांशब्दानां ॥ तत्रसमयापेक्षवाच्यावगमनशक्तिर्मुख्याभिधावोच्यते ॥ मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्गौणीलक्षणाच ॥ तदुभयानु
पजनितार्थावगमपवित्रितप्रतिपतृप्रतिभासहायार्थद्योतनशक्तिर्व्यंजकत्वं ॥ अभिधानंतरंचबद्धयन्वयप्रतीतिनिमित्तंतात्पर्यशक्तिरप्यस्तितद्विषय
स्तात्पर्यलक्षणोर्थोपितथापितौवाक्यविषयावितिनाशंक्यं ॥ ७ ॥ वक्त्रादिवैशिष्ट्याद्दर्थस्यापिव्यंजकत्वं ॥ वक्तृप्रतिपाद्यकाकुवाक्यवाच्यान्या
सन्निप्रस्तावदेशकालचेष्टादिविशेषवशादर्थस्यापिमुख्यामुख्यव्यंग्यात्मनोव्यंजकत्वं ॥ वक्तृविशेषाद्यथा ॥ दृष्टिंहेप्रतिवेशिनिक्षणमिहाप्यस्म
द्गृहेदास्यसिप्रायेणास्यशिशोःपितानविरसाःकौपीरपःपास्यति ॥ एकाकिन्यपियामितद्वरमितःस्रोतस्तमालाकुलंनीरंध्राःपुनरालिखंतुजरठछे
दानलग्रंथयः ॥ अत्रचौर्यरतगोपनंगम्यते ॥ प्रतिपाद्यविशेषाद्यथा ॥ निःशेषच्युतचंदनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनंजनेपुलकिता
तन्वीतवेयंतनुः ॥ मिथ्यावादिनिदूतिबांधवजनस्याज्ञातपीडागमावापींस्नातुमितोगतासिनपुनस्तस्याधमस्यांतिकं ॥ अत्रदूत्यास्तत्कामुकोपभोगो

व्यज्यते ॥ काकुर्ध्वनिविकारस्तद्विशेषाद्यथा ॥ तथाभूतांदृष्ट्वानृपसदसिपंचालतनयांवनेव्याधैःसार्द्धंसुचिरमुषितंवल्कलधरैः ॥ विराटस्या
वासेस्थितमनुचितारंभनिभृतंगुरुःखेदंखिन्नेमयिभजतिनाद्यापिकुरुषु ॥ अत्रमयिनयोग्यःखेदःकुरुषुतुयोग्यइतिकाक्वाप्रकाश्यते ॥ वा
क्यविशेषाद्यथा ॥ प्रातःश्रीरिषकस्मात्पुनरपिमयितंमन्थखेदंविदध्यान्निद्रामप्यस्यपूर्वामनलसमनसोनैवसंभावयामि ॥ सेतुंबध्नातिभूयःकि
मितिचसकलद्वीपनाथानुयातस्त्वय्यायातेवितर्कानितिदधतइवाभातिकंपःपयोधेः ॥ अत्रनारायणरूपतागम्यते ॥ वाच्यविशेषाद्यथा ॥ उद्देशो
यंसरसकदलिश्रेणिशोभातिशायीकुंजोत्कर्षांकुरितरमणीविभ्रमोनर्मदायाः ॥ किंचैतस्मिन्सुरतसुहृदस्तन्वितेवांतिवातायेषामग्रेसरतिक
लिताकांडकोपोमनोभूः ॥ अत्ररतार्थप्रविशेतिव्यज्यते ॥ अन्यासन्नेर्यथा ॥ णोल्लेइअणोल्लमणाअत्तामंघरभरम्मिसयलम्मिखणमित्तंज
इसंझाएहोइनवहोइवीसामो ॥ अत्रसंध्यासंकेतकालइतितटस्थंप्रतिकयापिद्योत्यते ॥ प्रस्तावाद्यथा ॥ सुव्वइसमागमिस्सइतुज्झपिओअज्ज
पहरमित्तेण ॥ एमेअकिंतिचिट्ठसितासहिसज्जेसुकरणिज्जं ॥ अत्रोपपतिंप्रत्यभिसर्तुंनयुक्तमितिध्वन्यते ॥ देशविशेषाद्यथा ॥ अन्यत्रयूयं
कुसुमावचायंकुरुध्वमत्रास्मिकरोमिसख्यः ॥ नाहंहिदूरंभ्रमितुंसमर्थाप्रसीदतायंरचितोंजलिर्वः ॥ अत्रविविक्तोयंदेशःप्रच्छन्नकामुकस्त्वया
विसर्ज्जइतिविश्वस्तांप्रतिकयाचिन्निवेद्यते ॥ कालविशेषाद्यथा ॥ गुरुअणपरवसपिअकिंभणामितुहमंदभाइणीअहयं ॥ अज्जपवासंवच्चसिव
च्चसयंचेवसुणसिकरणिज्जं ॥ अद्यमधुसमयेयदिव्रजसितदहंतावन्नभवामितवतुनजानामिगतिमितिव्यज्यते ॥ चेष्टायायथा ॥ द्वारोपांत
निरंतरेमयितयासौंदर्यसारश्रियाप्रोल्लास्योरुयुगंपरस्परसमासक्तंसमापादितं ॥ आनीतंपुरतःशिरोंशुकमधःक्षिप्तेचलेलोचनेवाचस्त
त्रनिवारितंप्रसरणंसंकोचितेदोर्लते ॥ अत्रसचेष्टयाप्रच्छन्नकांतविषयआकूतविशेषोध्वन्यते ॥ एवंवक्त्रादीनांद्विकादिसंयोगेपि
व्यंजकत्वमवसेयं ॥ तत्रवक्तृबोध्ययोगेयथा ॥ अत्तात्थइत्यादि ॥ अत्रवक्तृबोध्यपर्यालोचनयाशेतेतिविधिरूपव्यंग्यार्थप्रतीतिः
एवंद्विकयोगांतरेत्रिकादियोगेचस्वयमभ्यूह्यं ॥ एषुमुख्यार्थस्यव्यंजकत्वमुदाहृतं ॥ अमुख्यस्ययथासाहिन्तीसहिसुहयंखणेखण

दृमियासिमन्नकय॥ सन्नावण्णहकणिज्जसमिसियंदावविरइअवुमए अत्रमतिप्रियंरमयंत्यालयाशत्रुत्वमावगतमितिलक्ष्यं॥ तेनचकामुकविष
६ यंसापराधत्वप्रकाशनंव्यंग्यं॥ व्यंग्यस्ययथा॥ वाणिअयहत्थिदन्ताकत्तोअम्हाणवग्घकित्तीउ॥ आविलुलिआलयमुहीघरम्मिपरिसक्कएसुण्हा
अत्रविलुलितालकमुखीत्वेनानवरतक्रीडासक्तिस्तयाचसततसंभोगक्षामताध्वन्यते॥ व्यंग्यस्यभेदानाह॥ ७॥ व्यंग्यःशब्दार्थशक्तिमूलः श
ब्दशक्तिमूलोर्थशक्तिमूलश्चेतिव्यंग्योद्विधा॥ [illegible]शक्तिमूलस्तुशब्दशक्तिमूलान्नातिरिच्यतेशब्दस्यैवप्राधान्येनव्यंजकत्वात्॥ तत्रशब्दशक्तिमूल
माह॥ ७॥ नानार्थस्यमुख्यस्यशब्दस्यसंसर्गादिभिरमुख्यस्यचमुख्यार्थबाधादिभिर्नियमितेव्यापारेवस्त्वलंकारयोर्वस्तुनश्चव्यंजकत्वेशब्दशक्ति
मूलाःपञ्चवात्रयः॥ अनेकार्थस्यमुख्यस्यशब्दस्याभिधालक्षणेव्यापारेसंसर्गादिभिर्नियंत्रिते॥ मुख्यस्यचगौणलाक्षणिकरूपस्यशब्दस्यमुख्या
र्थबाधनिमित्तप्रयोजनैर्गौणीलक्षणारूपेव्यापारेनियंत्रितेमुख्यस्यशब्दस्यवस्त्वलंकारव्यंजकत्वे मुख्यस्यचवस्तुव्यंजकत्वेइतिशब्दशक्ति
मूलव्यङ्ग्याः॥ सचप्रत्येकंद्विधापदेवाक्येच॥ संसर्गादयश्चभर्तृहरिणाप्रोक्ताः॥ संसर्गोविप्रयोगश्चसाहचर्यंविरोधिता॥ अर्थःप्रकरणंलिंगंश
ब्दस्यान्यस्यसन्निधिः॥ सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः॥ शब्दार्थस्यानवच्छेदेविशेषस्मृतिहेतवः॥ तथा॥ वनमिदमायमि
दानींयत्रास्तिलक्ष्मणान्वितोरामइति॥ विनासीतांरामःप्रविशतिमहामोहसरणिमितिचसंसर्गाद्विप्रयोगाच्चदाशरथौ॥ वृषोभीमश्चन
स्यौचेरतुःकुरुक्षमागताविति साहचर्याद्वृहद्विशेषे॥ रामार्जुनव्यतिकरःसांप्रतंवर्ततेतयोरितिविरोधाद्भार्गवकार्तवीर्ययोः॥ सैंधवमानय
मृगयांचरिष्यामीत्यर्थात्प्रयोजनादश्वे॥ अस्मद्भाग्यविपर्ययाद्यदिपुनर्देवोनजानातितमितिप्रकरणान्नृपदर्थे॥ प्रकरणमशब्दमर्थस्तुशब्दवा
नित्यतावद्भेदः॥ कोदंडस्येयंगांडीवंस्पर्द्धतेकरुमर्जुनमितिलिंगाच्चिन्हात्पार्थे॥ किंसाक्षादुपदेशयष्टिरथवादेवस्यशृंगारिणइतिशब्दां
तरसन्निधानात्कामे॥ कूजतिमधुनामत्तःश्वेतोह्वरःप्रियकोकिलइतिसामर्थ्याद्वसंते॥ तन्व्यायत्करतान्तकान्तनयनंवक्त्रंकरोतिव्यत्ययेतत्त्वांपातु ६
चिरायेत्यौचित्यात्प्रसादसांमुख्येभालेने॥ अहोमहेश्वरस्यास्यकापिकांतिरितिराजधानीरूपाद्देशाद्राजनि॥ चित्रभानुर्विभात्यत्रीतिकालविशे

Dr BHAU DAJI MEMORIAL

षाद्रवौ॥ मित्रंहंतितरांतमःपरिकरंधान्येहशोभादशामितिव्यक्तिविशेषात्सहृदिप्रतीतः॥ स्वरात्वर्थविशेषप्रतीतिः॥ काव्यमार्गेतूपयोगिनीतिनोदाह्रियते
मध्याभिकैरवशातंसमरेनकोपादितिकाकुस्वानुस्वराद्वत्यर्थविशेषप्रतीतिः॥ आदिग्रहणादभिनयापदेशनिर्देशसंज्ञेंगिताकारग्रहणं॥ अभिनयोयथा
॥ एद्दहमित्तत्थणियाएद्दहमित्तेहिंअच्छिवत्तेहिं॥ एयावत्थंपत्ताएत्तियमित्तेहिंदिअहेहिं॥ अपदेशोयथा॥ इतःसदैत्यःप्राप्तश्रीर्नेतएवार्हतिक्षयं॥ विषवृक्षो
पिसंवर्ध्यस्वयंछेत्तुमसांप्रतं॥ निर्देशोयथा॥ भवद्गिरिकेदिष्ट्यावर्धामहे॥ यदत्रैवकस्यापिकोपिनिष्कर्न्नतिमामंगुलीविलासेनाख्यातवत्यः॥ संज्ञायथा॥ अथ
वस्तुनिकथाप्रवृत्तेयत्रभवत्सरभंगशासनं॥ वीक्षितेनपरिरभ्यपार्वतीमूर्द्धकंपमयमुत्तरंददौ॥ इंगितंयथा॥ करांतीसंगमोभावीत्याकीर्णेनकुमदाभं
अवेत्यकांतमबलालीलापद्मंन्यमीलयत॥ आकारोयथा॥ नवेद्मितंनिःश्वसितेनसोष्मणामनस्तुमेसंशयमेवगाहते॥ नविद्यतेप्रार्थयितव्यएवते॥ भविष्यतिप्रार्थि
तदुर्लभःकथं॥ तदेवंसंसर्गादिभिर्नियमितायामभिधायांपार्थांतरप्रतीतिःसाव्यंजनव्यापारादेव॥ अमुख्येपिशब्देमुख्यार्थबाधादिनियमितेप्रयोजनप्रति
पत्तिर्व्यंजनव्यापारादेव॥ तथाहितत्रसंकेताभावान्नाभिधानापिगौणीलक्षणावा मुख्यार्थबाधादिलक्षणाभावात्॥ नहिलक्ष्यंमुख्यंनापितस्यबाधानच
किंचिन्निमित्तमस्ति॥ नापितत्रशब्दःस्खलद्गतिः॥ नचकिंचित्प्रयोजनमस्ति॥ अथप्रयोजनेपिलक्ष्ये प्रयोजनांतरमाकांक्षते॥ तर्हितत्रापिप्रयोजनांतराकांक्षाया
मनवस्थात्॥ तथाचलाभमिच्छतोमूलस्यक्षतिः॥ नचप्रयोजनसहितमेवलक्ष्यंलक्षणायाविषयइतिवक्तुंशक्यं॥ विषयप्रयोजनयोरत्यंतभेदात्॥ प्रत्य
क्षादेरपिप्रमाणस्यविषयोघटादिः॥ प्रयोजनंत्वर्थाधिगतिः॥ प्राकट्यंसंवित्तिर्वा॥ तदेवंप्रयोजनविशिष्टस्यलक्ष्यस्यगौणीलक्षणयोरविषयत्वात्प्रयो
जनेव्यंजनमेवव्यापारः॥ तत्रमुख्यशब्दशक्तिव्यंग्यंवस्तुपदेयथा॥ भुक्तिमुक्तिकृदेकांतसमादेशनतत्परः॥ कस्यनानंदनिष्पंदंविदधातिसदागमः॥
कांचित्संकेतदायिनमेवंमुख्ययावृत्त्यासंशंसतीतिसदागमपदेनप्रकाश्यते॥ अत्रार्थयोर्वैलक्षण्यान्नोपमा॥ वाक्येयथा॥ पंथियनएत्थसत्थरमत्थिमणंप
त्थरत्थलेगामे॥ उन्नयपओहरंपेक्खिऊणजइवससिता वससु॥ अत्रप्रहरचतुष्टयमप्युपभोगेन नेहनिद्रांकर्तुंलभ्यतेसर्वत्रापिदाराधात्तदुन्नतपयो
धरांमामुपभोक्तुंयदिवससितदावसेति॥ व्यज्यते॥ वाच्यबाधनंचव्यंग्यस्यस्थितत्वान्नयोर्नोपमानोपमेयभावइति॥ नालंकारोव्यंग्यः॥ यथावाशनि

रागनिश्चनमुच्चैर्निहंतिकुर्यसिनरेंद्रयशिलं ॥ यत्रप्रसीदसिपुनःसभातकदाणेनुरागश्च ॥ अत्रविरुद्धावपिलदनुवर्णनार्थमेकांकार्यंकुरुतइतिव्यत्ययेन
ध्वन्यते ॥ शब्दशक्तिव्यंग्योलंकारः पदेयथा ॥ रुधिरविसरप्रसाधितकरवालकरालरुचिरभुजपरिघः ॥ झटितिभ्रुकुटिविटंकितललाटपट्टोविभासिनृप
भीमः ॥ अत्रभीषणीयस्यभीमसेनउपमानंवाक्येयथा ॥ उक्तः श्रीरुद्रटः कालागुरुमलीमसः ॥ पयोधरभरस्तस्याः कंनचक्रेभिलाषिणं ॥ अत्रवाक्यस्यासं
बद्धार्थत्वंमाप्रसांक्षीदित्यप्राकरणिकप्राकरणिकयोरुपमानोपमेयभावःकल्पनीयइत्युपमालंकारोव्यंग्यः ॥ यथावा ॥ अनंद्रनंद्राभरणसमुद्दीपित
मन्मथानारकांतरलक्ष्मामासानंदनकोतिकं ॥ अत्रशब्दशक्त्याविरोधिपितोरुपमाव्यंग्यायद्यपिसमुद्दीपितनिसानदमितिचार्थोपिव्यंजकस्तथापिनशब्दश
क्तिंविनार्थशक्तिरुन्मीलतीतिशब्दशक्तिरेवव्यंजिका ॥ यथावा ॥ मातंगगामिन्यःशालवत्यश्च ॥ गौर्याविभवरताश्चांशयामाःपद्मरागिण्यः ॥ धवलद्विजशु
चिवदनामदिरामोदश्वसनाश्चप्रमदाः ॥ अत्रविरोधालंकारोव्यंग्यः ॥ यथावा ॥ खंरयेभ्युज्ज्वलयंतिलूनतमसोयेवानवोद्गासिनोयेपुष्णंतिसरोरुहश्रिय
मधिक्षिप्ताब्जभासश्चयेयेमूर्द्धस्ववभासिनःक्षितिभृतांयेचामराणांशिरांस्याक्रामंत्युभयेपितेदिनपतेःपादाःश्रियेसंतुवः ॥ अत्रव्यतिरेकः ॥ एवमलं
कारांतराण्युदाहार्याणि ॥ गौणशब्दशक्तिव्यंग्यंवस्तुपदेयथा ॥ रविसंक्रांतसौभाग्यस्तुषाराविलमंडलः ॥ निःश्वासांधइवादर्शश्चंद्रमानप्रकाशते ॥ अत्रोपसं
हृतदृष्टिशक्तिरंधशब्दोबाधितमुख्यार्थःपदार्थप्रकाशनाशक्तिलंनष्टदृष्टिकंतन्निमित्तीकृत्यादर्शेर्थसमानोःसाधारणविच्छायित्वानुपयोगित्वादिधर्मशा
तमसंख्यंप्रयोजनंव्यनक्ति ॥ वाक्येयथा ॥ यानिशासर्वभूतानांतस्यांजागर्तिसंयमी ॥ यस्यांजागर्तिभूतानिसारात्रिःपश्यतोमुनेः ॥ अत्रनिशायांजागरित
व्यमन्यत्रागिवदासितव्यमितिनकश्चिदुपदेश्यंप्रत्युपदेशःसिध्यतीतिबाधितस्वार्थमेतद्वाक्यंसंयमिनोलोकोत्तरतालक्षणेननिमित्तेनतत्त्वदृष्टय
भानंमिथ्यादृष्टौतुपराङ्मुखत्वंध्वनतीति ॥ लक्षकशब्दशक्तिव्यंग्यंवस्तुपादयथा ॥ स्निग्धश्यामलकांतिलिप्तवियतोवेल्लद्बलाकाघनावाताःशीकरिणः
पयोदसुहृदामानंदकेकाःकलाः ॥ कामंसंतुदृढंकठोरहृदयोरामोस्मिसर्वंसहेवैदेहीतुकथंभविष्यतिहहाहादेविधीराभव ॥ अत्रप्रकरणाद्वतीय
त्रिकर्निर्दिष्टाश्चरामेप्रतिपन्नेरामपदमनुपयुज्यमानंकठोरहृदयइत्यनेनदर्शितावकाशंपितृमरणसीतावियोगाद्यनेकदुःखभाजनत्वंलक्षय

दसाधारणीनिर्निर्वेदग्लानिमोहादीन्व्यनक्ति ॥ वाक्येयथा ॥ सुवर्णपुष्पांपृथिवींचिन्वंतिपुरुषास्त्रयः ॥ शूरश्चकृतविद्यश्चयश्चजानातिसेवितुं ॥ इदंहि
वाक्यमसंतिभवत्स्वार्थसस्मादृश्यात्सकलाभसमृद्धिसंभारभाजनतांलक्षयद्भूरकृतविद्यसेवकानांप्राशस्त्यंध्वनति ॥ अर्थशक्तिमूलंव्यंग्यमा
ह ॥ ४९ ॥ वस्त्वलंकारयोस्तद्व्यंजकत्वेऽर्थशक्तिमूलः ॥ प्रबंधेपि ॥ वस्तुनोलंकारस्यप्रत्येकंवस्त्वलंकारव्यंजकत्वेऽर्थशक्तिमूलःसचपदवाक्यप्रा
गःप्रबंधेच ॥ इहाचार्थःस्वतःसंभवीकविप्रौढोक्तिमात्रनिष्पन्नशरीरःकविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरोवेतिभेदकथनंन्याय्यं
प्रौढोक्तिनिर्मितत्वमात्रेणैवसाध्यसिद्धेःप्रौढोक्तिमंतरेणस्वतःसंभविनोप्यकिंचित्करत्वात् ॥ कविप्रौढोक्तिरेववक्तृकविनिबद्धवक्तृप्रौढोक्तिरि
तिकिंप्रपंचेन ॥ तत्रवस्तुनोवस्तुव्यंजकत्वंपदेयथा ॥ तंताणसिरिसहोयररयणाहरणंमिहिययमेकरसं ॥ बिंबाहरेपियाणंनिवेसियंकुसुमबाणेण ॥ अ
त्रकुसुमबाणेनेतिपदंकामदेवस्यमदूपायत्वोद्यप्रकाशमति ॥ वाक्येयथा ॥ तापीनेयंनियतमथनानीतेतानिन्ततंतीराण्यस्यासविधविवलदीचि
वाचालितानि ॥ अन्योन्याह्रंकिमथंनहितद्वारिवेदद्वहल्यकयत्तस्त्रीपतिदुहितरिस्नातुमभ्यागतायां ॥ अत्रवाच्यार्थेनवस्तुमात्ररूपेणाभिरूपणीय
तनरूतमेकावानांहृद्यत्वंनस्वतद्रत्येतद्वस्तुव्यज्यते ॥ वस्तुनोलंकारव्यंजकत्वंपदेयथा ॥ ~राणरमदुघुसिणारुणंमिनतहापियाथणुच्छंगे ॥ दिट्ठा
सिउगयकुंभत्थलंमिजहबहलसिंदूरे ॥ अत्रधीराणामितपदार्थोवस्तुमात्ररूपःकुचयोःकुंभस्थलस्योपमालंकारंध्वनति ॥ वाक्येयथा ॥ पुत्रस
येघनघनप्रविजुतमाणारस्नोत्थाशाकपिषमज्वलनाभितप्तः ॥ प्रालेयशीतलममंस्तसबाल्यवन्हिमन्हायदेहमथसंविदधेसरित्सात् ॥ अत्रवशिष्टः
पुत्रस्तयोपुनसौग्निप्रविष्टोपिनतेनदग्धइत्ययंवाच्यार्थोवस्तुस्वभावःशौकस्यबाल्यवन्हेरधिकमितिव्यतिरेकालंकारंध्वनति ॥ अलंकारस्यवस्तु
व्यंजकत्वंपादेयथा ॥ गहअंकुरावयंसंवणपसरमहग्घमणहरसुरामोअं ॥ अपणामिअंपिगहिअंकुसुमसरेणमहुमासलच्छीएमुहं ॥ अभा
पणामिअमसमर्पितमपीतिविरोधालंकारेणवाच्येनमधुमासप्रौढिमन्निभाविनिकिंचिविषयत्वेवंभूतंवस्तुध्वन्यते ॥ वाक्येयथा ॥ मादालिंगण
रहसुज्जुअंमिदइएलहुंसमोसरइ ॥ माणंसिणीणमाणोपीलणभीउब्बहिअयाउ ॥ अत्रोत्क्षेपात्प्रत्यालिंगनादितत्रंश्रंभनइतिवस्तुव्यज्यते ॥ अ

लंकारेणालंकारः पदे यथा ॥ तुह वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलं ॥ इय नववहू आसोऊण कुणइ वयणं महीसमुहं ॥ अत्र मिला
८ णकमलदलमिति रूपकेण म्लानत्वान्यथानुपपत्त्या त्वया मुहुर्मुहुः परिचुंबनं कृतमिति अनुमानं व्यज्यते ॥ वाक्ये यथा ॥ सवत्कुमखिलानन्ता
क्रौ हयग्रीवाश्रिता सगुणेन ॥ यातु कुंभे परिच्छेदं ज्ञः कर्तुं महोदधेः ॥ अत्र निदर्शनेन हयग्रीवगुणानामवर्णनीयताप्रतिपादनरूपो ऽसाधारणत
द्विशेषप्रकाशपर आक्षेपो व्यज्यते ॥ प्रबंधेऽर्थशक्तिमूलो व्यंग्यो यथा ॥ गृध्रगोमायुसंवादे ॥ अलं स्थित्वा श्मशानेस्मिन् गृध्रगोमायुसंकुले
कंकालबहुले घोरे सर्वप्राणिभयंकरे ॥ न चेह जीवितः कश्चित्कालधर्ममुपागतः ॥ प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ इति दिवा प्रभवतो गृध्रस्य
पुरुषविसर्जनपरमिदं वचनं ॥ आदित्योयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं ॥ बहुविघ्नो मुहूर्तोयं जीवेदपि कदाचन ॥ अमुं कनकवर्णाभं बालमप्रा
प्तयौवनं ॥ गृध्रवाक्यात्कथं बालस्त्यक्ष्यध्वमविशंकिताः ॥ इति निशि विजृंभमाणस्य गोमायोर्जनव्यावर्तननिष्ठं चेति प्रबंधप्रतिपाद्येनार्थेन
गृध्रगोमाय्वोर्भक्षणाभिप्रायो व्यज्यते ॥ एवं मधुमथनजये पांचजन्योक्तिषु विषमबाणलीलायां कामदेवस्य सहचरसमागमेऽर्थव्यंजकत्व
मुदाहार्यं ॥ एवं च वस्तुनोलंकारव्यंजकत्वेऽलंकारस्य च वस्त्वलंकारव्यंजकत्वे भेदत्रयमनुसरणीयं ॥ ७१ ॥ रसादिश्च रसभावतदाभासभाव
शांतिभावोदयभावस्थितिभावसंधिभावशबलत्वान्यर्थशक्तिमूलानि व्यंग्यानि ॥ चकारः पदवाक्यप्रबंधानुकर्षणार्थः ॥ पृथग्योगो रसाद
यो व्यंग्या एव भवंति न तु कदाचिद्वाच्यतामपि सहंत इति रसादीनां प्राधान्यख्यापनार्थः ॥ वस्त्वलंकारौ हि वाच्यावपि भवत इति तत्रार्थशक्ति
मूलो व्यंग्यो रसः पदे यथा ॥ उत्कंपिनी भयपरिस्खलितांशुकांता ते लोचने प्रतिदिशं विधुरे क्षिपंती ॥ तीक्ष्णेन दारुणतया सहसैव दग्धा धूमां
धितेन दहनेन न वीक्षितासि ॥ अत्र ते इति पदेन स्मारितानामनुभवैकगोचराणां सातिशयविभ्रमाणां शोकव्यंजकत्वं ॥ वाक्ये यथा ॥ मा पंथं रुंधिम ५१
हं अवेहि बालय अहोसि अहिरीउ ॥ अम्हे अणिरिक्काउ सुन्नहरं रक्खियव्वं णो ॥ अत्रापि हीनित्पायं त्वं तावदप्रौढो लोकमध्ये यदेवं प्रवदाशय
सि अस्ति तु संकेतस्थानं शून्यगृहं तत्रैवागंतव्यमिति ध्वनति ॥ पादैकदेशोपि पदं यथा ॥ तालैः शिंजद्वलयसुभगैर्नर्तितः कांतया मे यामध्यास्ते दि

वसविगमे नीलकंठः ॥ सुहृदः ॥ अत्र तालैरिति बहुवचनमानकभंगिवैदग्ध्यं ख्यापयद्विप्रलंभमुद्दीपयति ॥ लिख्यन्नास्ते भूमिं बहिरवनतः
प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः ॥ परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना ॥ अ
त्र न लिखतीत्यपि तु प्रसादपर्यंतमास्त इति तथा ॥ ७२ ॥ आस्त इति न त्वासित इति भूमिमिति न तु भूमाविति ॥ न हि बुद्धिपूर्वकं रूपकं किंचिल्लि
खतीति स्यादित्यादि विभक्तीनां व्यंजकत्वं ॥ अत्रत्थ बाह्नवाल्यण्हायंतिं की सभं पलोएसि ॥ पथं भो जायाभीरुयाण तहं चिय न होइ ॥ अत्र जाया
नीयेभीरवस्तीयामितश्मानस्थानमिति ॥ दूरापेन ॥ संबंध इत्यनेन संबंधे तौबर्ष्यातिशयः प्रच्छन्नकामिन्याभिव्यक्तः ॥ जायाभीरुकाणामित्यत्र तद्धित
स्यापि व्यंजकत्वं ॥ देव्युरसत्ताधर्मपत्नीषु प्रेमपरतंत्रा स्तोभ्यः कौयाजगति कुत्सितस्यादिति कप्रत्ययोऽयज्ञातिशयद्योतकः ॥ अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे ॥ नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ अत्र चकारो निपातावेव माहतुः ॥ गंडस्योपरिस्फोटव
द्वियोगश्च वर्षासमयश्च समुपनतमेतमेतद्द्वयमलं प्राणहरणायेति ॥ अत एव रम्यपदेन स्फुटतरामुद्दीपनविभावत्वमुक्तं ॥ प्रस्निग्धाः क्वचिदिंगु
दीफलभिदः -व्यंत -खापलाः ॥ अत्र प्रइत्युपसर्गो इंगुदीफलानां सरसत्वमाचक्षाण आश्रमस्य सौंदर्यातिशयं ध्वनति ॥ अनेकस्य निपात
स्योपसर्गस्य चैकत्र पदे यः प्रयोगः सोपि रसव्यंजकार्थः ॥ यथा ॥ अहो बतासि स्पृहणीयवीर्यः ॥ अत्राहो बत इत्यनेन श्लाघातिशयो ध्वन्यते ॥ मनुष्यत्व
त्या समुपाचरंतं स्वबुद्धिसामान्यकृतानुमानाः ॥ योगीश्वरैरप्यसुबोधमीशं त्वां बोद्धुमिच्छंत्यबुधाः स्वतर्कैः ॥ अत्र सम्यग्भूतगुणांश्च कलाभासमंताच्च गंत
मित्यनेन ॥ लोकानुजिघृक्षातिशयस्तन्नदाचरतः परमेश्वरस्य ध्वन्यते ॥ रमणीयः क्षत्रियकुमार आसीदिति ॥ अत्र शंकरधनुर्भंगश्रवणात्प्रकुपि
तस्य भार्गवस्योत्तर आसीदित्यतीतकालनिर्देशाद्दाशरथेः कथाशेषत्वं व्यज्यते यथा च प्रत्ययांशस्य द्योतकत्वं तथा प्रकृत्यंशस्यापि ॥ यथा ॥ तद्देहं
नतभित्तिमंदिरमिदं लब्धावकाशं दिवः सा धेनुर्जरती नदंति करिणामेना घनाभा घटाः सक्षुद्रामुसलध्वनिः कलमिदं संगीतकं योषितामाश्चर्यं
दिवसैर्द्विजोयमियतीं भूमिं परां प्रापितः ॥ अत्र दिवसार्थेनात्यंतासंभाव्यमानतास्यार्थस्य ध्वन्यते ॥ तदिति प्रकृत्यंशाश्चात्र तनभीत्तीसेन

प्रकृत्यंशासहायःसमस्तामंगलभूतामपिकाव्याकार्णतांध्वनति ॥ एवंगांधर्वेण्वादावपियोज्यं ॥ तथारुद्दकोलंदिहुअनिअंतणकारकिमलयर
ध्दनयणजुयलस्स ॥ रुद्दस्सतइयपरिउंबिअंजयई ॥ अत्रजयतीतितद्धोभनदित्यादि ॥ समानेपिहिस्थगनव्यापारेलोकोत्तरेणैवरूपेणाग्यपिधा
नमितितन्देवोत्कृष्टमितिव्यज्यते ॥ भावादीनांपदप्रकाशकत्वेऽधिकंनवैचित्र्यमितिनतदुदाहियतेवाक्यस्वरसादिव्यंजकत्वंरसादिलक्षणाए
वोदाहरिष्यते ॥ प्रबंधेचनाटकादावर्थशक्तिमूलारसव्यक्तिःप्रतीतैववर्णरचनयोस्तुसाक्षान्माधुर्यादिगुणव्यंजकत्वमेवातद्वारेणतुरसोपयो
गइतिगुणप्रकरणएववक्ष्यतेइतीहनोक्तं ॥ ३॥ इत्याचार्यश्रीहेमचंद्रविरचितायामलंकारचूडामणिसंज्ञस्वोपज्ञकाव्यानुशासनवृत्तौप्रथमोऽध्यायः
रसलक्षणमाह ॥ ॥ १ ॥ विभावानुभावव्यभिचारिभिरभिव्यक्तःस्थायीभावोरसावागाद्यभिनयसहिताःस्थायिव्यभिचारिलक्षणाश्चित्तवृत्तयोविभाव्यंते विशि
ष्टतयाज्ञायंतेयैस्तैर्विभावैःकाव्यनाट्यशास्त्रप्रसिद्धैरालंबनोद्दीपनस्वभावैर्ललनाद्यानादिभिःस्थायिव्यभिचारिलक्षणंचित्तवृत्तिविशेषं
सामाजिकजनोऽनुभवन्ननुभाव्यतेसाक्षात्कार्यतेयैस्तैरनुभावैःकटाक्षभुजाक्षेपादिभिर्विविधमाभिमुख्येनचरणशीलैर्व्यभिचारिभिर्धृतिस्मृति
प्रभृतिभिः स्थायिभावानुमापकत्वेनलोकेकारणकार्यसहचारिशब्दव्यपदेश्यैर्नममैवैतेपरस्यैवैतेनममैवैतेनपरस्यैवैतेइतिसंबंधिविशेषस्वीका
रपरिहारनियमानवसायात्साधारण्येनकारणकार्यसहचारिशब्दव्यपदेश्यैर्नममैवैतेपरस्यैवैतेननतेनपरस्यैवैतेइतिसंबंधिप्रतीतैरभिव्यक्तः
सामाजिकानांवासनारूपेणस्थितस्थायीरत्यादिकोभावोनियतप्रमातृगतत्वेनस्थितोपिसाधारणोपायबलात्सहृदयसंवादभाजासाधारण्ये
नगोचरीक्रियमाणश्चर्व्यमाणतैकप्राणोविभावादिभावनावधिरलौकिकचमत्कारकारिपरब्रह्मास्वादसोदरोनिमीलितनयनैःकविसहृदयैर
स्यमानःस्वसंवेदनसिद्धोरसः ॥ सचनविभावादेःकार्यस्तद्विनाशेपिरससंभवप्रसंगात् ॥ नापिज्ञाप्यःसिद्धस्यतस्याभावात्कारकज्ञापकाभ्या
मन्यत्क्वदृष्टमितिचेन्नक्वचिद्दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्नदूषणं ॥ विभावादीनांचसमस्तानामभिव्यंजकत्वंनव्यस्तानांव्यभिचारा १
त्व्याघ्रादयोहिविभावाभयानकस्येववीराद्भुतरौद्राणां ॥ अश्रुपातादयोनुभावाःकरुणस्येवशृंगारभययोः ॥ चिंतादयोव्यभिचा

रिणःकरुणस्येवशृंगारवीरभयानकानामित्यर्थैकैकस्योपादानंयथा ॥ केलीकंदलितस्यविभ्रममधोर्धुर्यंवपुस्तद्दृशोर्भंगीभंगुरकामकार्मुकमिदंभ्रूनर्म
कर्मक्रमः ॥ आपातेपिविकारकारणमहोवक्रांबुजन्मासवःसत्यंसुंदरिवेधसस्त्रिजगतीसारंत्वमेकाकृतिः ॥ अत्रविभावानां ॥ यद्विश्रम्यविलोकि
तेषुबहुशोनिःस्थेमनीलोचनेयद्गात्राणिदरिद्रतिप्रतिदिनंलूनाब्जिनीनालवत् ॥ दूर्वाकांडविडंबकश्चनिविडोयत्पांडिमागंडयोःकृष्णेयूनिसयौव
नासुवनितास्वेषैववेषस्थितिः ॥ अत्रानुभावानां ॥ दूरादुत्सुकमागतेसंभाषिणिस्फारितंसंश्लिष्यत्यरुणंगृहीतवसनेकिंचांचितभ्रूलतं ॥ मानि
न्याश्चरणानतिव्यतिकरेबाष्पांबुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसि ॥ अत्रौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानांव्यभिचारि
णांतत्रापितेषामौचित्यादन्यतमद्वयाक्षेपकत्वमितिनव्यभिचारः ॥ रसभेदानाह ॥ शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशांतानवर
साः ॥ तत्रकामस्यसकलजातिसुलभतयात्यंतपरिचितत्वेनसर्वान्प्रतिहृद्यतेतिपूर्वंशृंगारः ॥ तदनुगामीचहास्यः ॥ निरपेक्षभावत्वात्तद्विपरीतस्ततः
करुणः ॥ ततस्तन्निमित्तमर्थप्रधानोरौद्रः ॥ ततःकामार्थयोर्धर्ममूलत्वाद्धर्मप्रधानोवीरःतस्यभीताभयप्रधानत्वात्तदनंतरंभयानकः ॥ तद्विभावसा
धारण्यसंभावनात्ततोबीभत्सः ॥ इतीयद्वीरेणाक्षिप्तं ॥ वीरस्यपर्यंतेद्भुतःफलमित्यनंतरंतदुपादानं ॥ ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्ति
धर्मात्मकोमोक्षफलःशांतः ॥ एतेनवैवपरस्परासंकीर्णारसाः ॥ तेनार्द्रस्थायिकःस्नेहोरसइत्यसत् ॥ तस्यरत्यादावंतर्भावात् ॥ तथाहियूनोर्मित्रेस्ने
होरतौ ॥ लक्ष्मणादेर्भ्रातरिस्नेहोधर्मवीरोबालस्यमातापित्रादौस्नेहोभयेविश्रांतः ॥ एवंवृद्धस्यपुत्रादावपितद्द्रष्टव्यं ॥ तथागर्द्धस्थायिकस्यलौल्यरस
स्यहासेरतौवान्यत्रवांतर्भावोवाच्यः ॥ एवंभक्तावपिवाच्यंतत्रशृंगारमाह ॥ ३॥ स्त्रीपुंसविभावाजुगुप्सालस्यौग्र्यवर्ज्यव्यभिचारिकारतिःसंभोग माल्यादि
विप्रलंभात्माशृंगारः ॥ स्त्रीपुंसौपरस्परंतयोश्चापयोगिनोमाल्यर्तुशीलपुरहर्म्यनदीचंद्रपवनोद्यानदीर्घिकाजलक्रीडादयश्चश्रूयमाणाअनुभूयमा
नावाआलंबनोद्दीपनरूपाविभावायस्याःसाजुगुप्सालस्यौग्र्यवर्जितव्यभिचारिणीसमग्रविषयमासमग्रयोःस्थिरानुरागयोःसंप्रयोगरूपविषयिणी
कासितोर्थिनोःपरस्परविभाविकाद्वयोरप्येकरूपाप्रारंभादिफलपर्यंतव्यापिनीसुखोत्तरीआस्थाबंधात्मिकारतिःस्थायीभावश्चवर्णनागोचरंगताशृं

गाररसः देवमुनिगुरुनृपपुत्रादिविषयानुभावएवनपुनारसः देवविषयायथा यैःशांतरागरुचिभिःपरमाणुभिस्त्वंनिर्मापितस्त्रिभुवनैकललामभूतः
१० तावंतएवखलुतेप्यणवःपृथिव्यांयत्तेसमानमपरंनहिरूपमस्ति मुनिविषयायथा गृहाणिनामतान्येवतपोराशिर्भवादृशः संभावयतियान्येवपाव
नैःपादपांसुभिः अनुभावास्तुसंभोगविप्रलंभयोःप्रत्येकंवक्ष्यंतइतीहनोक्ताः संभोगविप्रलंभावात्मानौयस्यसतथा तेनशृंगारस्यैतौभे
दौ गोत्वस्येवशाबलेयबाहुलेयौअपितुनद्वयोरप्यनुयायिनीयारतिरास्थायिभावात्मिकातस्याःस्वाद्यमानरूपःशृंगारः संभोगविप्रलंभयोस्तुशृं
गारशब्दःप्राथमिकदेशेग्रामशब्दवदुपचारात तथाहिविप्रलंभेनवच्छिन्नएवसंभोगमनोरथः निराशत्वेकरुणएवस्यात संभोगेपिनचेद्विरहाशं
कातदास्वाधीनेतुक्लेशादरएवस्यात् चागत्यामनोभवः यदाहमुनिः यद्वामाभिनिवेशित्वंयतश्चविनिवार्ते दुर्लभत्वंचयन्नार्याःकामिनः र्य
सापरारतिः अतएवतद्द्वयाढ्यमालूनएवसातिशयश्चमत्कारोयथा एकस्मिन्शयनेपराङ्मुखतयावीतोत्तरंताम्यतोरन्योन्यंहृदयस्थि
तेप्यनुनयेसंरक्षतोर्गौरवं दंपत्योःशनकैरपांगवलनान्मिश्रीभवच्चक्षुषोर्भग्नोमानकलिःसहासरभसव्यावृत्तकंठग्रहं सेयंविभावादिसामग्रीचस्तुतः
प्रबंधएवप्रथते मुक्तकेषुतुकाल्पनिकैव तत्रसंभोगमाह सुखमयधृत्यादिव्यभिचारिरोमांचाद्यनुभावःसंभोगः लज्जाद्यैर्निषिद्धान्यपीष्टा
निदर्शनादीनिकामिनीयत्रसंभुंजातेससंभोगः सचसुखमयधृत्यादिव्यभिचारिरोचितोरोमांचस्वेदकंपाश्रुमेखलास्खलनश्वसितसाध्व
सकेशबंधनवस्त्रसंयमनवस्त्राभरणमाल्यादिसम्पन्निवेशनविचित्रकरणचाटुप्रभृतिवाचिककायिकव्यापारलक्षणानुभावः परस्पराव
लोकनालिंगनचुंबनपानाद्यनंतभेदः यथा दृष्ट्वैकासनसंगतेप्रियतमेपश्चादुपेत्यादरादेकस्यानयनेनिमील्यविहितक्रीडानुबंधच्छलः
ईषद्वक्रितकंधरःसपुलकःप्रेमोल्लसन्मानसामंतर्हासलसत्कपोलफलकांधूर्तोपरांचुंबति विप्रलंभमाह शंकादिव्यभिचारिसंतापाद्यनुभा
वोभिलाषमानप्रवासरूपोविप्रलंभः संभोगस्यस्वास्वादप्रभेनविशेषेणप्रलंभ्यतेआत्मास्मिन्नितिविप्रलंभः सचशंकाशोकमदग्लानिनि १०
द्रासुप्तप्रबोधचिंतौत्सुक्यश्रमनिर्वेदमरणोन्मादजडताव्याधिस्वप्नापस्मारादिव्यभिचारीसंतापजागरकार्श्यप्रलापरोदनेत्रचावक्रतादि

निःश्वसितानुकारकृतिलेखलेखनवाचनस्वभावनिह्नववार्ताप्रश्नस्नेहनिवेदनसात्त्विकानुभवनसीतसेवनमरणोद्यमसंदेशाद्यनुभावस्त्रि
धा अभिलाषमानप्रवासभेदात करुणविप्रलंभस्तुकरुणएवयथा हृदयेवससीतिमत्प्रियंयदवोचस्तदवैमिकैतवं उपचारपदंनचे
दिदंत्वमनंगःकथमक्षतारतिः इत्यादि रतिप्रलापेषु तत्राभिलाषविप्रलंभमाह ७ दैवपारवश्याभ्यामाद्योद्विधा आद्योभिलाषविप्रलंभः सदै
वाद्यथा शैलात्मजापिपितुरुच्छिरसोभिलाषंव्यर्थंसमर्थ्यललितंवपुरात्मनश्च सख्योःसमक्षमितिचाधिकजातलज्जाशून्याजगामभवनाभिमुखी
कथंचित् पारवश्याद्यथा स्मरनवनदीपूरेणोढामुहुर्गुरुसेतुभिर्यदपिविधृतादुःखंतिष्ठत्यपूर्णमनोरथाः तदपिलिखितप्रख्यैरंगैःपरस्परमुन्मु
खानयननलिनीनालानीतंपिबंतिरसंप्रिया प्रतिज्ञाभंगभीत्यापियोनसंगःकादंबर्यांश्चंद्रापीडेनसोपिपारवश्यजएवमानविप्रलंभमाह
७ प्रणयेर्ष्याभ्यांमनः प्रेमपूर्वकोवशीकारःप्रणयस्तद्भंगोमानःप्रणयमानः सचस्त्रियाःपुंसउभयस्यवा स्त्रियायथा प्रणयकुपितांदृष्ट्वा
देवींससंभ्रमविस्मृतस्त्रिभुवनगुरुर्भीत्यासद्यःप्रणामपरोभवत् नमितशिरसोगंगालोकेतयाचरणाहतावचतुस्तवनस्याक्षस्यैतद्विल
क्षमवस्थितं पुंसोयथा अस्मिन्नेवलतागृहेत्वमभवस्तन्मार्गदत्तेक्षणः साहंसैवकृतकौतुकाचिरमभूद्गोदावरीसैकते आयांत्यापरिदुर्म
नायितमिवत्वांवीक्ष्यबद्धस्त्वया कातर्यादरविंदकुड्मलनिभोमुग्धःप्रणामांजलिः उभयस्ययथा पणयकुवियाणदुण्हविअलियपसुत्ताणमाण
इल्लाण णिच्चलणिरुद्धणीसासदिण्णअण्णाणकोमल्लो ईर्ष्यामानःस्त्रीणामेवयथा संध्यायत्प्रणिपत्यलोकबद्धांजलिर्याचसे धत्सेयच्चनदीं
विलज्जशिरसातच्चापिसोढंमया श्रीर्जातामृतमंथनेयदिहरेःकस्माद्विषंभक्षितंमास्त्रीलंपटमांस्पृशेत्यभिहितोगौर्याहरःपातुवः प्रवासविप्रलं
भमाह ७ कार्यशापसंभ्रमैःप्रवासःप्रवीणाभिन्नदेशत्वं तत्रकार्यहेतुकःप्रवासोयथा यातेद्वारवतींतदामधुरिपौतद्दत्तझंपानतांकालिं
दीतटरूढवंजुललतामालिंग्यसोत्कंठया तद्गीतंगुरुबाष्पगद्गदगलत्तारस्वरंराधयायेनांतर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितं शापहेतुकःप्र
वासोमेघदूतकाव्यमेवोदाहरणं संभ्रमोदिव्यमानुषविड्वरादुत्पातादिविप्लवात्परचक्रादिविप्लवाद्वाव्याकुलत्वंयथा मकरंदयुद्धसाद्यो

कर्णेगतस्यमाधवस्यहाप्रियेहामालतीति ॥ किमपिकिमपिशंकेमंगलेभ्योयदन्यद्विरमतुपरिहासश्चंडिकपर्युत्सुकोस्मि ॥ कलयसिकलितोहंवत्सलेदेहिवाचंभ्रमतिहृदयमंतर्विह्वलंनिर्दयासि ॥ हास्यमाह ॥ छ ॥ विकृतवेषादिविभावोनासास्पंदनाद्यनुभावोनिद्रादिव्यभिचारीहासोहास्यः ॥ देशकालवयोवर्णवैपरीत्याद्विकृताःकेशबंधादयोवेषाआदिशब्दान्नर्तनान्यगताद्यनुकरणासत्प्रलापादूषणादीनिविभावायस्यसतथा ॥ सौष्ठकपोलस्पंदनदृष्टिव्याकोशाकुंचनस्वेदास्यरागपार्श्वग्रहणाद्यनुभावोनिद्रावहित्थचापल्यादिव्यभिचारीहासस्थायीवर्णनीयत्वमागतोहास्यः सआत्मस्थःपरस्थश्चतत्रात्मस्थमाह ॥ छ ॥ उत्तममध्यमाधमेषुस्मितविहसितापहसितैःसआत्मस्थस्त्रेधा ॥ तत्रस्मितहासः यद्भरतः ईषद्विकसितैर्गंडैःकटाक्षैःसौष्ठवान्वितैः ॥ अलक्षितद्विजंधीरमुत्तमानांस्मितंभवेत् ॥ आकुंचिताक्षिगंडंयत्सस्वनंमधुरंतथा ॥ कालागतंसास्यरागंतद्वैविहसितंभवेत् ॥ अस्थानहसितंयत्तुसास्रनेत्रंतथैवच ॥ उत्कंपितांसकशिरस्तच्चापहसितंभवेत् ॥ परस्थमाह ॥ एतत्संक्रमणैर्हसितोपहसितातिहसितैःपरस्थोपि ॥ एतेषांस्मितादीनांसंक्रांत्याजातैर्यथासंख्येनोत्तमादिषुयद्भरतः ॥ उत्फुल्लाननेत्रंतुगंडैर्विकसितैरथकिंचिल्लक्षितदंतंचहसितंतद्विधीयते ॥ उत्फुल्लनासिकंयत्तुजिह्मदृष्टिनिरीक्षितं ॥ निकुंचितांसकशिरस्तच्चोपहसितंभवेत् ॥ संरब्धसास्रनेत्रंचविकृष्टस्वरमुद्धतं ॥ करोपगूढपार्श्वंचतथातिहसितंभवेत् ॥ तत्रात्मस्थोहासोयथा पायोत्कंकणमुत्फणःफणिपतिर्नैवंस्खलत्यावलंकनःकुटिलकालकूटकुटिलोवक्त्रांगजेंद्राचितं ॥ गौरीलोचनलोभनायमुभयोर्वेषांतरंस्येप्सितंगंडोल्लासविभावितःपशुपतेर्हास्योद्गमःपातुवः ॥ परस्थोयथा कनककलशस्वच्छेराधापयोधरमंडलेनवजलधरश्यामामात्मद्युतिंप्रतिबिंबितां ॥ असितसितचयप्रांतभ्रांत्यामुहुर्मुहुरुत्क्षिपन्जयतिजनितव्रीडाहासःप्रियाहसितोहरिः ॥ करुणमाह ॥ छ ॥ इष्टनाशादिविभावोदैवोपालंभाद्यनुभावोदुःखमयव्यभिचारीशोकःकरुणः ॥ इष्टवियोगानिष्टसंप्रयोगविभावोदैवोपालंभनिश्वासतानवमुखशोषणस्वरभेदाश्रुपातवैवर्ण्यप्रलयस्तंभकंपभूलुठनगात्रस्रंसाक्रंदाद्यनुभावोनिर्वेदग्लानिचिंतौत्सुक्यमोहश्रमत्रासविषाददैन्यव्याधिजडतोन्मादापस्मारालस्यमरणप्रभृतिदुःखमयव्यभिचारीचित्तवैधुर्यलक्षणःशोकस्थायिभावश्चवर्णनी

११

यतांगतःकरुणोरसः ॥ यथा ॥ अयिजीवितनाथजीवसीत्यादिरतिप्रलापेषु ॥ रौद्रमाह ॥ छ ॥ दारापहारादिविभावोनयनरागाद्यनुभावऔग्र्यादिव्यभिचारीक्रोधोरौद्रः ॥ दारापहारदेशजात्यभिजनविद्याकर्मनिंदाअसत्यवचनस्वभृत्याधिक्षेपोपहासवाक्पारुष्यद्रोहमात्सर्यादिविभावोनयनरागभ्रुकुटीकरणदंतौष्ठपीडनगंडस्फुरणहस्ताग्रनिष्पेषताडनपाटनपीडनप्रहरणाहरणशस्त्रसंपातरुधिराकर्षणछेदनाद्यनुभावऔग्र्यावेगोत्साहविबोधामर्षचापलादिव्यभिचारीक्रोधस्थायिभावश्चवर्णनीयतांप्राप्तोरौद्रोरसः ॥ यथा ॥ चंचद्भुजभ्रमितचंडगदाभिघातसंचूर्णितोरुयुगलस्यसुयोधनस्य ॥ स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यतिकचांस्तवदेविभीमः ॥ वीरमाह ॥ छ ॥ नयादिविभावःस्थैर्याद्यनुभावोधृत्यादिव्यभिचार्युत्साहोधर्मदानयुद्धभेदोवीरः ॥ प्रतिनायकवर्त्तितविनयासंमोहाध्यवसायबलशक्तिप्रतापप्रभावविक्रमादिक्षेपादिविभावःस्थैर्यधैर्यशौर्यगांभीर्यत्यागवैशारद्याद्यनुभावोधृतिस्मृत्यौग्र्यगर्वामर्षमत्यावेगहर्षादिव्यभिचारीउत्साहःस्थायिभावश्चवर्णनीयतांगतोधर्मदानयुद्धभेदात्त्रिधावीरः ॥ यथा ॥ अजित्वासार्णवामुर्वीमनिष्ट्वाविविधैर्मखैः ॥ अदत्त्वाचार्थमर्थिभ्योभवेयंपार्थिवःकथं ॥ तत्रधर्मवीरोनागानंदेजीमूतवाहनस्य ॥ दानवीरःपरशुरामबलिप्रभृतीनां ॥ युद्धवीरोवीरचरितेरामस्य ॥ इहचापल्यंकनिमग्नतांस्वलसंतोषंमिथ्याज्ञानंवापरस्ययंस्तत्त्वनिश्चयरूपःसंमोहाध्यवसायःसएवप्रधानतयोत्साहहेतुः ॥ रौद्रेतुममताप्राधान्याद्वैरास्त्रितानुक्तिषुद्धाद्यपीतिमोहविस्मयप्राधान्यमितिविवेकः ॥ भयानकमाह ॥ छ ॥ विकृतस्वरश्रवणादिविभावःकरकंपाद्यनुभावःशंकादिव्यभिचारीभयंभयानकः ॥ पिशाचादिविकृतस्वरश्रवणनंदवलोकनस्वजनवधबंधादिदर्शनश्रवणशून्यप्रहारव्यगमनादिविभावःकरकंपनचलदृष्टिनिरीक्षणहृदयपादस्पंदनशुष्कौष्ठकंठत्वमुखवैवर्ण्यस्वरभेदाद्यनुभावःशंकापस्मारमरणत्रासचापलावेगदैन्यमोहादिव्यभिचारीस्त्रीणांचप्रकृतीनांस्वाभाविकमुत्तमानांकृतकंभयंस्थायिभावश्चवर्णनीयत्वमागतोभयानकोरसः ॥ यथा ॥ ग्रीवाभंगाभिरामंमुहुरनुपतितस्यंदनेदत्तदृष्टिःपश्चार्द्धेनप्रविष्टःशरपतनभयाद्भूयसापूर्वकायं ॥ शष्पैरर्द्धावलीढैःश्रमविततमुखभ्रंशिभिःकीर्णवर्त्मापश्योदग्रप्लुतत्वाद्वि

यति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ ननु च गजादिः किमिति गुर्वादिशा कृतकं भयं दर्शयति दर्शयित्वा किमिति मृदुलकं पादीन दर्शयति किमिति भयव
त्कृतकत्वं संभवति यथा विद्याधनार्थिनां कृतकारतिमादर्शयति उच्यते भये हि प्रदर्शिते गुरौ विनीतत्वं ज्ञानातिमृदुचेष्टितेन यात्याधमप्रकृतिमेनं
न गणयति कृतकरत्वादेश्चोपदिष्टान्न कश्चित्पुरुषार्थसिद्धिः यत्र तु गजान्तः परानुग्रहाय क्रोधविस्मयादि दर्शयति तत्र व्यभिचारिणि तेषां
तस्थापयितेति ॥ ५२ ॥ बीभत्समाह ॥ अहृद्यदर्शनादिविभावाद्संकोचाद्यनुभावापस्मारादिव्यभिचारिणी जुगुप्सा बीभत्सः ॥ अहृद्यानामुद्वान्त
णपूतिकृमिकीटादीनां दर्शनश्रवणादिविभावा अंगसंकोचहृल्लासनासामुखविकूणनाच्छादननिष्ठीवनाद्यनुभावा अपस्मारोग्रमोहमदा
दिव्यभिचारिणी जुगुप्सा स्थायिभावरूपा चर्वणीयतां गता बीभत्सः ॥ यथा ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठ
पिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ॥ आत्तस्नायुं त्रनेत्रात्प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ अ
द्भुतमाह ॥ ५४ ॥ दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः ॥ दिव्यदर्शनेप्सितमनोरथावाप्तिउपवनदेवकुलादि
गमनसभाविमानमायेन्द्रजालादिशायिशिल्पकर्मादिविभावो नयनविस्तारानिमिषप्रेक्षणरोमांचाश्रुस्वेदसाधुवाददानहाहाकारचेलांगुलि
भ्रमणाद्यनुभावो हर्षावेगजडतादिव्यभिचारी चित्तविस्ताररूपो विस्मयः स्थायिभावश्चर्वणीयतां गतोऽद्भुतो रसः ॥ यथा कृष्णेनांबगतेन रंतुमधुनाम्
द्भक्षिता स्वेच्छया सत्यं कृष्ण क एवमाह मुसली मिथ्यांब पश्याननं ॥ व्यादेहीति विकासिते शिशुमुखे माता समग्रं जगद्दृष्ट्वा यस्य जगाम विस्मयपदं पायात्
स वः केशवः ॥ शांतमाह ॥ ५५ ॥ वैराग्यादिविभावो यमाद्यनुभावो धृत्यादिव्यभिचारी शमः शांतः ॥ वैराग्यं संसारभीरुता तत्त्वज्ञानं वीतरागपरिशील
न परमेश्वरानुग्रहादिविभावो यमनियमाध्यात्मशास्त्रचिंतनाद्यनुभावो धृतिस्मृतिनिर्वेदमत्यादिव्यभिचारी तृष्णाक्षयरूपः शमः स्थायिभावश्चर्व
णां प्राप्तः शांतो रसः ॥ यथा ॥ गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ॥ किं तैर्भाव्यं मम सुदिवसैर्येषु
ते निर्विशंकाः कंडूयंते जरठहरिणाः शृंगकंडूं विनेतुं ॥ न चास्य विषयजुगुप्सारूपत्वाद्बीभत्सेऽन्तर्भावोपि युक्तः ॥ जुगुप्सा त्वस्य व्यभिचारिणी भवति ॥

BHAU DAJI MEMORIAL

ननु स्थायितामेति ॥ पर्यंतनिर्वाहे तस्यामूलत एवोच्छेदात् ॥ न च धर्मवीरे तस्याभिमानमयत्वेन व्यवस्थानात् भस्य चाहंकारप्रशमैकरूपत्वात् ॥ तथा
पि तयोरेकत्वपरिकल्पने वीररौद्रयोरपि तथा प्रसंगः ॥ धर्मवीरादीनां चित्तवृत्तिविशेषाणां सर्वाकारमहंकाररहितत्वे शांतरसप्रभेदत्वमितर
था तु वीररसप्रभेदत्वमिति व्यवस्थाप्यमानेन कश्चिद्विरोधः ॥ तदेवं परस्परविविक्ता नवापि रसाः एषां क्रमेण स्थायिभावान् संगृह्णाति ॥ ५६ ॥ रति
हासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमाः स्थायिनो भावाः ॥ भावयंति चित्तवृत्तय एवालौकिकवाचिकाद्यभिनयप्रक्रियारूढतया स्वात्मानं
लौकिकदशायामनास्वाद्यमप्यास्वाद्यं कुर्वंति ॥ यद्वा भावयंति व्याप्नुवंति सामाजिकानां मनः इति भावाः स्थायिनो व्यभिचारिणश्च ॥ तत्र स्थायित्वमे
तावतामेव जातमेव जात एव हि जंतुरियतीभिः संविद्भिः परीतो भवति तथा हि दुःखविद्वेषी सुखास्वादलालसः सर्वो रिरंसया व्याप्तः स्वात्मन्युत्क
र्षमानितया परमुपहसति ॥ उत्कर्षापायशंकया शोचति ॥ अपायं प्रति क्रुध्यति ॥ अपायहेतुपरिहारे समुत्सहते ॥ विनिपाताद्बिभेति ॥ किंचिदयुक्ततया
भिमन्यमानो जुगुप्सते ॥ तत्तत्स्वपरकर्तव्यवैचित्र्यदर्शनाद्विस्मयते ॥ किंचिज्जिहासुः स तत्र वैराग्यात्प्रशमं भजते ॥ न ह्येतच्चित्तवृत्तिवासनाशून्यः प्रा
णी भवति केवलं कस्यचित्काचिदधिका चित्तवृत्तिः काचिदूना कस्यचिदुचितविषयनियंत्रिता कस्यचिदन्यथा ॥ तत्काचिदेव पुरुषार्थोपयोगिनी
त्वपदेश्या ॥ तद्विभागकृतश्चोत्तमप्रकृत्यादिव्यवहारः ॥ ये पुनरमी धृत्यादयश्चित्तवृत्तिविशेषास्ते समुचितविभावाभावात् जन्मनमध्ये न भवंत्येवेति व्यभि
चारिणः ॥ तथा हि ॥ रसायनमुपयुक्तवतो ग्लान्यालस्यश्रमप्रभृतयो न भवंत्येव ॥ यस्यापि वा भवंति विभाववलात्तस्यापि हेतुप्रक्षयेऽक्षीयमाणाः संस्कारशे
षतां नावश्यमनुबध्नंति ॥ उत्साहादयस्तु संपादितस्वकर्तव्यतया प्रलीनकल्पा अपि संस्कारशेषतां नातिवर्तंते ॥ वस्त्वंतरविषयस्योत्साहादेरखंडनात् ॥ यदाह प
तंजलिः ॥ नहि चैत्र एकस्यां स्त्रियां रक्त इत्यन्यासु विरक्त इत्यादि ॥ तस्मात्स्थायिरूपचित्तवृत्तिसूत्रस्यूता एवामी स्वात्मानमुद्भवालयवैचित्र्यशतसहस्र
धर्माणः प्रतिलभमानाः स्थायिनं विचित्रयंतः प्रतिभासंत इति व्यभिचारिण उच्यंते ॥ तथा हि ॥ ग्लानोयमित्युक्ते कुत इति हेतुप्रश्नेनास्थायितास्य व्यंते
न तु राम उत्साहशक्तिमानित्यत्र हेतुप्रश्नमाहुः ॥ अत एव विभावकास्तत्रोद्बोधकाः संतः स्वरूपोपरंजकत्वं निदधाना रत्युत्साहादेरुचितानुचित

स्वभावमात्रहंति॥ ननुतद्भावितेसर्वथैवनिरुपाख्याः॥ वासनात्मनागर्वजंतूनांतन्मयत्वेनोक्तत्वात्॥ व्यभिचारिणांतुस्वविभावाभावेनापिनास्तीति॥ नचपर
१३ स्परास्थावधाभिकारतिःचेतसोविकासोहासः॥ वैधुर्यंशोकः॥ तैक्ष्ण्यःप्रबोधःक्रोधः॥ संरंभःऐच्छयानुत्साहःचेतस्थ्यंभयं॥ संकोचोजुगुप्सा॥ विस्तारोविस्म
यः॥ तद्व्यापारस्यशमः॥ रसलक्षणएवचस्थायिस्वरूपेणनिरूपितेपुनर्निर्देशः॥ कर्निर्देषाव्यभिचारित्वख्यापनार्थः॥ तथाहिविभावभूयिष्ठत्वेनएषां
स्थायित्वमत्रविभावत्वेनुव्यभिचारित्वं॥ यथारावणादावन्योन्यानुरागाभावाद्रतिर्व्यभिचारिणीतथागुरौप्रियतमपरिजनेच॥ यथायोगंवीरशृंगारादौ
चरोषोव्यभिचार्येव॥ एवंभावांतरेषुवाच्यं॥ शमस्यतुयद्यपिक्वचित्प्राधान्यंतथापितव्यभिचारित्वंसर्वत्रप्रकृतित्वेनस्थापितमतात्॥ व्यभिचारिणावृते
॥५२॥ धृतिस्मृतिमतिव्रीडाजाड्यविषादमदव्याधिनिद्रासुप्तोत्सुक्यावहित्थशंकाचापलालस्यहर्षगर्वौग्र्यप्रबोधग्लानिदैन्यश्रमोन्मादमोहचिं
तामर्षत्रासापस्मारनिर्वेदावेगवितर्कौत्सुक्यामृतयः॥ स्थित्युदयप्रशमसंधिशबलत्वधर्माणस्त्रयस्त्रिंशद्व्यभिचारिणः॥ तत्रधृतिःसंतोषः॥ स्मृतिःस्मरणं
मतिरर्थनिश्चयः॥ व्रीडाचित्तसंकोचः॥ जाड्यमर्थाप्रतिपत्तिः॥ विषादात्मग्लानिः॥ पीडामदआनंदसंमोहसंभेदः॥ व्याधिर्मनस्तापः॥ निद्रामनःसंमीलनं॥ सुप्तं
निद्रायागाढावस्थात्सुकत्वंकालाक्षमत्वं॥ अवहित्थमाकारगुप्तिः॥ शंकानिष्टोत्प्रेक्षाचापलंचेतोऽनवस्थानं॥ आलस्यंपुरुषार्थेष्वनादरः॥ हर्षश्चेतः
प्रसादः॥ गर्वःपरावज्ञा॥ औग्र्यंचंडत्वं॥ प्रबोधोविनिद्रत्वं॥ ग्लानिर्बलापचयः॥ दैन्यमनोजस्यं॥ श्रमःखेदः॥ उन्मादश्चित्तस्याविप्लवः॥ मोहोमूढत्वं॥ चिंताध्या
नं॥ अमर्षःप्रतिचिकीर्षा॥ त्रासश्चित्तचमत्कारः॥ अपस्मारआवेशः॥ निर्वेदःस्वावमाननं॥ आवेगःसंभावना॥ अस्तयाऽक्षमा॥ मृतिर्म्रियमाणता॥ एते
चस्थित्युदयप्रशमसंधिशबलत्वधर्माणः॥ स्थितिर्यथा॥ तिष्ठेत्कोपवशात्प्रभावपिहितादीर्घंनसाकुप्यतिस्वर्गायोत्पतिताभवेन्मयिपुनर्भावार्द्र
मस्यामनः॥ तांहर्तुंविबुधद्विषोपिनचमेशक्ताःपुरोवर्तिनींसाचात्यंतमगोचरंनयनयोर्यातेतिकोयंविधिः॥ अत्रविप्रलंभरससद्भावेपिहर्षितवितर्क
स्थितिचमत्कारकृतआस्वादातिशयः॥ उदयोयथा॥ यातेगोत्रविपर्ययेश्रुतिपथंशय्यामनुमनुप्राप्तयानिध्यातंपरिवर्तनंपुनरपिप्रारब्धुमंगी १३
कृतं॥ भूयस्तत्प्रकृतंकृतंचशिथिलक्षिप्तैकदोर्लेखयातन्वंग्यानतुपारितस्तनभरोन्नेतुंप्रियस्योरसः॥ अत्रमानस्योदयः॥ प्रशमोयथा॥ दृष्टेलोचनवन्मानां

ङ्मुकुलितंपार्श्वस्थितेवक्त्रंन्यग्भूतंबहिरासितंपुलकवत्स्पर्शेसमातन्वति॥ नावीबंधवशागतंशिथिलतांसंभाषमाणेततोमानेनापहृतं येवसुदृशः
पादस्पृशिप्रियसि॥ अभिमानस्यप्रशमः॥ संधिर्यथा॥ उत्सिक्तस्यतपःपराक्रमनिधेरायागमादेवतःसत्संगप्रियताचवीररभसोत्फालश्चमांकर्षतः
वैदेहीपरिरंभएषचमुहुश्चैतन्यमामीलयन्नानंदीहरिचंदनेंदुशिशिरःस्निग्धोरुणद्धन्यतः॥ अत्रावेगहर्षयोःसंधिः॥ शबलत्वंयथा॥ क्वाकार्यंशशल
क्ष्मणःक्वचकुलंभूयोपिदृश्येतसादोषाणांप्रशमायमेश्रुतमहोकोपेपिकांतंमुखं॥ किंवक्ष्यंत्यपकल्मषाःकृतधियःस्वप्नेपिसादुर्लभाचेतःस्वास्थ्यमुपैहि
कःखलुयुवाधन्योधरंधास्यति॥ अत्रवितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानांशबलत्वं॥ विविधमाभिमुख्येनस्थायिधर्मोपजीवनेनस्वधर्मा
र्पणेनचचरंतीतिव्यभिचारिणः॥ भावाइत्यनुवर्तते॥ संख्यावचनंनियमार्थं॥ तेनान्येषामत्रैवांतर्भावस्तद्यथा॥ दंभस्यावहित्थे॥ उद्वेगस्यनिर्वेदे॥ क्षुत्तृष्णा
देर्ग्लानौ॥ एवमन्यदप्यूह्यं॥ अन्येत्वाहुः॥ एतावत्स्वेवसहचारिषुश्रवणविशेषेषुप्रयोगेप्रदर्शितेषुस्थायीचर्वणायोग्योभवति॥ एषांविभावानुभा
वानाह॥ ५३॥ ज्ञानादेर्धृतिरव्यग्रभोगकृत्॥ ज्ञानबाहुश्रुत्यगुरुभक्तितपःसेवाक्रीडार्थलाभादिविभावाधृतिःसंतोषः॥ साचलब्धानामुपभो
गेननष्टानामननुशोचनेनयोऽव्यग्रोभोगस्तंकरोतीतितेनानुभावेनधृतिवर्णयेदित्यर्थः॥ यथा॥ वयमिहपरितुष्टावल्कलैस्त्वंचलक्ष्म्यासमइहपरितो
षोनिर्विशेषाविशेषाः॥ सतुभवतुदरिद्रोयस्यतृष्णाविशालामनसिचपरितुष्टेकोर्थवान्कोदरिद्रः॥ ५४॥ सदृशदर्शनादेःस्मृतिर्भ्रूक्षेपादिकृत्॥ सदृ
शदर्शनस्पर्शनश्रवणाभ्यासपरिधानादयःसुखदुःखहेतूनांस्मरणंस्मृतिः॥ तांभ्रूक्षेपशिरःकंपमुखोन्नमनःशून्यावलोकनांगुलीभंगादिभिर्वर्णये
त्॥ यथा॥ मैनाकःकिमयंरुणद्धिगमनेमन्मार्गमव्याहतंशक्तिस्तस्यकुतःसवज्रपतनाद्भीतोमहेंद्रादपि॥ तार्क्ष्यःसोपिसमंनिजेनविभुनातिमांरावणंआ
ज्ञातंसजटायुरेषजरसाक्लिष्टोरसंवांछति॥ ५५॥ शास्त्रचिंतितादेर्मतिः॥ शिष्योपदेशादिकृत्॥ शास्त्रचिंतनोहापोहादिभ्योऽर्थनिश्चयोमतिस्तांशि
ष्योपदेशार्थविकल्पनसंशयच्छेदादिभिर्वर्णयेत्॥ यथा॥ असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्यामभिलाषिमेमनः॥ सतांहिसंदेहपदेषुप्रमाणमं
तःकरणप्रवृत्तयः॥ ५६॥ अकार्यकरणज्ञानादेर्व्रीडावैवर्ण्यादिकृत्॥ अकार्यचरणज्ञानगुरुव्यतिक्रमप्रतिज्ञाभंगादिभ्यश्चेतःसंकोचोव्रीडातांवैवर्ण्य

धोमुखविचिंतनाद्भूविलेखनवल्यांगुलीयकस्पर्शननखनिस्तोदनादिवर्णयेत ॥ यथा ॥ दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ॥ वीक्ष्य
१४ बिंबमनुबिंबमात्मनः कानि कानि न चकार लज्जया ॥ ५ ॥ दृष्टानिष्टदर्शनादेर्जाड्यं तूष्णींभावादिकृत् ॥ दृष्टानिष्टदर्शनश्रवणव्याध्यादिभ्योऽप्र
तिपत्तिर्जाड्यं तत्तूष्णींभावानिमिषनयननिरीक्षणादिभिर्वर्णयेत ॥ यथा ॥ एवमालि निगृहीतसाध्वसं शंकरो रहसि सेव्यतामिति ॥ सा सखीभि
रुपदिष्टमाकुला नास्मरत्प्रमुखवर्तिनि प्रिये ॥ ५ ॥ कार्यभंगाद्विषादः सहायान्वेषणमुखशोषादिकृत् ॥ उपायाभावनाशाभ्यां प्रारब्धस्य कार्य
स्य भंगान्मनःपीडा विषादस्तं सहायान्वेषणोपायचिंतनोत्साहविघातवैमनस्यादिना उत्तममध्यमानां मुखशोषजिह्वामलकलेहननिद्राश्वसित
ध्यानादिभिरधमानां वर्णयेत् ॥ यथा ॥ व्यर्थं यत्र कपींद्रसख्यमपि मे क्लेशः कपीनां वृथा प्रज्ञा जांबवतो न यत्र न गतिः पुत्रस्य वायोरपि मार्गं य
त्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः ॥ सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिया क्वापि मे ॥ ५ ॥ मद्योपयोगान्मदः स्वापहास्यास्मरणादिकृत् ॥
मद्यपानादानंदसंमोहयोः संगमो मदस्तं स्वापस्मितगानकिंचिदाकुलबाष्पस्खलद्गतिमंजुभाषणरोमांचादिभिरुत्तमानां हास्यगतस्रस्ता
कुलभुजक्षेपव्याविद्धकुटिलगत्यादिभिर्मध्यमानामस्मरणघूर्णनस्खलद्गमनरुदितच्छर्दितमत्रकंठनिष्ठीवनादिभिरधमानां वर्णयेत्
तथा च उत्तमाधममध्येषु वर्ण्यते प्रथमो मदः ॥ द्वितीयो मध्यनीचेषु नीचेष्वेव तृतीयकः ॥ यथा ॥ सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यव
सनाभरणेषु ॥ गंतुमुद्यतमकारणतः स्म द्योतयंति मदविभ्रममासां ॥ विरहादेर्मनस्तापो व्याधिर्मुखशोषादिकृत् ॥ विरहाभिलाषादिभ्यो मनः
स्तापो व्याधिहेतुत्वाद्व्याधिः ॥ तं मुखशोषस्रस्तांगतागात्रविक्षेपादिभिर्वर्णयेत् ॥ यथा ॥ मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्धूमं
ज्वलति विधुतः पावक इव ॥ हिनस्ति प्रत्यंगं ज्वर इव गरीयानित इतो न मां त्रातुं तातः प्रभवति न चांबा न भवती ॥ ५ ॥ क्लमादेर्निद्रा जृंभादिकृत् ॥ क्लम
श्रममदालस्यचिंताऽत्याहारस्वभावादिभ्यो मनःसंमीलनं निद्रा ॥ तां जृंभावदनगौरवशिरोलोलननेत्रघूर्णनगात्रमर्दोच्छ्वसितनिःश्वसितसन्न १४
गात्रताक्षिनिमीलनादिभिर्वर्णयेत् यथा ॥ निद्रानिमीलितदृशो मदमंथराणि नाप्यर्थवंति न च यानि निरर्थकानि ॥ अद्यापि मे मृगदृशो मधुराणि न

स्तान्यक्षराणि हृदये किमपि ध्वनंति ॥ ५ ॥ निद्रोद्भवं स्वप्नमुत्स्वप्नायितादिकृत् ॥ निद्रोद्भवमित्यनेन निद्राया एव जागरावस्थायामित्याहुः ॥ तदुत्स्वप्नायितोच्छ्वसितनिः
श्वसितसंमोहादिना वर्णयेत् ॥ यथा ॥ एते लक्ष्मण जानकीविरहितं मां खेदयंत्यंबुदा मर्माणीव च घट्टयंत्यलममी क्रूराः कदंबानिलाः ॥ इत्थं व्याहृतपूर्वजन्मचरितो यो
राधया वीक्षितः सेर्ष्यं शंकितया मया स भवतः स्कंधस्तु सुप्तायमानो हरिः ॥ ५ ॥ इष्टानुस्मरणादेरौत्सुक्यं त्वरादिकृत् ॥ इष्टानुस्मरणदर्शनादेर्विलंबासहत्वमौत्सुक्यं
तत्त्वरानिःश्वसितोच्छ्वसितकार्श्यमनःशून्यतादिगवलोकनरणरणकादिभिर्वर्णयेत् ॥ यथा ॥ आलोकमार्गं सहसा व्रजंत्या कयाचिदुद्वेष्टनवांतमाल्यः ॥ बंधुं न संभा
वित एव तावत्करेण रुद्धोऽपि हि केशपाशः ॥ ५ ॥ लज्जादेरवहित्थमन्यथाकथनादिकृत् ॥ लज्जाजैह्म्यभयगौरवादिभ्यो भ्रूविकारमुखरागादीनामा[illegible]र्दनकारिणि
चित्तरमित्यवहित्थम् अवहित्थावानबहिःस्थं चित्तं यस्येति पृषोदरादित्वात् ॥ तदन्यथाकथनावलोकितथाभंगलतकधैर्यादिभिर्वर्णयेत ॥ यथा ॥ एवं वादि
नि देवर्षौ पार्श्वे पितुरधोमुखी ॥ लीलाकमलपत्राणि गणयामास पार्वती ॥ ५ ॥ वीर्यादेः स्वपरयोः शंका पार्श्वविलोकनादिकृत् ॥ वीर्यपरदार्ष्यादर्थिदुराचर
णादनिष्टोत्प्रेक्षा शंका ॥ सा च कदाचित्स्वस्मिन्यदा समापराधयोरात्मपरयोः परोत्सादं स्यात् ॥ कदाचित्परस्मिन्यदाविज्ञाकुलतया कलदोषत्वं परः संभा
व्यते ॥ सा च पार्श्वविलोकनमुखशोषकंठशोषणगात्रप्रकंपस्वरास्यवर्णभेदावगुंठनादिभिर्वर्ण्यते स्वस्मिन्यथा ॥ दूरादर्थितयोधरणीधराभ यस्ताडके यं तणव
द्यधूनोत ॥ हंता स बाहोरपि ताटकारिः राजपुत्रो हृदि बाधते मां ॥ परस्मिन्यथा ॥ समुद्रदत्तस्य नंदयंत्यागमन्यानुरागशंका दुर्योधनस्य भानुमत्याम् ॥ ५ ॥ रागादे
श्चापलं वाक्पारुष्यादिकृत् ॥ रागद्वेषमात्सर्यामर्षेर्ष्यादिभ्यश्चैतन्यस्थानं चापलमविमृश्यकार्यकारणमितियावत् ॥ तद्वाक्पारुष्यनिर्भर्त्सनप्रहारवधबंधादि
भिर्वर्णयेत् ॥ यथा ॥ ५. ॥ कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं ॥ रजोभिरंतः परिवेषबंधि लीलारविंदं भ्रमयांचकार ॥ श्रमादेरालस्यं निद्रादि
कृत् ॥ ~~रागद्वेषमात्सर्यामर्षेर्ष्यादिभ्यश्चैतन्यस्थानं चापलमविमृश्यकार्यकारणमितियावत्~~ श्रमसौहित्यरोगगर्भस्वभावादिभ्यः पुरुषार्थेष्वनादर आलस्यं
तज्जृंभानिद्रातंद्रासर्वकर्मविद्वेषशयनासनादिना वर्णयेत् ॥ यथा ॥ चलति कथंचित्पृष्टा यच्छति वाचं कदाचिदालीनां ॥ आसितुमेव हि मनुते गुरुगर्भभरालसा सुत
नुः ॥ ५ ॥ प्रियागमादेर्हर्षो रोमांचादिकृत् ॥ प्रियागमनबंधुहर्षदेवगुरुराजभर्तृप्रसादभोजनाच्छादनधनलाभोपभोगमनोरथावाप्त्यादिभ्यश्चेतःप्रसादो हर्षः

नं च रोमांचाश्रुस्वेदनयनवदनप्रसादप्रियभाषणादिभिर्वर्ण्यते ॥ यथा ॥ आयाते दयिते मरुस्थलभुवामुत्प्रेक्ष्य दुर्लंघ्यतां गेहिन्या परितोषबाष्पतरलामासज्य दृ
१५ ष्टिं मुखे ॥ दत्वा पीलुशमीकरीरकवलान्स्वेनांचलेनादरादुन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥ ७॥ विद्यादिर्गर्वोऽवज्ञादिकृत ॥ ७॥ विद्याबलकुलैश्वर्य
यौवनरूपधनादिभ्यः परावज्ञा गर्वः ॥ स च स्तंभामर्षपारुष्यापहासगुरुलंघनाधिक्षेपनेत्रगात्रविक्षेपप्रत्युत्तरदानशून्यावलोकनाभाषणैर्वर्ण्यते ॥ यथा ॥ आम्र
जानाति क्रमयागोभवतामेवभूतं य आमदस्पत्सभामिचमस्यथादुर्मनायते ॥ ७॥ चौर्यादिरौग्र्यं वधादिकृत ॥ चौर्यद्रोहापराधप्रलापादिभ्यश्चंडत्वमौग्र्यं तद्व
धबंधनाडननिर्भर्त्सनादिभिर्वर्ण्यते ॥ यथा ॥ उत्कृत्योत्कृत्य गर्भानपि शकलयतः क्षत्रसंतानरोषादुद्दामस्यैकविंशत्यवधि विशसतः सर्वतो राजवंश्यान् पित्र्यं
तद्रक्तपूर्णह्रदसवनमहानंदमंदायमानक्रोधाग्नेः कुर्वतो मे न खलु न विदितः सर्वभूतैः स्वभावः ॥ ७॥ शब्दादिः प्रबोधो जृंभादिकृत ॥ शब्दस्पर्शस्वप्न
स्वप्नजल्मननिद्राच्छेदाहारपरिणामादिभ्यो विनिद्रत्वं प्रबोधः ॥ स च जृंभणाक्षिमर्दनभुजक्षेपांगुलिस्फोटनशय्यात्यागशीर्षांगवलनादिभिर्वर्ण्यते ॥ यथा ॥ प्रत्यग्रो
न्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणामात्मव्यापारगुर्वी जनितजललवा जृंभितैः सांगभंगैः ॥ नागांकं मोक्तुमिच्छोः शयनमुरु फणाचक्रवालोपधानं
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥ ७॥ व्याध्यादिर्ग्लानिर्वैवर्ण्यादिकृत ॥ व्याधिमनस्तापनिधुवनोपवासादर्शनपिपासाप्रबंधनिद्राच्छेदानिपानतर्षगात्र
गात्रकार्श्यवासादिभ्यो बलापचयो ग्लानिः सा च वैवर्ण्यशाभनेत्रकंपोत्साहक्षयांगन्यासवचनदीनसंचारमंदोत्साहादिभिर्वर्ण्यते ॥ यथा ॥ किसलयमिव मुग्धं बंधनाद्वि
प्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः ॥ ग्लपयति परिपांडु क्षाममस्याः शरीरं शरदिज इव घर्मः केतकीगर्भपत्रं ॥ ७॥ दौर्गत्यादिर्दैन्यं मलादिकृत ॥ दौ
र्गत्यमनस्तापादिभ्योऽनौजस्यं दैन्यं ॥ तच्च शाल्यागर्ववंगताशिरःप्रावरणादिभिर्वर्ण्यते ॥ यथा ॥ अस्मान्साधु विचिंत्य संयमधनानुच्चैः कुलं चात्मनस्त्वय्य
स्याः कथमप्यबांधवकृतां स्नेहप्रवृत्तिं च तां ॥ सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबंधुभिः ॥ ७॥ व्यायामाध्व
गत्यादिभ्यो मनःशरीरखेदः श्रमः सोऽगसंगमदर्दनमास्यविकूणनादिभिर्वर्ण्यते ॥ यथा ॥ अलसलुलितमुग्धान्यध्वसंजातखेदाच्छिथिलपरिरंभैर्दत्तसंवा १५
हनानि ॥ मृदुमृदितमृणालीदुर्बलान्यंगकानि त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ ७॥ इष्टवियोगादिरुन्मादो निमित्तस्मितादिकृत ॥ इष्टवियोगधननाशाभि

घातवातसन्निपातग्रहादिभ्यश्चित्तविप्लव उन्मादः स च निर्निमित्तस्मितरुदितोत्क्रुष्टगीतप्रधावितोपवेशनोत्थानासंबद्धप्रलापभस्मपांसुमृद्दूरनिर्माल्यचीरघट
कपालशरावाभरणादिभिर्वर्ण्यते ॥ यथा ॥ हंस प्रयच्छ मे कांतां गतिरस्यास्त्वया हृता ॥ संभावितैकदेशेन देयं यदभियुज्यते ॥ ७॥ प्रहारादिर्मोहो भ्रमणादिकृत
प्रहारमलसर्पदैवोपघातपूर्ववैरस्मरणत्रासनादिभ्यः चित्तस्य मूढत्वं मोहः मोहस्य प्रागवस्थापि मोहशब्देनोच्यते ॥ तं भ्रमणं देहघूर्णनपतनसर्वेन्द्रियभ्रमो
हं वैचित्र्यादिभिर्वर्ण्यते ॥ यथा ॥ तीव्राभिषंगप्रभवेण वृत्तिं मोहेन संस्तंभयतेंद्रियाणां अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव स करणव्यापि मोहो भव
ति ॥ यथा ॥ कांते तल्पमुपागते विगलिता नीवी स्वयं बंधनाद्वासः श्लथमेखलागुणधृतं किंचिन्नितंबे स्थितं ॥ एतावत्सखि वेद्मि सांप्रतमहं तस्यांगसंगे पुनः को
सौ कास्मि रतं नु किं कथमिति स्वल्पापि मे न स्मृतिः ॥ ७॥ दारिद्र्यादिश्चिंता संतापादिकृत ॥ दारिद्र्येष्टद्रव्यापहारैश्वर्यभ्रंशादिभ्यो ध्यानं चिंता ॥ सा च स्मृतेरन्या
यसनादवलंबनविलंबनाद्गमनवत् ॥ तां संतापशून्यचित्तत्वकार्श्यश्वासाधोमुखचिंतनादिभिर्वर्ण्यते ॥ सा च वितर्कात्संतोऽवा वितर्क इति वितर्कात्पृथ
ग्भवति ॥ चिंता यथा ॥ पश्यामि तामित इतश्च पुरश्च पश्चादंतर्बहिः परित एव विवर्तमानां ॥ उद्बुद्धमुग्धकनकाब्जनिभं वहंतीमासज्य तिर्यगपवर्तितदृष्टिवक्त्रं
॥ ७॥ आक्षेपादिरमर्षः स्वेदादिकृत ॥ विद्यैश्वर्यबलाधिकेनापि आक्षेपावमानादिभ्यः प्रतिचिकीर्षारूपोऽमर्षः ॥ स च स्वेदध्यानोपायान्वेषणशिरःकंपाधो
मुखविचिंतनादिभिर्वर्ण्यते ॥ यथा ॥ लाक्षागृहानलविषान्नसभाप्रवेशैः प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ॥ आकृष्टपांडववधूपरिधानकेशाः स्वस्था भवंति
मयि जीवति धार्तराष्ट्राः ॥ ७॥ निर्घातादिस्त्रासो गात्रसंक्षेपादिकृत ॥ निर्घातगर्जितभूपर्वतकंपविद्युदुल्कापातनिविडध्वांतरक्षःस्थूलपशुकुत्सादिभ्यश्चेतश्चमत्कृति
स्त्रासः स्यात्सोऽपि भयात्पूर्वापरविचारवर्तिभिन्न एव ॥ सोऽगसंक्षेपस्तंभरोमोद्गमगद्गदप्रलयवेपथुकंपनिष्पंदवीक्षितैर्वर्ण्यः ॥ यथा ॥ परिस्फुरन्मीनविघट्टितोरवः सुरांग
नास्त्राससविलोलदृष्टयः ॥ उपाययुः कंपितपाणिपल्लवाः सखीजनस्यापि विलोकनीयतां ॥ ७॥ ग्रहादिरपस्मारः कंपादिकृत ॥ ग्रहाभूतादयक्षपिशाचब्रह्मराक्षसशून्या
रण्यश्मशानसेवनोच्छिष्टगमनधातुवैषम्यादेरावेशरूपोऽपस्मारः ॥ तं कंपितस्फुरितस्विन्नधावितश्वसितभूमिपतनारावमुखफेनादिभिर्वर्ण्यते ॥ अयं च प्रायशा
भासैर्वर्ण्यते ॥ यथा ॥ आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं ॥ फेनायमानं पतिमापगानामसावपस्मारिणमाशशंके ॥ ७॥ रोगादिर्निर्वेदो

रुदितादिकृत्॥ रोगाधिक्षेपताडनदारिद्र्येष्टवियोगावमाननतत्त्वज्ञानादिभ्यः स्वावमाननात्मा निर्वेदः॥ स च दीनश्चिन्तानुपरिदेवनादिभिर्वर्ण्यः॥ यथा॥ किंक
१६ रोमि क्व गच्छामि कमुपैमि दुरात्मना॥ दुर्गेऽरण्ये रणे हं प्राणैरपि विहीनितः॥ उत्पातादिभ्य आवेगो विस्मयादिकृत्॥ उत्पातवातवर्षाग्निगजप्रियाप्रियश्रवणाद्य
सनादिभ्यः संभ्रम आवेगः॥ स च विस्मयावगुण्ठनकवचधारणधूमान्धत्वगिलायसर्पणपुलकविलापगह्वरादिभिर्यथासंख्यं वर्णनीयः॥ तत्रोत्पातावेगो यथा
किंकिंसिंहस्ततः किं नरसदृशवपुर्देव चित्रं गृहीतो नानिर्विद्धकापि जीवो द्भुतमुपनिपतत्यत्र संप्राप्तिरावाधश्च्याद्धारुद्धं न जास्वीत्यागितगहहहाकर्कशात्वं नखाना
मित्थं दैत्याधिनाथो निजनखकुलिशैर्येन भिन्नः स पायात्॥ एवं वाताद्यावेगादिष्वप्युदाहार्यम्॥ ७॥ संदेहार्थे वितर्कः शिरःकम्पादिकृत्॥ संदेहविमर्शो विप्रति
पत्त्यादिभ्यः संभावनाप्रत्ययो वितर्कः॥ स च शिरःकम्पभ्रूक्षेपसंप्रधारणकार्यवत्ताप्रमुद्रोपहरणमोक्षणादिभिर्वर्ण्यः॥ यथा॥ अनङ्गः पञ्चभिः पौष्पैर्विश्वं व्य
जयतेषुभिः॥ इत्यसंभाव्यमथवा विचित्रा वस्तुशक्तयः॥ ७॥ परोत्कर्षादेरसूयाक्षमादिकृत्॥ परस्य सौभाग्यैश्वर्यविद्यादिभिरुत्कर्षादिज्ञाद्वादपराधमुद्दे
पादिभ्यश्चाक्षमारूपासूया॥ तामवज्ञाभ्रूकुटिक्रोधसेर्ष्याक्षिप्तालोकितदोषोपवर्णनादिभिर्वर्णयेत्॥ यथा॥ युद्धास्तेन विचारणीयचरितास्तिष्ठन्तु हुं वर्त्त
ते कं दस्योर्दमने य खंडयत्रास्तौ लोके महानो हतेयानिश्रेणिकुतो मुखान्यपि यदान्यासनखगयोधनयदाकौशलमिन्द्रस्तनुनिधनेन वाप्यभिज्ञो जनः॥ ७॥
व्याध्यभिघाताभ्यां निर्हिक्काकार्श्यादिकृत्॥ व्याधिर्ज्वरादिः प्रतीतः सर्पविषशस्त्रगजादिरभिघातस्ताभ्यां मनःशारीरतापो ग्लानिः॥ साध्यासाध्यतावन्तया
भावात्॥ तत्र व्याधिजां निर्हिक्काश्वासाङ्गभङ्गाक्षिनिमीलनाद्यैरभिघातजां तु कार्श्यवेपथुदाहहिक्काफेनाङ्गभङ्गजडतामरणादिभिर्वर्णयेत् यथा॥ गगन
क्षितिमुख्यशोणिताईरिपुदंष्ट्राग्रनिपातदारिताश्मा॥ असकृभिः क्षणमाश्लिनेन्द्रस्तनुर्वहितामर्षगुरुध्वनिर्निराशे॥ शृङ्गारे तु मरणाध्यवसायो मरणादूर्ध्व
सद्यः तिपुनर्योगाभावादिति बध्यते अन्यत्र तु स्वेच्छा यथा॥ संप्राप्तः बधिवासवेशनमयं तद्दुर्लभं वातायनं वारंवारमुपेत्य निष्क्रियतया निश्चित्य किंचिच्चिरं॥ संप्रत्ये
व निर्विद्य केलिकुरवाः सास्रं सखीभ्यः शिशोर्माधव्याः सहकारकेण करुणः पाणिग्रहो निर्मितः॥ तथा॥ तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोर्देहत्यागाद १६
मरगणनालेख्यमासाद्य सद्यः॥ पूर्वाकाराधिकतररुचा चतुरयासंगतः कान्तयासौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु॥ ७॥ अथ सात्त्विकानाह॥ सं

भस्वेदरोमाञ्चस्वरभेदकम्पवैवर्ण्याश्रुप्रलया अष्टौ सात्त्विकाः सीदन्त्यस्मिन्मन इति व्युत्पत्तेः॥ सत्त्वगुणोत्कर्षात्साधुत्वाच्च प्राणात्मकं वस्तु सत्त्वं तत्र भवाः सा
त्त्विकाः॥ भावा इति वर्तते॥ तेन प्राणभूमिप्रसृतरत्यादिसंवेदनवत्त्वेऽयोऽवात्यजडरूपभौतिकनेत्रजलादिविलक्षणा विभावेन रत्यादिगतेनैवातिचर्वणा
गोचरेणाहृता अनुभावैश्च गम्यमाना भावा भवन्ति॥ तथा हि पृथ्वीभागप्रधाने प्राणे संक्रान्तश्चित्तवृत्तिगणः स्तम्भो विष्टब्धचेतनत्वं॥ जलभागप्रधाने तु बाष्पः
तेजसस्तु प्राणेनैकधा तु भयथा॥ तीव्रातीव्रत्वेन प्राणानुग्रहद्विविधा स्वेदो वैवर्ण्यं च॥ तद्धेतुत्वाच्च तथा व्यवहारः॥ आकाशानुग्रहे गतचेतनत्वं प्रलयः॥
वायुस्वातन्त्र्ये तु तस्य मन्दमध्योत्कर्षात् त्रैविध्यात् त्रिधा रोमाञ्चवेपथुस्वरभेदभावेन स्थितिरिति भरतविदः॥ वाह्यास्तु स्तम्भादयः शारीरधर्मा अनुभावास्तेषां
न गालिकान् सात्त्विकान् भावानगमयन्तः परमार्थतो रतिनिर्वेदादिगमका इति स्थितं॥ एवं च नव स्थायिनस्त्रयस्त्रिंशद्व्यभिचारिणोऽष्टौ सात्त्वि
का इति पञ्चाशद्भावाः॥ ५०॥ रसभावानभिधाय तदाभासानाह॥ ७॥ निरिन्द्रियेषु तिर्यगादिषु चारोपाद्रसभावाभासौ॥ निरिन्द्रियेषु संभोगारोप
णात्संभोगाभासो यथा॥ पर्याप्तपुष्पस्तबकस्तनीभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः॥ लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि॥ विप्रलम्भा
रोपणाद्विप्रलम्भाभासो यथा॥ वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः॥ सौभाग्यं ते सुभग विरहावस्थ
या व्यञ्जयन्ती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥ भावाभासो यथा॥ गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपंक्तयः॥ अचलाधित्यकोत्संगमिमाः
समधिशेरते॥ तिरश्चां संभोगाभासो यथा॥ मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः॥ शृङ्गेण संस्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्ण
सारः॥ यथा च॥ ददौ सरःपङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः॥ अर्धोपभुक्तेन बिसेन जायां संभावयामास रथाङ्गनामा॥ विप्रलम्भाभासो यथा॥ आ
पृष्टासि व्यथयति मानादुर्बलावारसश्रीरेत्यालिंगक्षपयरजनामेकिकाचक्रवाकि॥ नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा दैवायत्तं तदिह भ
वतीमस्वतन्त्रस्त्यजामि॥ यथा वा॥ नान्तर्वर्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं नासन्नात्सरसः करोति कवलानावर्जितैः शैवलैः॥ दानाश्चादिनिषण्ण
मूकमधुपव्यासंगदीनाननो नूनं प्राणसमावियोगविधुरः स्तम्बेरमस्ताम्यति॥ भावाभासो यथा॥ त्वत्कटाक्षावलीलीलां विलोक्य सहसा प्रियो वनं

प्रयत्नयोषीदाजदर्शिमृगयनः ॥ आदिशब्दाल्लिज्ञाचंद्रमसोर्नायकत्वाध्यारोपात्तयोरागाभासोयथा ॥ अंगुलीभिरिवकेशसंचयंसंनिगृह्यतिमिरंम
रीचिभिः ॥ कुड्मलीकृतसरोजलोचनंचुंबतीवरजनीमुखंशशी ॥ भावाभासोयथा ॥ त्वदीयंमुखमालोक्यकृशाभाभानिशाकरः ॥ मन्येघनघटांतर्हि
समाश्रयतिसत्वरः ॥ रसाभासस्याभावाभासस्यचाभासोऽर्थांतरन्यासोऽश्लेषरूपकोपमासंस्थादयोऽपीवितंम् ॥ अनौचित्याच्च ॥ अन्योन्यानुरागाद्या
वेनानौचित्याद्रसाभावाभासौरसाभासोयथा ॥ दूराकर्षणमोहमंत्रइवमेतन्नाम्नियातेश्रुतिंचेतःकालकलामपिप्रसहतेनावस्थितिंतांविना ॥ एतैराकु
लितस्यविक्षततरैरंगैरनंगातुरैःसं—द्येतकथंतदाप्तिसुखमित्येतन्नवेद्मिस्फुटं ॥ अत्रसीतायारावणंप्रतिरत्यभावाद्रसाभासः ॥ यथावा ॥ स्तुमः
कंवामाक्षिक्षणमपिविनायन्नरमसेविलेभेकःप्राणानरणमखमुखेयंमृगयसे ॥ सुलग्नेकोजातःशशिमुखियमालिंगसिबलात्तपःश्रीःकस्यैषा
मदननगरिध्यायसितुयं ॥ अत्रानेककामुकविषयमभिलाषंतस्याःस्तुमइत्याद्यनुमतंबहुव्यापारोपादानंव्यनक्तिभावाभासोयथा ॥ निर्मालंनयनश्रि
यःकुवलयंवक्त्रस्यदासःशशीकांतिःप्रावरणानेनोमधुमुखोवस्त्राश्रवाचःकिल ॥ विभ्रान्त्यारचितांजलिःकरतलेस्त्वांयाचतेरावणस्ताद्दृष्टुंजनकात्म
जाहृदयंहेन्नाणिमिश्रीकुरु ॥ अत्रोत्कंठं ॥ काव्यस्यलक्षणमुक्त्वाभेदानाह ५० ॥ व्यंग्यस्यप्राधान्येकाव्यमुत्तमं ॥ वाच्यादर्थाद्व्यंग्यस्यचारुत्वेऽलंकाररसादि
रसस्यप्राधान्यंउत्तमंकाव्यं ॥ यथा ॥ वाल्मीकेःकिमुनोद्गतोगिरिरियंकस्यपृषद्दाशयंत्रैलोक्यंतपसाजितंयदिमदोदोष्णांकिमेनांनता ॥ सर्वसाध्वथवा
रुग्णामूर्तिविरहक्षामस्यरामस्यचेद्दृग्भांकितवालिकक्षरुधिरक्लिन्नाग्रपुंखंशरं ॥ अत्रदंतांकितपदेनतदवजयस्तत्कक्षपरिग्रहस्तथैवचतुर्णांवभ्रमणंपुनः
कृणमात्रेणत्यागस्तत्रप्रतीकारपुनरप्यभिमानदर्पइत्यादिव्यज्यते ॥ ५१ ॥ अस्फुटसंदिग्धतुल्यप्रधान्येमध्यमंत्रेधा ॥ असतिसंदिग्धेतुल्येचप्राधान्ये
व्यंग्यस्यमध्यमंकाव्यंतत्रास्फुटप्राधान्यंक्वचिद्दुरवगादनुत्कर्षेणयथा ॥ वाणीरकुडंगुड्डीणसउणिकोलाहलंसुणंतीए ॥ घरकम्मवावडाएबहूए
सीअंतिअंगाइं ॥ अत्रदत्तसंकेतःकश्चिल्लतागहनंप्रविष्टइतिव्यंग्यात्सीदंत्यंगानीतिवाच्यस्यैवसातिशयंचारुत्वंगतेयथा ॥ अयंसरसनो
त्कर्षीपीनस्तनविमर्दनः ॥ नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरः ॥ अत्रशृंगारंकरुणस्यांगंयथावजनंअनेनांतेकनकमृगतृष्णांधितधियावचो

वैदेहीतिप्रतिदिशमुदग्रप्रलपितंकृतालंकाभर्तुर्वदनपरिपाटीषुघटनामयाप्तंरामत्वंकुशलवसुतानत्वधिगता ॥ अत्रव्यंग्याउपमानोपमेयभा
वोरामत्वमितिवाच्यस्यांगतोनीतः ॥ यथावा ॥ भ्रमिमरतिमलसहृदयतांप्रलयंमूर्च्छांतमःशरीरसादम् ॥ मरणंचजलदभुजगजंप्रसह्यकुरुते
विषंवियोगिनीनां ॥ अत्रहालाहलंव्यं—ग्यंभुजगरूपणलक्षणस्यवाच्यस्यांगंक्वचिदस्फुटत्वेनयथा ॥ अहयंउज्जुअरूआतस्सविउम्मंथ
राईपेम्माइं ॥ सहिआअणोअनिउणोअलाहिकिंपायराएण ॥ अत्रसमांपुरुषायितेऽर्थयंतेहंचनिषेद्धुमशक्तातत्सख्यःपादमुद्दयालक्षयित्वा
मामाहसितेतिव्यंग्यमस्फुटंक्वचिदतिस्फुटत्वेनयथा ॥ श्रीपरिचयाज्जडाअपिभवंत्यभिज्ञाविदग्धचरितानां ॥ उपदिशतिकामिनीनांयौवनमदए
वललितानि ॥ अत्राप्रयासेनशिक्षादानलक्षणंवस्तुव्यंग्यमतिस्फुटत्वेनप्रतीयमानमसत्प्राधान्यमेव ॥ कामिनीकुचकलशवन्नगूढंचमत्क
रोतिनागूढं ॥ संदिग्धप्राधान्येयथा ॥ महिलामहस्साभरिएतुहहिअएसुहयसाअमायंती ॥ अणुदिणमणण्णकम्माअंगंतणुअंपितणुएइ
अत्रअंगंतणुअमपितनूकरोतीतिकिंवाच्यं ॥ कथांतंयसवप्रकर्षाधिरोहेणयावदस्याहृदयंनाश्रोतितावदुःखितांमेनांन्यसानुनीयतामिति
व्यंग्यंप्रधानमितिसंदिग्धं ॥ तुल्यप्राधान्येयथा ॥ ब्राह्मणातिक्रमेति ॥ अत्रजामदग्न्यःसर्वेषांक्षत्राणामिवरक्षसांक्षयंकरिष्यतीतिव्यंग्यस्यवा
चस्यवसमंप्राधान्यं ॥ यथावापंक्तौविशांतुगुणिताःप्रतिलोमवक्त्रापूर्वैभवेयुरियतापथवात्रपेरन् ॥ संतोप्यसंसदृतिवेत्तिभांतिभानोर्भासाद
तेनभगिसीतमयूरतमुख्याः ॥ अत्रगकरणिकाप्राकरणिकयोःसमप्राधान्यंयथावा ॥ मध्नामिकौरवशतंसमरेनकोपाद्दुःशासनस्यरुधिरंन
पिबाम्युरस्तः ॥ संचूर्णयामिगदयानसुयोधनोरूसंधिंकरोतुभवतांनृपतिःपणेन ॥ अत्रमथ्नामीत्यादिव्यंग्यंपावाल्यतुल्यभावेनस्थितं ॥ इतित्रयोमध्य
मकाव्यभेदानावक्ते ॥ ५२ ॥ अव्यंग्यमवरंशब्दार्थवैचित्र्यमात्रंव्यंग्याद्रहितमवरंकाव्यंयथा ॥ अथोघंनोत्सिंहिस्यघनाघनघनध्वनिःहताःधुरुधुरायोबकरी
र्घोषोरंघर्धरः ॥ यथावा ॥ तद्दृष्टिमात्रपतिताअपिकस्यनात्रक्षोभायपक्ष्मलदृशामलकाःखलाश्च ॥ नीचाःसदैवसविलासमलीकलग्नायेकाल
लतांकुटिलतामपिनत्यजंति ॥ यद्यपिसर्वत्रकाव्येक्वचिद्विभावादिरूपतयारसपर्यवसानंतथापिस्फुटस्यरसस्याभावात्सादव्यंग्यमंतत्काव्यमुक्तं ॥ ५३ ॥

[illegible] ॥ ७ ॥ अदो
१८ षाञ्शब्दार्थौ काव्यमित्युक्तं न च दोषाणां रसापकर्षहेतुत्वं सामान्यलक्षणमुक्तं विशेषलक्षणमाह ॥ ॥ रसादेः स्वशब्दोक्तिः क्वचित्संचारिवर्जनं दोषा ॥ रसस्थायिव्य
भिचारिणां स्वशब्देन वाच्यत्वं दोषः ॥ संचारिणस्तु क्वचित्स्वशब्दाभिधानेपि न दोषः ॥ तत्र रसस्य स्वशब्देन शृंगारादिना चाभिधानं यथा ॥ शृंगारो गिरिजा
नने सकरुणो रत्यां प्रवीरः स्मरे बीभत्सोस्थिकिरत्कणी चाभयकृन्मूर्त्याद्भुतस्तुंगया ॥ रौद्रो दक्षविमर्दने च हृदयस्थः प्रशांतः श्रियादित्थं सर्वरसात्मकः
कपर्दिभूतये स्थायिभावानां ॥ यथा संप्रहारे प्रहरणैः प्रहाराणां परस्परं ठणत्कारैः श्रुतिगतैरुत्साहस्तस्य कोप्यभूत् ॥ अत्रोत्साहस्य स्थायिनः ॥ यत्रापि
स्वशब्देन निवेदितत्वमस्ति तत्रापि विशिष्टाभावादिप्रतिपादकमुखेनैव रसादीनां प्रतीतिः ॥ स्वशब्देन सा केवलमनूद्यते ॥ यथा ॥ यातेद्वारवतीमित्यादि ॥ अ
त्र विभावानुभावबलादुत्कंठा प्रतीयत एव ॥ सोत्कंठशब्दात्सिद्धं साधयति ॥ उत्कमित्यनेनतूक्तानुभावानुकर्षणं कर्तुं सोत्कंठशब्दः प्रयुक्त इत्यनुवा
दोपि नानर्थकः ॥ व्यभिचारिणो यथा ॥ संव्रीडा दयितानने सकरुणा मातंगचर्मांबरे सत्रासा भुजगे सविस्मयरसा चंद्रामृतस्यंदिनि ॥ सेर्ष्या जन्हुसुता
वलोकनविधौ दीना कपालोदरे पार्वत्या नवसंगमप्रणयिनी दृष्टिः शिवायास्तु वः ॥ अत्र व्रीडादीनां ॥ क्वचित्संचारिवर्जमिति वचनात्क्वचिन्न दोषः ॥ यथा ॥
औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया तैस्तैर्बंधुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः ॥ दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे संरोहत्पुलका
हरेण हसता श्लिष्टा शिवायास्तु वः ॥ अत्रौत्सुक्यशब्द इव तदनुभावो न तथा प्रतीतिकृत ॥ अत एव दूरादुत्सुक्यादौ व्रीडाद्यनुभावानां विवलितत्वादीना
मिवौत्सुक्यानुभावस्य सहसा प्रसरणादिरूपस्य तथा प्रतिपत्तिकारित्वाभावादुत्सुकमिति कृतं ॥ ७ ॥ अबाध्यत्वे आश्रयैक्ये नैरंतर्ये नंगत्वे च विभा
वादिप्रातिकूल्यं ॥ अबाध्यत्वादिषु सत्सु विभावादिप्रातिकूल्यं रसादेर्दोषः ॥ यथा ॥ प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव
ते सिंचतु वचः ॥ निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभवति गतः कालहरिणः ॥ अत्र कालो हरिण इव चलः शीघ्रमेव प्रया १८
ति न पुनरागच्छतीत्यादिवैराग्यकथाभिः प्रियानुनयनं निर्विण्णस्येव कस्यचिदिति शृंगारप्रतिकूलरसशांतस्यानित्यताप्रकाशनरूपो विभावो निब

Dr BHAU DAJI

द्ध इति प्रातिकूल्यं तत्प्रकाशिनो निर्वेदस्य च तद्व्यभिचारिप्रातिकूल्योदाहरणमप्येतत् ॥ एवं शृंगारबीभत्सयोर्वीरभयानकयोः शांतरौद्रयो
रप्युदाहार्यं ॥ यथा च निहुयरमणंमि लोयणवहम्मि पडिए गुरूण मज्झम्मि ॥ सयलपरिहारहियया वणगमणं चेअ महइ वहू ॥ अत्र सकलपरिहारवन
गमने शांतानुभावौ इंधनाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेन्न दोषः ॥ अबाध्यत इति ॥ अबाध्यत्वमशक्याभिभवत्वं तदभावे न केवलं न दोषो याव
त्प्रकृतस्य रसस्य परिपोषः ॥ यथा ॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलमित्यादि ॥ अवितर्कौत्सुक्ये मतिस्मरणे शंकादैन्ये धृतिचिंतने परस्परबाध्यबाधकभावे
न भवंती चिंतयामेव पर्यवस्यंती परमास्वादस्थानं ॥ सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः ॥ किंतु मत्तांगनापांगभंगलोलं हि जीवितं ॥ अत्र त्वाद्य
मर्द्धं बाध्यत्वेनैवोक्तं ॥ द्वितीयं तु प्रसिद्धास्थिरत्वापांगभंगोपमानेन जीवितस्यास्थिरत्वं प्रतिपादयद्बाधकत्वेनोपात्तं शांतमेव पुष्णाति ॥ न पुनः शृं
गारस्यापि प्रतीतिः ॥ तदंगस्याप्रतिपत्तेः ध्वनिकारस्तु विनेयानुन्मुखीकर्त्तुं काव्यशोभार्थमेव वा ॥ तद्विरुद्धरसस्पर्शस्तदंगानां न दुष्यतीति वि
रोधपरिहारमाह ॥ आश्रयैक्य इति ॥ एकाश्रयत्वे दोषो भिन्नाश्रयत्वे तु वीरभयानकयोः परस्परविरुद्धयोरपि नायकप्रतिनायकगतत्वेन निवेशि
तयोर्न दोषः ॥ यथा अर्जुनचरिते ॥ समुत्थिते धनुर्ध्वनौ भयावहे किरीटिनः ॥ महानुपप्लवोभवत्पुरे पुरंदरद्विषामश्रवणे तस्य तु ध्वनिविलुप्तमूल
बंधनं ॥ अत्रोपदेशयोषितां श्लथीबभूव जीवितमित्यादिनैरंतर्य इति ॥ एकाश्रयत्वेपि शांतशृंगारयोः परस्परविरुद्धयोर्निरंतरत्वे दोषो न
अहो तु रसांतरांतरितयोः ॥ यथा ॥ नागानंदे शांतरस्य गीतमहो वादित्रमित्यद्भुतमंतरे निवेश्य जीमूतवाहनस्य मलयवतीं प्रति शृंगारो निबद्धः
न केवलं प्रबंधे यावदेकस्मिन्नपि वाक्ये रसांतरव्यवधानाद्विरोधो निवर्तते ॥ यथा ॥ भूरेणुदिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः ॥ गा
ढं शिवाभिः परिरभ्यमाणान्सुरांगनाश्लिष्टभुजांतरालाः ॥ सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान् ॥ संवीजिताश्चंदनवारिसेकसुगं
धिभिः कल्पलतादुकूलैः ॥ २ ॥ विमानपर्यंकतले निषण्णाः कुतूहलाविष्टतया तदानीं ॥ निर्दिश्यमानाल्ललनांगुलीभिर्वीराः स्वदेहान्पतितानपश्यन् ॥ अ
त्र बीभत्सशृंगारयोरंतरा वीररसनिवेशान्न विरोधः ॥ वीराः स्वादेहानित्यादिना उत्साहावगत्या कर्तृकर्मणोः समस्तवाक्यार्थानुयायितया प्रतीतिरिति

मध्यपातानांविपरीतरंगीरस्य व्यवधायिकता ॥ खेदहानिस्त्वनैकत्वाभिमानादाश्रयैक्यं ॥ अनंगत्वइति ॥ द्वयोर्विरुद्धयोरंगित्वेदोषोनांगत्वेपिप्रांते ॥ मा
हिंनेसर्गिकीसमारोपकृतावा ॥ तत्रयेषांनैसर्गिकोविरोधस्तावदुक्त एवविरोधएव ॥ यथाविप्रलंभेनइंगानांवाध्यादीनांतेहिनिरपेक्षभावत्यासापेक्ष
भावविरोधिन्यपिकरुणेसर्वथांगत्वेनदृष्टाः ॥ यथा ॥ भूमिमरतिमरतिमलसहृदयतामित्यादि ॥ समारोपितायामप्यदोषोयथा ॥ कोपात्कोमल
लोलबाहुलतिकेत्यादि ॥ अत्रबंद्धाहन्यतइत्यादितिचरौद्रानुभावानांरूपकबलादारोपितानांतदनिर्वाहादेवांगत्वं ॥ इयंचांगभावप्राप्तिरन्याय
दाधिकारित्वात्प्रधानेएकस्मिन्काव्यार्थेरसयोर्भावयोर्वापरस्परविरोधिनोरंगभावस्तत्रापिनदोषः ॥ यथा ॥ क्षिप्तोहस्तावलग्नःप्रसभमभिहतोप्याद
दानोंशुकांतंगृह्णन्केशेष्वपास्तश्चरणनिपतितोनेक्षितःसंभ्रमेण ॥ आलिंगन्योवधूतस्त्रिपुरयुवतिभिःसाश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधःसंदह
तुदुरितंशांभवोवःशराग्निः ॥ अत्रत्रिपुररिपुप्रभावातिशयनवर्णनेप्रकृतेकरुणइवशृंगारोप्यंगमितिनतयोर्विरोधः ॥ परंगत्वेपिकथंविरोधिनोर्विरो
धनिवृत्तिरितिचेदुच्यते ॥ विधौविरुद्धसमावेशस्यदुष्टत्वंनानुवादे ॥ यथा ॥ एहिगच्छपतोत्तिष्ठवदमौनंसमाचर ॥ एवमाशाग्रहग्रस्तैःक्रीडंतिधनिनो
ऽर्थिभिः ॥ नत्वत्रविधिस्तदेवतदेवकुरुतदेवमाकार्षीरिति ॥ तविदेकदाप्राधान्यलक्षणोपित्वन्यांगतालक्षणोनुवादः ॥ एहीतिक्रीडंतिगच्छेतिक्रीडां
गयोरागमनगमनयोर्नविरोधः ॥ नचरसेषुविध्यनुवादव्यवहारोनास्तीतिशक्यंवक्तुंतेषांवाक्यार्थत्वेनाभ्युपगमात् ॥ वाक्यार्थस्यचवाच्यस्यैवो
विध्यनुवादौतौतदाक्षिप्तानांरसानामपिभवतःअथवाग्राम्यथाकामुकआचरतिस्मरुणोऽगंतस्यतुशृंगारस्तथापिनकरुणेविश्रांतिरितितस्यांगति
वाग्राम्यथाकामुकआचरतिस्मतथाशराग्निरितिस्मर्यमाणशृंगारेणेदानींविध्वस्तत्रयापशोकविभावतांप्रतिपाद्यमानेनयोषितःकरुणोरसःप्रधान
मेववाक्यार्थमभिधत्तेयतःप्रकृतिरमणीयाःपदार्थाःशोचनीयतांप्राप्ताःप्रागवस्थाभाविभिःस्मर्यमाणैर्विलासैरधिकतरंशोकावेगमुपजनयंति ॥ यथा ॥ अ
यंसरसनोत्कर्षीति ॥ इदंहिभूरिश्रवसस्समरभुविपतितंबाहुंदृष्ट्वानत्कांतानामनुशोचनं तथात्रापित्रिपुरयुवतीनांशांभवःशराग्निरार्द्रापराधःकामीय
थाव्यवहरतिस्मतथाव्यवहृतवानित्यनेनापिप्रकारेणास्त्येवाविरोधित्वं ॥ एवं दंतक्षतानिकरजैश्चविपाटितानिप्रोद्भिन्नसांद्रपुलकेभवतःशरीरेदत्तानि

रक्तमनसामृगराजवधूजनितस्पृहैर्मुनिभिरप्यवलोकितानि ॥ इत्यादावपिशृंगारःशांतस्यांगं ॥ तथाहि ॥ यथाकश्चिन्मनोरथशतप्रेयसीसंभोगावसा
रमातपुलकस्तथात्वंपरार्थसंपादनायस्वशरीरदानइतिशृंगारेणशांतएवपोष्यतेइति ॥ यत्रतुनपोष्यतेतत्रानंगत्वाद्दोषएव ॥ यथा ॥ गममन्मथशरेणताडिता
दुःसहेनहृदयेनिशाचरी ॥ गंधवद्रुधिरचंदनोक्षितानीवितेशवसतिंजगामसा ॥ अत्रप्रकृतस्यकरुणरसस्यविरुद्धःशृंगारोनपोषकः ॥ ५ ॥ विभावानुभा
वक्लेशादीप्तिपुनःपुनर्दीप्यकोऽप्रथाच्छेदांगातिविस्तारांग्यननुसंधानानंगाभिधानप्रकृतिव्यत्ययाश्च ॥ ६ ॥ एतेवाष्टौरसस्यदोषाः ॥ तत्रविभावानुभावयोः
कृच्छ्राव्यक्तिर्यथा ॥ परिहरतिरतिंमतिंलुनीतेस्खलतितरांपरिवर्ततेचभूयः ॥ इतिबतविषमादशास्यदेहंपरिभवतिप्रसभंकिमत्रकुर्मः ॥ अत्ररतिपरि
हारादीनामनुभावानांकरुणादावपिसंभवात्कामिनीरूपोविभावःकृच्छ्रप्रतिपाद्यः ॥ कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मंडलेशिशिररोचिषितस्यदूतः
लीलाशिरोंशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौसा ॥ अत्रोद्दीपनालंबनरूपाःशृंगारयोग्याविभावाअनुभावापर्यवसायिनःस्थिताइ
तिक्लेशव्यक्तिःपुनःपुनर्दीप्तिर्यथा ॥ कुमारसंभवेरतिप्रलापेषु ॥ उपभुक्तोहिरसःस्वसामग्रीलब्धपरिपोषःपुनःपुनःपरामृश्यमानःपरिम्लानकुसुमकल्पः
कल्पतेइति ॥ अकांडेप्रथनंयथा ॥ वेणीसंहारेद्वितीयेंकेदुर्योधनस्यधीरोद्धतप्रकृतेरपितभाभूतभीष्मप्रमुखमहावीरक्षयकारिणीसमरसंरंभे
प्रवृत्तेशृंगारवर्णनेअकांडेछेदोयथा ॥ वत्सराजस्यरत्नावल्यांचतुर्थेंकेरत्नावलीनामधेयरत्नंमध्यएव्ह्लोविजयवर्मवृत्तांतकर्णनेयथा
हावीरचरितेद्वितीयेंऽकेराघवभार्गवयोर्धाराधिरूढेवीररसेकंकणमोचनायगच्छामीतिराघवस्योक्तौ ॥ अंगस्याप्रधानस्यातिविस्तरेण
वर्णनंयथा ॥ हयग्रीववधेहयग्रीवस्यमृगयावा ॥ विप्रलंभशृंगारेनायकस्यकस्यचिद्वर्णयितुमनुक्रांतेकवेर्यमकाद्यलंकारेनिबंधनरसिकत
यामहाप्रबंधेनसमुद्रादेः ॥ तथाहिहरिविजयेईर्ष्याकुपितसत्यभामानुनाथनप्रवृत्तस्यहरेः ॥ पारिजातहरणव्यापारेणोपक्रांतविप्रलंभस्यव
र्णनप्रस्तावेगलितकनिबंधनरसिकतयाकविनासमुद्रवर्णनमंतरागरूपस्थानीयंविस्तृतं ॥ तथाकादंबर्यांरूपविलासेत्यादिनामहाविप्रलंभ
बीजेप्युपरिक्षिप्तेतदनुपयोगिनाचतुर्थीश्वेताशवरनृपाश्रममुनिनगरीनृपादिवर्णनास्वतिप्रसंगाभिर्निबद्धाः ॥ तथाहर्षचरिते ॥ जयतिज्वलि

क्रिनेत्यादिनाहर्षोत्सवर्णनंवद्विजयवीजिवाणान्वयवर्णनं ॥ तथापिचानान्विनप्रायणस्मारसमेत्येतिपर्यंतोमहानग्रंथसंदर्भः ॥ शिशुपालवधेदोलावादनप्र
२० कृतप्रतिद्वंद्विनयवीजोपक्षेयावगाढवन्यानिमद्द्वाररमानुबंधेपितदसंगतश्रृंगारसंगभूतनतदत्तपवनविहारपुष्पावचयमज्जनादिवर्णनास्यनात्राग्निम
दिव्यमप्रस्तुतवस्तुविस्तृतिःप्रकृतरसप्रतीतिव्यवधानकारिण्यपिमहाकविलक्ष्येषुभूयसादृश्यतइतितत्वंतएवविदंति ॥ अंगिनःप्रधानस्याननुसंधानंयथा
रत्नावल्यांचतुर्थेंकेबाभ्रव्यागमनेनसागरिकायाविस्मृतिः ॥ अनुसंधिर्हिसर्वस्वंसहृदनायाः ॥ यथातापवत्सराजेपद्मावत्यंकेषुवासवदत्ताविषयः ॥ प्रेमसंबंधः
कथावशादाशंक्यमानविछेदोप्यनुसंहितः ॥ अनंगस्यरसानुपकारस्यवर्णनं ॥ यथा ॥ कर्पूरमंजर्यांमाथिकयात्मनाचवसंतवर्णनमनादृत्यवंदि
वर्णितस्यवसंतस्यराज्ञाप्रशंसनं ॥ प्रकृतिव्यत्ययइति ॥ प्रकृतिर्दिव्यामानुषीदिव्यमानुषापातालीयामर्त्यपातालीयादिव्यपातालीयादिव्यमर्त्यपाताली
मावेनिसप्तधा ॥ वीररौद्रश्रृंगारशांतरसप्रधानाधीरोदात्तधीरोद्धतधीरललितधीरप्रशांताउत्तमाधममध्यमाच ॥ तत्ररतिहासशोकाद्भुतानिमानुषोत्तम
प्रकृतिवद्दिव्यादिष्वपि ॥ किंतुरतिःसंभोगश्रृंगाररूपाउत्तमदेवताविषयानवर्णनीयातद्वर्णनंहिपित्रोःसंभोगवर्णनमिवात्यंतमनुचितं ॥ यथाकुमारसंभवे
हरगौरीहरगौरीसंभोगवर्णनं ॥ तत्कविशक्तितिरस्कृतत्वात्प्रस्थानदोषत्वेनप्रतिभासति ॥ क्रोधोपिभ्रुकुट्यादिविकारवर्जितःसद्यः ॥ फलदोनिबं
धव्यः ॥ यथा ॥ क्रोधंप्रभोसंहरसंहरेतियावद्गिरःखेमरुतांचरंति ॥ तावत्सवन्हिर्भवनेत्रजन्माभस्मावशेषंमदनंचकार ॥ स्वःपातालगमनसमुद्रलंघ
नादामुचितंबातावदेववर्णनीयं ॥ अधिकंतुवध्यमानमसत्यप्रतिभासेननायकवद्वर्त्तितव्यं ॥ नप्रतिनायकवदित्यपदेशेनपर्यवस्येत् ॥ एवमुत्तमानांप्र
कृतीनामन्यथावर्णनंव्यत्ययः ॥ तथातत्रभवन्भगवन्नितिउत्तमेनवाच्यंनाधमेन ॥ मुनिप्रभृतीनराजादौभट्टारकेतिनराजादौपरमेश्वरेतिनमुनिप्र
भृतौप्रकृतिव्यत्ययापत्तेः ॥ यदाह ॥ तत्रभवन्भगवन्नितिनार्हत्यधमोगदीयमोवक्तुं ॥ भट्टारकेतिचनमुनेर्नैवेतानुत्तमप्रकृतिः ॥ तत्रभवन्भगवन्नितिने
वार्हस्पत्यमेपिराजानं ॥ वक्तुंनापिकथंचिन्मुनिंचपरमेश्वरेशेति ॥ एवंदेशकालवयोजात्यादीनांवेषव्यवहारादिसमुचितमेवोपनिबद्धव्यमित्युक्तं ॥ अनौचि २०
त्याद्दतेनान्यद्रसभंगस्यकारणं ॥ प्रसिद्धौचित्यबंधस्तुरसस्योपनिषत्परेति ॥ भक्त्याशब्दार्थयोर्दोषादुत्क्कं ॥ तत्रचशब्दस्यपदवाक्यरूपत्वात्पथमंदोष

ददोषानाह ॥ निरर्थकासाधुत्वेपदस्यदोषइतिवर्त्तते ॥ कृतस्थसमासयोर्भावप्रत्ययः ॥ तेननिरर्थकत्वमसाधुत्वंचपदस्यदोषौ ॥ एवमुत्तरत्रापि
योज्यं ॥ तत्रचादीनांपूरणार्थत्वेनिरर्थकत्वंयथा ॥ मुत्यंमुहुर्मुहुरहंचपलाकुलाक्षःकृत्वास्वकंतिावतोभिमुखंपदानि ॥ स्वामिन्भवच्चरणयोःशर
णंप्रपन्नःसंसारदारुणदरेणहिकांदिशीकः ॥ पदैकदेशःपदमेव ॥ तन्निरर्थकत्वंयथा ॥ आदावंजनपुंजलिप्तवपुषांश्वासानिलोल्लासितप्रोत्सर्प
द्विरहानलेनचततःसंतापितानांदृशांसंप्रत्येवनिषेकमश्रुपयसादेवस्यचेतोभुवोभल्लीनामिवपानकर्मकुरुतेकामंकुरंगेक्षणा ॥ अत्रदृशामिति
बहुवचनमर्थेनैकुरंगेक्षणायाएकस्याएवोपादानात् ॥ नचाअलसवलितैःप्रेमार्द्रार्द्रैर्मुहुर्मुहुर्मुकुलीकृतैःक्षणमभिमुखैर्लज्जालोलैर्निमेषपरा
ङ्मुखैः हृदयनिहितंभावाकूतंवमद्भिरिवेक्षणैःकथयसकृतीकोयंमुग्धेत्वयाद्यविलोक्यते ॥ इत्यादिव्यापारभेदाद्बहुत्वंव्यापाराणामनुपात्तत्वात् ॥
नचव्यापारेऽत्रदृक्शब्दोवर्त्तते यमकादौनिरर्थकत्वंनदोषइतिकेचित् ॥ यथा ॥ योषितामतितरांनखलूनंगात्रमुज्वलतयानखलूनं ॥ वभोभिमुखेनाप्रतिमे
नकांचनश्रियाधिकातांप्रतिमेनकांचनाशब्दशास्त्रविरोधादसाधुत्वंयथा ॥ उन्मज्जन्मकरइवामरापगायावेगेनप्रतिमुखमेत्यबाणनद्याः ॥ गांडीवी
कनकशिलानिभंभुजाभ्यामाजघ्नेविषमविलोचनस्यवक्षः ॥ अत्रहंतेर्नाकर्मकत्वंनस्वांगकर्मकत्वमित्यात्मनेपदाप्राप्तेराजघ्नेपदमसाधुनादो
षानुकरणइतिवक्ष्यमाणत्वात्स्वैयेषचगविस्माहेत्यत्रनदोषः ॥ अथनयोदशवाक्यदोषानाह ॥ विसंधिन्यूनाधिकोक्तारूढानरूढपदपतत्प्रकर्षसमा
प्तपुनरात्तविसर्गहतवृत्तसंकीर्णगर्भितभग्नप्रक्रमानन्वितत्वानिवाक्यस्य ॥ दोषइतिवर्त्तते ॥ तत्रसंधिःस्वराणांसमवायःसंहिताकार्येणद्रवद्र
व्याणामिवैकीभावः ॥ कपाटवत्स्वराणांव्यंजनानांचप्रत्यासत्तिमात्ररूपोवा ॥ तस्यविश्लेषादश्लीलत्वात्कष्टत्वाच्चत्रैरूप्यंविसंधित्वंविश्लेषा
यथा ॥ कमेइवलोचनेइमेअनुबध्नातिविलासपद्धतिः ॥ लोलालकानुविद्धानिआननानिचकासति ॥ संहितांनकरोमीतिस्वेच्छासकृदपिदोषःप्र
कृतिरूपत्वविधानेत्वसकृत् ॥ संहितैकपदवत्पादेष्वर्द्धांतवर्जमितिहिकाव्यसमयः ॥ अश्लीलत्वायथा ॥ विरेचकमिदंनृत्तमाचार्याभासयोजितं ॥ अ
नविरेचकमितिजुगुप्सा ॥ याभादितिव्रीडा ॥ तथाचकाशीपनसप्रांश्वेःपुरीपंडमहान्हमे ॥ अत्रशेषेतिपुरीषमितिमहान्हमेतिचव्रीडाजुगुप्सामंगला

थंस्मारकत्वादश्लीलाः कष्टत्वाद्यथा मंजर्युद्गमगर्भास्तेगुर्वाभोगाद्रुमाबभुः वर्णाद्यैर्विलंबेनविवक्ष्यमाणत्वादुर्वचकादीनदोष ॥यदाह॥ भुक्ती
२१ बालमूर्खाणांमुखसंस्कारसिध्द्ये प्रहासाक्तचगोष्ठीषुवाचादुर्वचकादयः अवश्यवाच्यस्यानभिधानेन्यूनपदत्वंयथा तथाभूतांदृष्ट्वेति अत्रास्मा
भिरितिशिवलइत्यस्मात्पूर्वमिप्रभितिचनोक्तमितिन्यूनत्वम् तथात्वयिविरतेःप्रियवादिनःप्रणयभंगपराङ्मुखचेतसः कमपराधलवंममपश्यसि
त्यजसिमानिनिदासजनंयतः अत्रापराधस्यलवमपात्माथावात्यः तथा नवजलधरःसन्नध्दोयंदृप्तनिशाचरः सुरधनुरिदंदूराकृष्टंननामशरासनं अ
यमपिपटुधारासारोनबाणपरंपराकनकनिकषस्निग्धाविद्युत्प्रियानममोर्व – अत्रभ्रांतौनिवृत्तायांतद्विषयभूतयोःसुरधनुर्धारासारयोरिवविद्युतो
पादमापरामर्शोवाच्यः ॥यथावा॥ उपमायां॥ संहयचक्कायजुआविअसियकमलामुणालसंछन्ना वावीबद्धवरोअणविलित्तघणयाक्कहविंदु
अत्रकमलमृणालप्रकृत्योर्मुख्यबाह्वोःकेनापिपदेनानुपादानान्न्यूनपदत्वंक्वचिद्गुणोयथा गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा
सांद्रस्नेहरसातिरेकविगलच्छ्रीमन्नितंबांबरा मामामानदमातिममलमितिक्षामाक्षरोल्लापिनीसुप्ताकिंनुमृतानुकिंमनसिमेलीनानुकिम् क्वचि
न्नगुणोनदोषः ॥यथा॥ तिष्ठेत्कोपवशादिति अत्रपिहितेसतोऽनंतरंनैतद्यतइत्येतैर्न्यूनैः पदैर्विशेषबुध्देरकरणान्नगुणः उत्तरप्रतिपत्तिः
पूर्वप्रतिपत्तिंबाधतइतिनदोषः अधिकपदत्वंयथा स्फटिकाकृतिनिर्मलःप्रकामंप्रतिसंक्रांतनिशातशास्त्रतत्वः अविरुध्दसमन्वितोक्तियुक्तिः
प्रतिमल्लास्तमयोदयःसकोपि अत्राकृतिशब्दोऽधिकः ॥यथा॥ ताडीजांघानिजध्रेकृततदुप – परुतिर्यवृत्तेर्गीतमेन अत्रतच्छब्दः ॥यथा॥ दल
त्कंदलभद्रमिःसनवाबुदमंबरं वाप्यःफुल्लांबुजयुजोजाताहृष्टिविषंममा अत्रभत्रिःसहशब्दोयुजिश्चाधिकाः ॥यथा॥ विसकिसलयच्छेदपाथेयवं
तइति लगुत्तरासंगवतामधीतिनामितिचमत्वर्थीयस्याधिकत्वं बहुव्रीहिसमाश्रयेणैवतदर्थावगतिसिध्देः ॥यदाह॥ कर्मधारयमत्वर्थी
याभ्यांबहुव्रीहिर्लघुत्वात्प्रक्रमस्य ॥तथा॥ वासोजांबवपल्लवानिजघनेगुंजास्त्रजोभूषणमिति नदीयमातंगघटाविघट्टितैरिति येनाकुंभनि २१
मग्नवन्यकरिणांयूथैःपयःपीयतेइत्यत्रतद्धितप्रत्ययस्याधिकत्वं षष्ठीसमासाश्रयेणैवतदर्थावगतेः यत्रत्वर्थांतरेतध्दितस्योत्पत्तिर्नतत्रसमा

साप्वतीतिमितिनतस्याधिक्यं॥यथा॥अभ्यागतानिवार्यंतेद्वारेभ्यस्तत्रतत्रस्युरिति॥अनहिअपत्यार्थेनद्धितेनेदमर्थइति॥तथा॥किंपुनरौदरोवुर्जा
नेजातेजातामर्षनिर्भरेचमनसिनास्त्येवावकाशः॥शोकक्रियाकरणस्येत्यत्रक्रियाकरणयोः॥यथावाउपमायां॥अहिणवमणहरविरइयवलयवि
हूसाविहाइलवहूआ॥कुंदलयवसमुप्फुल्लगुच्छपरिलिंतभमरगणा॥अत्रोपमेयस्यनालरत्नादेरनिर्देशेभ्रमरगणपदमितिस्थितइत्यधि
कपदत्वं॥तथा॥अलिभिरंजनबिंदुमनोहरैःकुसुमभक्तिनिपातिभिरंकितः नखलुशोभयतिस्मवनस्थलींनतिलकस्तिलकःप्रमदामिव॥अत्रतिल
कप्रमदायोरेकतरस्यसमासोक्तितएवाक्षेपादन्यतरस्याधिकपदत्वं यथावाऽस्यैकं॥शोकानलधूमसंभारसांद्रतोद्गारितमिववर्षतिनयनवा
रिधाराविसरंशरीरं॥अत्रशोकस्यकेनचित्साधर्म्येणानलत्वेनरूपणमस्तुधूमस्यपुनर्नकिंचिद्रूप्यमस्तीतिअधिकपदत्वंतथा॥ निर्मोकमुक्तिमि
वगगनोरगस्यलीलाललाटिकामिवत्रिविष्टपस्य अत्ररूपकेणैवसाम्यस्यप्रतिपाद्यमानत्वादिवशब्दस्याधिक्यंयथावा॥समासोक्तौस्पृशतिति
ग्मरुचौककुभःकरैर्दयितयेवविजृंभितरागया एतनुमानपरिग्रहयास्थितंरुचिरयाचिरयापिदिनश्रिया॥अत्रतिग्मरुचेककुभांचयथासदृश
विशेषणवशेनव्यक्तिविशेषणपरिग्रहेणवनायिकत्वाव्यक्तिस्तथाश्रीकृद्दिवसश्रियोपिप्रतिनायकत्वेनभविष्यतीतिदयितयेत्यधिकं॥य
थावाऽन्योक्तौ आहूतेषुविहंगमेषुमशकोनायापुरोवार्यते माध्यवाधुरिवालसंस्थिणमणिश्छत्तेमणीनांधुरं खद्योतोपिनकंपतेप्रचलितुंम
ध्येपितेजस्विनांधिक्सामान्यमचेतनंप्रभुमिवानामृष्टतत्वांतरं॥अत्रचेतसःप्रभोःप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तत्वात्प्रभुमिवेत्यधि
कं॥तथा॥द्रविणमापदिभूषणमुत्सवेशरणमात्मभयेनिशिदीपकः बहुविधाभ्युपकारभरक्षमोभवतिकोपिभवानिवसन्मणिः॥अत्राभ
वदर्थस्यान्योक्तिबलेनैवाक्षेपाद्भवानिवेत्यधिकं॥क्वचिद्गुणः॥यथा॥द्वंद्वचनाहितमतिर्बहुधातुर्गर्भकार्योन्मुखःखलजनःकृतकंब्रवी
ति॥तत्साधवोननविदंतिविदंतिकिंतुकर्तुंयथाप्रणयमस्यनपारयंति॥अत्रविदंतीतिद्वितीयमन्ययोगव्यवच्छेदपरं॥उक्तयवत्वंद्विःप्रयोगःनैकंप
दंद्विःप्रयोज्यंप्रायेणेतिहिसमयः॥यथा॥धिङ्अंकरतरुतल्पंकल्पितस्वापलीलापरिमलननिमीलत्पांडिमागंडपाली॥सुतनुकथयकस्य

व्यंजयंत्यंजसैवस्मरनरपतिलीलायौवराज्याभिषेकं॥ अत्रलीलेति क्वचिद्गुणोयथा लाटानुप्रासोजयतिद्गुणास्तिमिरांयेकवल्लभः वच्छ
२२ भारुतपूर्वाशःपूर्वाशातिलकोरविः॥ क्वचिच्छब्दशक्तिमूलेध्वनौयथा॥ तालाजायंतेगुणाजालानेसहिअएहिघेप्पंति रविकिरणाणुग्गहि
याइंहुंतिकमलाइं॥ विहितस्यानुवाद्यत्वेयथा॥ जितेंद्रियत्वंविनयस्यसाधनंगुणप्रकर्षोविनयादवाप्यते गुणप्रकर्षेणजनोनुरज्यतेज
नानुरागप्रभवंतिसंपदः॥ अस्थानस्थपदत्वंयथा॥ प्रियेणसंग्रथ्यविपक्षसन्निधावुपाहितांवक्षसिपीवरस्तने स्रजंनकाचिद्विजहौजलावि
लांवसंतिहिप्रेम्णिगुणानवस्तुनि॥ अत्रस्रजंकाचिज्जहावितिवाच्यं॥ यथा॥ द्वयंगतंसंप्रतिशोचनीयतांसमागमप्रार्थनयाकपालिनः॥ कलाचसाकां
तिमतीकलावतस्त्वमस्यलोकस्यचनेत्रकौमुदी॥ अत्रत्वंशब्दादनंतरंचकारायुक्तः॥ यथा॥ शक्तिर्निस्त्रिंशजेयंतवभुजयुगलेनाथदोषाकरश्रीर्वक्त्रेपार्श्वेत
थैषाप्रतिवसतिमहाकुट्टनीखड्गयष्टिः॥ आज्ञेयंसर्वगातेविलसतिचपुनःकिंमयावृद्धयातेति प्रोच्येवेत्थंप्रकोपाच्छशिकरसितयायस्यकीर्त्याप्रयातं॥
अत्र —प्रोच्येवेतिन्याय्यं॥ यथा॥ लग्नंरागावृतांग्यासुदृढमिहयेनासियष्ट्यारिकंठे मातंगानामपीहोपरिपरपुरुषैर्याचदृष्टापतंती तत्सक्तोयंनकिंचि
द्गणयतिविदितंतेस्तुतेनास्मिदत्ताभृत्येभ्यःश्रीनियोगाद्गदितुमिवगतेत्यंबुधिंयस्यकीर्तिः॥ अत्रगदितुंश्रीनियोगादितिवाच्यं॥ यथा॥ तीर्थेतदीयेगजसेतुबं
धात्र —पगामुत्तरतोस्यगंगामित्यत्रपरामर्शनीयमर्थमनुक्त्वैवयत्तस्यतदापरामर्शःसोनुक्तानस्यपदत्वंदोषः॥ यथा॥ कष्टावेधंव्यधानियंकरुणाव
हनक्रमः॥ श्रवणानामलंकाराकपोलस्यतुकुंडलं॥ अत्रश्रवणानामितिपदंपूर्वार्द्धेनिवेशयितुमुचितं॥ नार्थेकिंचिदसमाप्तंवाक्यमितिहिकवि
समयः॥ यथाचोत्प्रेक्षायां॥ पत्तनिअंबफंसाण्हाणुत्तिण्णाएसामलंगीए॥ चिहुरारुअंतिजलबिंदुएहिंबंधस्सवभएण॥ अत्ररोदनंबंधनभयंचेत्य
भयमुत्प्रेक्षितंतत्रप्राधान्याद्रोदनाभिधायिनएवपदादनंतरमुत्प्रेक्षावाचिपदंप्रयोक्तव्यमितियदन्यत्रप्रयुक्तंतदस्थानस्थपदंप्रधानेत्वनुत्प्रेक्षि
तेतदितरदर्थादुत्प्रेक्षितमेवभवति॥ यदाह॥ एकत्रोत्प्रेक्षितत्वेनयत्रार्थाबहवोमताः॥ तत्रैवादिःप्रयोक्तव्यःप्रधानादेवनान्यथेति॥ पतत्प्रकर्षं २२
यथा॥ कःकःकुत्रनघुर्घुरायितघुराघोरोघुरेत्सूकरः॥ काकःकंकमलाकरंविकमलंकर्तुंकरीनोद्यतः॥ केकेकानिवनान्यरण्यमहिषानोन्मूल

येयुर्यतःसिंहीस्निग्धविलासबद्धवसतिःपंचाननोवर्त्तते॥ अत्रक्रमात्क्रममनुप्रासोघटयितव्यः॥ पतत्प्रकर्षः क्वचिद्गुणः॥ यथा॥ प्रागप्राप्तनिशुंभशांभवधनुर्द्वैधाविधा
पादेतस्यचभागेभवति ॥ तत्रपादजंपंचदशधातथाहिप्रथमोद्वितीयादावावर्त्ततेद्वितीयस्तृतीयादौतृतीयश्चतुर्थइतिषट् ॥ प्रथमोद्वितीयतृती
ययोर्द्वितीयस्तृतीयचतुर्थयोरितिचत्वारः ॥ प्रथमःत्रिष्वपिएकः ॥ प्रथमोद्वितीयेतृतीयश्चतुर्थेइतिप्रथमश्चतुर्थेद्वितीयस्तृतीयइतिद्वौ ॥ आर्द्धा
वृत्तिः ॥ श्लोकावृत्तिश्चेतिद्वेइतिद्वैइत्थंयथा ॥ चक्रंदहतारंचक्रंदहतारं ॥ यद्भिनववौजौराजन्नरिनारी ॥ कश्चिद्राजानमाह ॥ समरंहूताग्निसर्वं
धिरूढोदाग्नाद्याऽत्यर्थम्संयतंयाचमानेनयास्याःप्रापिद्विषावधः ॥ संयतंयाचमानेनयुनक्तिप्रणतंजनं ॥ रणंदेव्याः जितेंद्रियंपूजयाज्ञानेनवा ॥
प्रभावतोनामनवासवस्यप्रभावतोनामनवासवस्यविच्छित्तिरासीत्वयिविष्टपस्य ॥ प्रभावात्शक्रस्यतेजस्विनोनामनतोःकारक ॥ अनामनमनर्गह
न ॥ अनश्वविच्छेदपस्यप्रभौस्वामिनित्वयिननसोमरसस्यरावस्यशद्वास्यनयाविच्छेदआसीत् ॥ नवेत्येकएवनिपातःप्रतिषेधार्थः ॥ नामेत्यभ्युपगमेनि
पातः ॥ इत्यादिअर्द्धावृत्तिर्यथा ॥ सारशनादपगतेरसकृद्गौरवाधिकासारशिनादयागतेरसकृद्गौरवाधिका ॥ सादेवीआयतामनन्यानवरागरुद
भिमतंयस्त्वित्यर्थः ॥ वाग्रूपाकृती ॥ उत्कृष्टकृतेः अपगतविपक्षाद्विरतंगौरवेणाधिकासर्वेषांगुरुरित्यर्थः ॥ श्लोकावृत्तिर्यथा ॥ सत्वारंभरतोवश्यम
वलंबिततारवम् ॥ सर्वदारणमानैषीद्वानलसमस्थितः ॥ सत्वारंभरतोवश्यमवलंबिततारवं ॥ सर्वदारणमानैषीद्वानलसमस्थितः ॥ महापुरुषःपु
नःशत्रुसमूहंभराहुशेऽवर्त्तमानंबलरहितं ॥ दीर्घाक्रंदंसर्वकालंसंग्रामंप्रापयामास ॥ भवानलसमपितुलरितंगच्छत् ॥ अरुग्णितस्यत्कपक्षणेति
सत्वेनयेआरंभास्तेषुरतःसर्वथाआश्रितंतरुत्वग्वसनेयेनशत्रुसमूहेन ॥ सर्वेषांदारणोयोमानस्तमिच्छति ॥ दवाग्निनासमंस्थितंयस्य ॥ तथाभा
गजस्यद्विधाविभक्तेपादेप्रथमनदादिभागःपूर्ववत्द्वितीयादिषादादिभागेषुअन्तभागोऽन्तभागेष्वित्यष्टाविंशतिर्भेदाः ॥ श्लोकांतरेहिनभागा
वृत्तिःसंभवति ॥ यथा ॥ सरस्वतिपदंचितसरस्वतिविधेहिमोत्वाविनाहिनूइणांतेनराःकाव्यादृवास्फभिः ॥ करेणतेरणेषुंतःकारणद्विषतांहताः ॥ को
णवःक्षरदृक्ताभांतिसंध्याघनाइव ॥ अभानिशंनिधेहेमेभवानिशंरूपापरा ॥ उपासनानियत्ज्ञानोभवानिशंमतित्वयि ॥ परागतरुताजीवर्धतेईद्
स्नाभटेश्वाहः ॥ परागतमिवक्वापिपरागततमस्वरं ॥ पातुवोभगवान्विष्णुःसदानवघनद्युतिः ॥ सदानवकुलध्वंसीसदानवरदंतिहा ॥ परद्वयंकपादिन

३३ पुनानुलोकपालिन: ॥ अलीयतेनतोहरि: ॥ समयपंकजप्रभो ॥ एवमन्यान्युदाहार्याणि ॥ त्रिधाविभक्तेद्वाचत्वारिंशत् ॥ चतुर्द्धाविभक्तेषट्पंचा
शत् ॥ प्रथमपादादिगतान्त्यार्द्धादिभागाद्द्वितीयपादादिगताद्यार्द्धादिभागं यम्यकृत्याद्यन्वर्थानुसरणेनानेकभेदमंतादिकं ॥ अन्तादिकमा
द्यन्तकंतत्समुच्चय: ॥ मध्यादिकमादिमध्यमन्तमध्यंमध्यान्तकंतेषांसमुच्चया: ॥ तथातस्मिन्नेवपादे आद्यादिभागानांमध्यादिभागेष्वनियतेच
स्थाने आवृत्तिरितिप्रभूततमभेदयमकं ॥ एतस्यचकविशक्तिख्यापनमात्रफलत्वेनपुरुषार्थोपदेशेनुपायत्वात्काव्यगर्भूततेतिभेदलक्षणंन
क्तं ॥ काव्यंहिमहाकवय:कुकुमारमतीनांपुरुषार्थेषुप्रवर्त्तनायविरचयंतिनचपृथक्प्रयत्ननिर्वर्त्त्यंयमकादिनिरुद्धरसंतत्रथासकलोपाय:
सरित्पर्वतसागरादिवर्णनमपिवस्तुत्वात्रसभंगेहेतुरेवकिमङ्गनिकष्टकाव्यं ॥ तथाचलोल्लट: यस्तुसरिदद्रिसागरनगतुरगपुरादिवर्णनेय
त्न: ॥ कविशक्तिख्यातिफलाविततधियांनोमत: प्रबंधेषुयमकानुलोमतदितरचक्रादिभिदो ऽतिरसविरोधिन्य: ॥ अभिमानमात्रमेतद्गड्डुरिकादि
प्रवाहोवेति ॥ ५२ ॥ स्वरव्यंजनस्थानगत्याकारनियमच्युतगूढादिचित्रं ॥ स्वरादीनांनियमश्च्युतगूढादिश्चचित्रसाक्षेपादाश्चर्यहेतुत्वाच्चित्रं
तत्रस्वरचित्रंयथा ॥ जयमदनगजदमनवरकलभगतगमनगतजननमदमरणभवभयगनरशरण ॥ ह्रस्वैकस्वरम ॥ एवंदीर्घैकस्वरद्वित्र्या
दिस्वरनियमेउदाहार्यम् ॥ व्यंजनचित्रंयथा ॥ ननोननुन्नोनुन्नोनोनानानानाननाननु ॥ नुन्नोनुन्नोननुन्नेनोनानेनानुन्ननुन्ननुत् ॥ रणपराक्षुण्णगणा
:११ कुमारेणजगद्रिरितिप्रक्रम: ॥ हेनानामाननाअनेकरूपवदना:सननानपुरुषोयकाननहीनेनजित: ॥ विजितहीनोपिपुरुषोऽपुरुषा ॥ ननुसंबोध
नोजितोप्यजितएवयोनजितप्रभु: ॥ सोपिपापएवयोजितंजितंनुदतीतिएकव्यंजनम् ॥ एवंद्वित्र्यादिव्यंजननियमेउदाहार्यंस्थानपुर:कंगादितच्चित्रंयथा ॥ अगा
गंगाङ्गकाकाकगाहकाघककाकहा ॥ अहाहाङ्कखगाङ्कागखगकाकक: ॥ कश्चित्पुरुष:श्रूयते ॥ हेगाङ्गकाकाकगाहक:गङ्गासंबंधीयजलकुटि
लगतिविलोटकलंकुक्षितपापान्येवकायसास्तेषांहंता ॥ जिहातिक्षिपिहानंहानहां ॥ गतिंजहातियतथाविधमगंयस्यसखग ॥ सूर्यश्चिन्हंयस्यस ३३
गिरिर्यान्मेरुस्तत्रकंकाख्या:पर्वतपतत्रिण: ॥ काकका:शब्दकारिणोयस्यासत्वंपापहामेरुनिवासिभिरपिप्रख्याप्यमानकीर्त्तिर्गामगा: ॥ स्वर्गगता

सौत्याशंसायांभूतवन्निर्देश: ॥ कायतिअर्भमभिधत्तइतिकाक:शब्दशोणोदिकेकेनंकरोतीतिणिश्चितद्नाणकेचकाकक: ॥ कंठस्थानम् ॥ एवंद्वित्र्यादिस्था
ननियमेबुदाहार्यं ॥ गतिर्गतप्रत्यागतादिकातच्चित्रंयथा ॥ वारणागगभीरासासाराभीगगणारवा ॥ कारितारिवधासेनानासेधावरितारिका ॥ करिगिरिदु
र्विगाहा ॥ उत्कृष्टाश्चलीगानामप्राप्तभयानांभटसमूहानांजयध्वनिनायुक्ता ॥ विहितशत्रुक्षयास्वार्थेणिच् ॥ अविद्यमानआसोधायस्या ॥ मयासहयुध्यध्व
मितिचरिता:प्रार्थिता:अरयोयया ॥ सायदूनांसेनाद्विषतांबलंप्रयातेतिपूर्वेणसंबंध: ॥ अत्रायुक्त्यादयोर्गतिपुक्त्यादयो:प्रत्यागतिरित्यर्द्धेनैणवतिपादगत
प्रत्यागतं ॥ एवमर्द्धगतप्रत्यागतश्लोकगतप्रत्यागतसर्वतोभद्रार्द्धभ्रमतुरंगपदगोमूत्रिकादीन्युदाहार्याणि ॥ आकार:खड्गमुरजबंधाद्याकृतिस्तच्चित्रंय
था ॥ मारारिशक्रामेभमुखैरासाररंहसा ॥ साराबधस्तवानित्यंतदर्त्तिहरणक्षमा ॥ मातानतानांसंघट्ट:श्रियाबाधितसंभ्रमा ॥ मान्याथसीमारामाणां
शंमेदिश्यादुमादिजा ॥ मारारि:शिव: ॥ इभोमुखश्लीआसारतुल्यवेगेनसर्वेषामाद्याम्बदू: ॥ तथाच ॥ द्राटिकान्तेरसाधारणेमाशब्दस्तस्यदक्षिणतोऽध: क्रमे
णवर्णाश्चतुर्दशशिखायांसाधारण:साशब्दऊर्द्धक्रमेणवामतश्चांतएवयानमाशब्द:साधारण: एतत्फलम् ॥ तस्यैनंमाशब्दस्यदक्षिणतोनि:सरणक्र
मेणवामतश्चप्रवेशक्रमेणवर्णा:सप्तसप्तएषाद्राटिका: ॥ ततोमाशब्दादूर्द्धक्रमेणगंडिकायांवर्णत्रयमुपरिमाशब्दा:साधारण: ॥ तस्यदक्षिणतोवाम
तश्चतथैवचत्वारश्चत्वारोवर्णा: ॥ एतद्बलफलम् ॥ ततस्तस्यमाशब्दस्योपरिवर्णद्वयमेतन्मस्तकम् ॥ सामामाशब्दाद्दि:पंचकृत्वोद्विरावृत्ता:यादमानंवमा
नंदपदमाननमाननमानदा ॥ दानमानक्षमानित्यधनमानवमीनिता ॥ याइंद्रियजयेनउत्तमोयत्नआनंदस्तस्यपदंविद्ययाहिशमकरवलाभ: ॥ मुखस्य
पूजांददाति निरपभ्रंशसापणाद्धिमुखंपूज्यंभवति ॥ दानमानक्षमाएवशाश्वतंधनंयेषांतै:पुरुषै:पूजिता ॥ मानंज्ञानम् ॥ मुरजबंध: ॥ तथाहिपाद
चतुष्टयेनपंक्तिचतुष्टयेकृतेप्रथमादिपादेभ्य: ॥ प्रथमाद्यक्षराणिचत्वारिचतुर्थादिपादेभ्य: ॥ पंचमादीनिचचत्वारिगृहीत्वाप्रथम:पाद: ॥ द्विती
यात्प्रथमंप्रथमात्द्वितीयतृतीयेद्वितीयतृतीयाभ्यांचतुर्थेचतुर्थात्तृतीयद्वितीयेतृतीयाभ्यादाप्रथममक्षरंगृहीत्वाद्वितीय:पाद: ॥ द्वितीयादष्टमं
प्रथमात्सप्तमषष्ठेद्वितीयतृतीयाभ्यांपंचमेचतुर्थात्षष्ठसप्तमेतृतीयादष्टमंचगृहीत्वातृतीय:पाद: ॥ चतुर्थादिभ्य:प्रथमादीनिप्रथमादिभ्य:पंच

मादीनिपादेभ्यो ऽक्षराणि गृहीत्वा चतुर्थः पादः । एवंमुद्राल्पधनुर्बाणचक्रपद्मादयउदाहार्याः । च्युतंमात्रार्द्धमात्राबिंदुवर्णगतत्वेनचतुर्द्धा । तत्रमात्रा
३४ च्युतकंयथा । हृतियोजितमर्त्यःकृपणाक्रांतमंडलः । महापदमुपाभावासत्वसमःकुपतिःकुतः । अत्रकृपाणेति विभूतिर्भस्मच महापदमुभावसति
संबोधनेपदद्वयं । महापदे ऽमूलस्याथामेतिपदमेकंच । अर्द्धमात्राच्युतकंयथा । पयोधरभराक्रांतेनिबद्धाविराजिते । कांतःसर्वतनाभीष्टोबालेदुःखि
नलभ्यते । अत्र दुःखयत्रनकारोव्यंजनंच्युतंबिंदुच्युतंयथा । सहसानलिनीनरोशरीनागगनाचनिःशोभातामिपालानांसभाबविबुधाश्रिता । सह
हसेनविकाशेनेत्यपि । वर्णच्युतंयथा । सितनशिरःस्रजारचितमौलिशिरोमणिमौक्तिकेसताथाशिखिरनिरोद्धदत्थधुराकाटतटेनिलकक्रियाचस्या ।
स्फुटविकटाट्टहासलक्षितंवदनंस्मितापेक्षालंचनदाभनवमीश्वरोवहृतिवेषमहोतुहिनाद्रिजार्द्धयुक् । अत्रगौरीश्वरवर्णनेसिद्धलंदसिप्रतिपा
दमाद्याक्षरद्वयपाते ऽन्त्याक्षरसप्तकच्युतौचेश्वररूपवर्णनमेवद्यमिताक्षरायत्नेमयदिवांआद्याक्षरसप्तकच्युतौअन्त्याक्षरद्वयपातेचगौरीविष्णानं
न्हतविलंबिनवृत्तेनगूढंक्रियाकारकंसंबंधपादविषयत्वेनचतुर्द्धाक्रियागूढंयथा । स्तनजघनाभिराममंदंगमनमिदंनदनाकृष्णेक्षणायाः
कथमिवसहसाक्लिष्टोवक्त्रोमदनशरशरजर्जरयुवान् । हेयुवानःकथमिववदायंतस्तेतिक्रियागूढम् । कारकगूढंयथा । केनेमौदुर्विदग्धेनहृद
येविनिवेशितौ । पिबतस्तेनशरावेणवारिकह्लारशीतलं । अत्रशरावितिकर्म्मणागूढत्वं । संबंधगूढंयथा । नममागारमाभिज्ञंचेतःकस्मात्प्रकु
प्यसि । अरुणानदितैरेभिरत्नमालाहितेक्षणे । अत्रनमौचनआगौरमाभिज्ञमितिसंबंधगूढं । पादगूढंयथा । एवियद्गामिनीतारसंरावविहित
श्रुतिः । हेमेषुमालाशुभ्रेअत्रवियत्तामिवसंहतिरित्यस्यगूढत्वात्पादगूढत्वंगूढादीत्यादिपदेनप्रश्नोत्तरप्रहेलिकादिग्रहः । एतच्चकष्टकाव्यत्वा
त्क्रीडामात्रफलत्वाच्चनकाव्यरूपतांदधातीतिनप्रतन्यते ॥४२॥ अर्थभेदभिन्नानांशब्दानांभंगाभंगाभ्यांयुगपदुक्तिःश्लेषः । अर्थभेदाच्छब्दभेदइ
तिनयेवाच्यभेदेनभिन्नानामपिशब्दानांभंगादभंगाच्चद्वैधाभवति । यथा । अलंकारःशंकाकरनरकपालंपरिजनोविशीर्णांगोभृंगावस ३४
थचएकोबहुवयोः । अवस्थेयंस्थाणोरपिभवतिसर्वामरगुरोर्विधौवक्रेमूर्ध्निस्थितवतिवयंकेपुनरमी । अत्रविधुर्विधिश्चेत्यककारोका

रयोर्वर्णयोर्भंगः । तेगच्छंतिमहापदंभुविपराभूतिःसमुत्पद्यते । तेषांतैःसमलंकृतंनिजकुलंतैरेवलब्धाःश्रियः । तेषांद्वारिनदंतिवाजिनिवहास्तैर्भूषिता
नित्यशोयेदृष्टाःपरमेश्वरेणभवनातुष्टेनरुष्टेनवा । अत्रमहतीमापदंमहत्पदंचेत्यादिपदानांभंगः । भक्तिप्रदविलोकनप्रणयिनीनीलोत्पल
स्पर्द्धिन्याध्यानालंबनतांसमाधिनिरतैर्नीतहितप्राप्तये । लावण्यस्यमहानिधीरसिकतांलक्ष्मीदृशोस्तन्वतीयुष्माकंकुरुतांभवार्तिशमनंनो
त्रजनुर्वाहरेः । अत्रनीताईहितप्राप्तयेनीतेहितप्राप्तयेइतिचस्त्रीनपुंसकलिंगयोःश्लेषः । कुरुलालसभूलोहमहिमोहहरेतुहारिविच्छिन्ने हरि
णारिसारदोहेवारवरंहरत्रमेभावं । कश्चिद्युक्तध्यानानीतांभवानांस्वकांतांचसंस्कृतप्राकृतयावाचाब्रूते हेतुमेहरेरुद्रेभावेश्रद्धांविधेहि
अर्धांममकीदृशीहरेलालसमर्धान्मनस्तद्धुवंकामंलेदिश्चयस्तत्रमहिलेवबितर्कहर्तारिहरसन्निधौहिसर्वाज्ञानाभिभवइतिश्रुतिः । तेहत्सर्द
तिमेऽरयास्तैर्विरहितेसिंहबलशरीरेपरिणतरिस्रिदम् । उमायाएववाइमानिसंबोधनपदानिप्राकृतेनुहेवरेकोन्तुतवसंबंधिनि कुरुलालस
भ्रूलोरवमहिमोहग्रहोहारिणिविच्छिन्नेतनुमध्यत्वात् । हरिप्रियाप्रधानपुष्पियद्वरंनयनानस्रजघनादिनान्मभिबंलोहरतुकामंप्ररयंतु । ए
वंभाषांतरभंगेष्युदाहार्यं । आत्मनश्चपरेषांचप्रतापैस्तवकीर्त्तिनुताभयकृद्रूपतेवाहुर्द्विषांचस्कहृदांचतं । अत्रनौतिनुदसौःकरोतिकृन्ततोश्च
प्रकृत्योर्भंगः । त्वदुद्दामयस्तानकृदव्रणकिणाकृतिः । विभातिहरिणीभूताशात्रिनोल्लांछनच्छविः । हरिणीभूतेतिमृगीभूताश्यामासंपन्नेति
च । अत्रश्रीड़िप्रत्यययोर्भंगः । विषंनिजगलेयेनबध्नेचभुजगप्रभुः । दहेयेनांगजातदग्धेतायावमजमत्पजः । अत्रगिलितंनिगलेचदग्धोव
पुषिचेतिस्यादित्यादिविभक्त्योर्भंगः । माज्यप्रभावःप्रभवोधर्म्मस्यास्तरजस्तमाः । ददतांनिर्वृताव्मानभायोन्येपिमुदंजिना । अत्रैकवच
नबहुवचनयोर्भंगः । एषामेववर्णादीनामभंगाद्यथा । असावुदयमारूढकांतिमानस्तुमंडलः । राजाहरतिलोकस्यहृदयंमृदुभिःकरैः
उभयःशब्दपाचिषागिरिविशेषश्चारक्तमंडलोनुरक्तप्रकृतिरकृपाविंबिश्च । राजानृपतिश्चन्द्रश्चमृदुभिरखेदावहैःकरैर्दंडादिभिः
किरणैश्चेत्सभंगःशब्दश्लेषः । अत्रप्रकरणादिनियमाभावात्तद्द्वयमपीवाच्यौ । नचायमर्थालंकारइतिवाच्यं । अन्वयव्यतिरेकाभ्यांशब्द

गतत्वेनप्रतीयमानत्वात् ॥ तथाहि उदयादिशब्दप्रयोगे ॥ अलंकारस्तदर्थश्च न तु पश्चयगिर्यादिप्रयोगे तु नेतिलद्भावाभावानुविधायित्वाच्छब्दालंकारत्वा
३५ य ॥ स्वयंचपल्लवाताम्रभास्वत्करविराजिनी ॥ प्रभातसंध्येवास्वापफललुब्धेहितप्रदेत्यादौ तु संकरत्वमेव युक्तं ॥ अथवान्यायपरिक्षायामुपमान्वंम
व ॥ तथाहि ॥ यथागुणंक्रियासाम्यउपमा तथा ॥ शब्दमात्रसाम्येपिदृश्यते ॥ सकलकलंपुरमेतज्ञातंसंप्रतिसितांशुबिंबमिवेत्यादौ न चात्र श्लेषत्वंच
क्तं युक्तं ॥ पूर्णोपमायानिर्विषयत्वापत्तेः ॥ गुणक्रियासाम्येसाभविष्यतीतिचेन्न ॥ अर्थश्लेषस्यनिर्विषयत्वप्रसंगात् ॥ अथदिशःप्रसादयन्नेषइ
त्यादौवक्ष्यमाणउपमाविरहितोर्थश्लेषस्यविषयःकल्प्यते ॥ तद्द्वयोरप्यन्यत्रलब्धसत्ताकयोरेकत्रसन्निपातेसंकरेणैवप्राप्नोति ॥ गुणक्रियासाम्यमु
पमा ॥ शब्दसाम्यंतुश्लेषइतिविशेषस्यानतिरोधोनाच्छब्दस्यसमपकमायाविषयः ॥ श्लेषस्यंतूपमयाविरहितइतिस्वयंपल्लवेत्यादावुपमैवन्याय्यापिच
च ॥ अविंदुसुंदरीनित्यंगलल्लावण्यबिंदुकेत्यादौनविरोधप्रतिभोत्पत्तिहेतुःश्लेषोपितुःश्लेषोपिचतुश्लेषप्रतिभोत्पत्तिहेतुर्विरोधएव ॥ अत्रहिश्ले
षस्यप्रतिभामात्रंनतुप्ररोहः ॥ नचविरोधाभासइवविरोधः ॥ श्लेषाभासःश्लेषातस्मादेवमादिषुवाक्येषुश्लेषप्रतिभोत्पत्तिहेतुरलंकारांतरमेव ॥ ७ ॥ अर्थे
केव्यादिभाषाणांच ॥ द्वित्रिचतुःपंचषण्णांभाषाणामभेदेयुगपदुक्तिर्व्यादिभाषाश्लेषाः ॥ तत्रसंस्कृतप्राकृतमागधपिशाचशूरसेनापभ्रंशभाषा
णांद्वियोगेपंचदशत्रियोगेविंशतिःचतुर्योगेपंचदश ॥ पंचयोगेषट् षड्योगेएकः ॥ सर्वमीलनेभाषाश्लेषस्यसप्तपंचाशद्भेदाः ॥ एतेचपूर्वोक्तभाषा
श्लेषाद्भिन्नार्थत्वेपिद्रष्टव्याः ॥ संस्कृतप्राकृतयोर्योगेयथा ॥ सरलेसाहसरागंपरिहररंभोरुमुंचसंरंभम् ॥ विरसंविरहायासंवोढुंतवचित्तमम
हंम ॥ ७ ॥ संस्कृतमागध्योर्यथा ॥ शूलंशालंतुशंबाविशंतुशवलावशंविशंकावा ॥ अर्शदशांदुःशीलादिशंतिकालेखलाअशिवं ॥ शंलतुगच्छत्वधि
राहंत्वित्यर्थः ॥ शंभुर्भयाम्नानुसंकीर्णाःपापकारिणइतियावत् ॥ विशंकाःसंतोवशंबंधनंयाविशंतु ॥ यतोविद्यमानोपशमानरुंयथाभवत्येव
मेतेखलाअपल्मा ॥ वर्णादृशंत्येव ॥ संस्कृतपैशाच्योर्यथा ॥ चंपककलिकाकोमलकांतिकलापाथदीपिकानंगी ॥ इच्छतिगजपतिगमनाचपलायत ३४
लोचनालवितुम् ॥ संस्कृतशौरसेन्योर्यथा ॥ अधरदलंतेतरुणामदिराभदमधुरवाणिसामोदं ॥ साधुपिबंतुसपीवरपरिणाहिपयोधरारंभा ॥ सखी

वरेत्याद्यपिसंबोधनपदं ॥ संस्कृतापभ्रंशयोर्यथा ॥ क्रीडंतिप्रसरंतिमधुकमलप्रणयिलिहन्ति ॥ भ्रमरामित्रमकविभ्रमामत्ताभूरिरसन्ति ॥ एवंद्वियो
गांतरेत्रिचतुःपंचयोगेषुचोदाहार्य्यं ॥ षड्योगेयथा ॥ अलोलकमलेचिन्नलुलामकमलालये ॥ पाहिचंडिमहामोहंभंगभीमबलामले ॥ हेचंडिदेवि
रक्षअचलयरुरुक्षि ॥ मनःप्रधानपद्मालये ॥ महामोहस्यजन्मलक्ष्मीयस्त्याअविद्यामायाभंजनेउपंयद्दलंतेनअकलंके ॥ ७ ॥ उक्तस्यान्येनान्यथा
श्लेषादुक्तिर्वक्रोक्तिः ॥ अन्येनवक्त्रान्यथोक्तस्यान्येनप्रतिवक्त्राश्लेषाद्भंगाभंगरूपादन्यथाभिधानंवक्रोक्तिः ॥ भंगाद्यथा ॥ किंगौरिमांप्रतिरुषा
ननुगौरहंकिंकुप्यामिकांप्रतिमयीत्यनुमानतोहं ॥ जानाम्यतस्त्वमनुमानतएवसत्यमित्थंगिरोगिरिभुवःकुटिलाजयंति ॥ अभंगाद्यथा ॥ कोयंद्वा
रिहरिःप्रयाह्युपवनंशाखामृगस्यात्रकिं ॥ कृष्णोहंदयितेबिभेमिसुतरांकृष्णादहंवानरात् ॥ कांतेहंमधुसूदनोव्रजलतांतामेवमध्वन्वितामि
त्थंनिर्वचनीकृतोदयितयाह्रीणोहरःपातुवः ॥ काकुवक्रोक्तिस्त्वलंकारत्वेननवाच्यापाठधर्मत्वात् ॥ तथाच ॥ अभिप्रायवान्पाठधर्मःकाकुःस
कथमलंकारीस्यादिति ॥ यायावरीयः ॥ गुणीभूतव्यंग्यप्रभेदएवायं ॥ शब्दस्पष्टत्वेनार्थांतरप्रीतिहेतुत्वात् ॥ यदाहध्वनिकारः ॥ अर्थांतरगतिःका
क्वायाचैषापरिदृश्यते ॥ साव्यंग्यस्यगुणीभावेप्रकारमिममाश्रिता ॥ साचकाकुर्द्विधासाकांक्षानिराकांक्षाच ॥ वाक्यस्यसाकांक्षनिराकांक्षत्वात् ॥ य
स्माद्वाक्याद्यादृशःसंकेतबलेनार्थःप्रतीयते ॥ नतादृशएवकिंतुन्यूनाधिकःप्रमाणबलेनतन्निर्णयमपेक्ष्यस्तद्वाक्यंसाकांक्षं ॥ तद्विपरीतंनिराकांक्षं ॥
तत्रगतात्याकांक्षावाक्यउपचर्यतेसाचप्रकरणबलान्निश्चीयते ॥ विशिष्टविषमत्वंचतस्याःततएवावसीयते ॥ विषयोपित्रिविधोर्थां
तरंतदर्थगतएवविशेषस्तदर्थाभावोवा ॥ यथा ॥ देशःसोयमरातिशोणितजलैरिति ॥ अत्रसाकांक्षकाकुप्रभावान्नतेनाप्यधिकंकृतइत्यर्थां
तरेगतिः ॥ सपस्यदशकंधरंकृतवतोपिकक्षांतरेगतःस्फुटमबंध्यतामधिपयोधिसांध्योविधिः ॥ नदाशजइहांगदःप्रहितएषसौमित्रिणाक्क
सक्कसदशाननोनतुविवेद्यतांराक्षसाः ॥ अत्रनदाशजइहांगदइतिसाकांक्षयाकाक्वाखगतावालिपुत्राचितावशेषाअर्प्यतेनिर्वाणंवारिदहनाद्
ति ॥ अत्रभवंत्वितिसाकांक्षाकाकुर्भवनाभावमाह ॥ भवंत्वितिवचनोच्चारणंत्वर्थीभावनांविदधद्भावस्यनिषेधात्मनोविपर्ययाभावनलक्षणम

र्यंति ॥ नभवंत्येवेत्यर्थः ॥ ७ ॥ भिन्नाकृतेःशब्दस्यैकार्थतेवपुनरुक्ताभासः ॥ भिन्नरूपाणांसार्थकानामनर्थकानांशब्दानामेकार्थत्वमिवामुखेनपुनःपरमा
र्थेनःपुनरुक्तवदाभासनंपुनरुक्ताभासः ॥ यथा ॥ संत्वंसम्यक्समुन्मील्यहृदिभासिविराजसेद्विषामरीणांत्वंसेनांवाहिनीमुदकंपयाः ॥ देवेविविगनरोचि
कारंहृदिसत्वाख्यंगुणंप्रकाश्यशोभसे ॥ अरीणामखिलांसेनापिकांचमूमुत्कंपितवती ॥ अत्रभासिविराजसइत्यादयःशब्दाःसार्थकाः ॥ उदकंपयःश
ब्दौनिरर्थकौ ॥ ७ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायामलंकारचूडामणिसंज्ञायांस्वोपज्ञकाव्यानुशासनवृत्तौशब्दालंकारवर्णनोनामपंचमोऽध्यायः
॥ ७ ॥ अर्थालंकाराणामेकोनत्रिंशतमाह ॥ ७ ॥ हृद्यंसाधर्म्यमुपमाकार्यकारणादिकायारसंभवादुपमानोपमेययोरेवसाधर्म्यंभवतीतितयोरे
वसमानेनधर्मेणसंबंधउपमा ॥ हृद्यंसहृदयहृदयाह्लादकारि ॥ तेनमत्वंत्तियत्वप्रमेयत्वादिसाधर्म्येणोपमा ॥ तथाकुंभइवमुखमित्यादिहृद्यभेदो
चहास्यंदोतुनदोषः ॥ हृद्यग्रहणंचप्रत्यलंकारमुपतिष्ठते ॥ साधर्म्यंचंद्रशादिभिर्भिन्नानांगुणक्रियादिसाधारणधर्मपूर्वोद्यभेदेस्थैयत्वमेवम्यात्
तेनपुरुषइवपुरुषइतिमत्यगिपुरुषइत्यस्यपुरुषत्वानुगमलक्षणेसाम्येनोपमायदातुहिंयापुरुषशब्दाशब्दशक्तिमूलव्यंग्यपरतयाइवदानकर्म
यचनस्तदानोभिन्नत्वाद्भवत्येव ॥ यथा ॥ निघ्नन्नभिमुखःशूरानेकशोबहुशःपरान् ॥ सद्यमैविचरत्येषपुरुषःपुरुषायथा ॥ एवंचयथासाधारणता
प्रतिपादनार्थमेकस्यापिभेदाकल्पनेतत्राप्युपमाभवति ॥ यथा ॥ नकेवलंभातिनितांतकांतिर्नितंबिनीसेवनितंबिनीव ॥ यावद्विलासायुधलासमध्यांसो
तद्विलोभाइवतद्विलासाः ॥ तत्रादेशेनयेमानोपमेययोर्भेदोयथा ॥ मथुरेवपाटलिपुत्रमाद्यजनपदोपरुखिपदेति — मनाद्यवज्जनपदं ॥ कालेनयथा
वसंतइवहेमंतःकामिनीमुखहेतुःक्रियमायथा ॥ वक्त्रमिवगगनमस्यासविलासंगुणेनयणगौरीनश्मा — गुभगजात्मायथा ॥ विप्रइवक्षत्रियश्री
त्रिःयःद्रव्येणयथा ॥ तीर्थकरइवगणधरस्तेजःसमवायेनयथा ॥ विषाणित्वमिवदंष्ट्रित्वाहस्तमाभोभडेनयथा ॥ मोक्षमिवसमाधौदुःखाभावः ॥ ७ ॥
सोपमानोपमेयधर्मोपसवाचकानामुपादानेपूर्णावाक्येवदिष्टिर्लुहिंस्त्र । - - - - - - - पमापमिद्धमुपमानमप्रसिद्धमुपमेयांप्रसिध्यप्रसि ३५
द्वीचकविविवक्षावशादेव ॥ धर्मेसनोक्षत्वादिःउपमानान्वकोइयवायथाशशासदृशसन्निभादयश्च ॥ अमीषामुपादानेपूर्णा ॥ साचवाक्यसमासेच

MEMORIAL

भवतिवाक्येयथा ॥ क्षणंकामज्वरोच्छित्त्यैभूयःसंतापवृद्धये ॥ वियोगिनामभूत्वांद्रीचंद्रिकाचंदनंयथा ॥ परार्थाभिधानंवृत्तिः ॥ साचयद्यपिसमासत
द्धितनामधातुभेदेनत्रिविधालुप्तायामुदाहरिष्यंते ॥ तथापीहसमासतद्धितयोरेवसंभवति ॥ यथा ॥ नेत्रैरिवोत्पलैःपद्मैर्मुखैरिवसरःश्रियः ॥ तरुण्य
इवभांतिस्मचक्रवाकैःस्तनैरिव ॥ अत्रइवेननित्यसमासः ॥ गांभीर्यमहिमातस्यसत्यंगंगाभुजंगवत् ॥ दुरालोकःससमरेनिदाघांबररत्नवत् ॥ अत्र
वार्थेतुल्यार्थेच ॥ वतिस्तद्धितः ॥ एकद्वित्रिलोपेलुप्ता ॥ उपमानादीनांमध्यादेकस्यद्वयोस्त्रयाणांवायथासंभवंलोपेलुप्तोपमासाचवाक्येवृत्तौच
एकलोपेवाक्यगतायथा ॥ अनाधिव्याधिसंबाधममंदानंदकारणंनकिंचिदन्यदस्तीहसमाधेःसदृशंसखे ॥ अत्रयद्यपिसदृशशब्दाभिधेयस्योत्कृष्ट
रगुणत्वेनाप्राप्यताप्रतिपादनादुपमानत्वंबलादायातंतथापितस्यसाक्षादनिर्देशादुपमानस्यलोपः ॥ तथा ॥ धन्यस्यानन्यसामान्यसौजन्योत्क
र्षशालिनः ॥ करणीयंवचश्चेतःसत्यंतस्यामृतंयथा ॥ अत्राल्हादकत्वादिधर्मलोपः ॥ उपमेयोपमावाचकयोस्तुवाक्येलोपोनसंभवति ॥ द्विलोपेयथा
दुंदुल्लितुमार्गिहिसिकंटकलियाइंकेअइवणाइं ॥ मालइकुसुमेणसमंभमंरेभमंतोनपाविहिसि ॥ अत्रधर्मोपमानयोर्लोपः ॥ वृत्तौएकलोपेयथा ॥ अना
धिव्याधिसंबाधममंदानंदकारणं ॥ नकिंचिदन्यदस्तीहसमाधिसदृशंसखे ॥ अत्रसमासेउपमानस्यानिर्देशः ॥ तथा ॥ राजीवमिवतेवक्त्रंनेत्रेनीलोत्प
लेइवारंभास्तंभाविवोरूचकरिकुंभाविवस्तनौ ॥ अत्रोवनित्यसमासेधर्मलोपः ॥ तथा ॥ शरदिंदुसुंदरमुखीकुवलयदलदीर्घलोचनासामोद
हन्तिमनःकथमनिशंरंभागर्भाभिरामोरूः ॥ अत्रबहुव्रीहौउपमावाचकलोपः ॥ तथा ॥ मृधेनिदाघघर्मांशुदर्शोपमाश्यंतितंपरे ॥ सपुनःपार्थसंचारेस
चरत्यवनीपतिः ॥ अत्रनित्यसमासेकर्तुर्णिनिवोपमावाचकलोपः ॥ यथावा ॥ पूर्णेंदुकल्पवदनामृणालीदेश्यदोर्लता ॥ चक्रदेशीयजघनासास्व
प्नेपिनदृश्यते ॥ अत्रतद्धितवृत्तौधर्मलोपः ॥ इवार्थश्चकल्पवादिभिःसाक्षादभिहितईषत्परिसमाप्तःपूर्णेंदुरितिपूर्णेंदुसदृशमित्यर्थानतुपूर्णेंदुरि
वेति ॥ ईषदपरिसमाप्तिविशिष्टेऽर्थेकल्पबादीनांस्मरणात् ॥ ईषदपरिसमाप्तःपूर्णेंदुरितिवचनव्यत्यायद्यपिरूपकच्छायांभजंतेतथापिप्रातीतिकेन
रूपेणोपमैव ॥ तथाह्यत्रपूर्णेंदुसदृशंवदनमित्ययमर्थःप्रतीयतेनत्वीषदपरिसमाप्तःपूर्णेंदुरिति ॥ यथावा ॥ सूर्यायतिस्मधारश्मिमनाभतिमस्ताय

ते॥ मृतस्तु कांताविरहे स्वर्गोपि नरकीयति॥ अत्र नामधातुवृत्तौ कर्माधारयोः क्यङ्कर्तुः क्विपि च इवद्वयलोपः॥ द्विलोपे यथा॥ ढुंढुल्लंतु मरीहिसि कंटयकलि
२० याइं केयइवणाइं॥ मालइकुसुमसरिच्छं भमर भमंतो न पाविहिसि॥ अत्र कुसुमसदृक्षमिति समानधर्मस्योपमानस्य च लोपः॥ तथा॥ परिपंथिमनोराज्य
शतैरपि दुराक्रमः॥ संपरायप्रवृत्तोसौ राजते राजकुंजरः॥ अत्र समासे धर्मस्येवस्य च लोपः॥ यथा वा॥ अरातिविक्रमालोकविकस्वरविलोचनः॥ कृपाणोद
ग्रदोर्दंडः स सहस्रायुधीयति॥ अत्र नामधातुवृत्तौ सहस्रायुधमिवात्मानमाचरतीत्यात्मा उपमेयः सर्वेवादिश्च लुप्तः॥ आचारलक्षणश्च धर्मः क्यच्प्रत्यये
न साक्षादभिहितः॥ तथा॥ रविना विधवति विधुरपि संवितरति तथा दिनंति यामिन्यः॥ यामिनयंति दिनान्यपि सुखदुःखवशीकृते मनसि॥ अत्र नामधा
तुवृत्तौ धर्मस्योपमावाचकस्य लोपः॥ त्रिलोपे यथा॥ मृगनयनेति॥ मृगस्य नयने इव नयने यस्याः इति प्रथमं तत्पुरुषस्ततो मृगनयने इव नयने यस्या इति उष्ट्रमुखादि
त्वाद्बहुव्रीहिः॥ अत्र गुणद्योतकोपमानशब्दानां लोपः यदा तु मृगशब्द एव लक्षणया मृगनयनवृत्तिस्तदा मृग इव नयने यस्या इति उष्ट्रमुखादित्वाद्बहुव्रीहिः
अत्र गुणद्योतकोपमानशब्दानां लोपः यदा तु मृगशब्द एव लक्षणया मृगनयनवृत्तिस्तदा मृग इव नयने यस्या इति रूपकसमासस्यैकविषयानत्व
स्योपमासमासस्येति नास्ति रूढानुपमायास्त्रिलोपिन्याः केचित्तु॥ अयःशूलेनान्विच्छत्यायःशूलिक इत्यादौ क्रूराचरोपमेयं तस्य धर्मवादीनां लोपात्त्रि
लोपिनामुपमामुदाहरंति॥ तन्नयुक्तं॥ क्रूरस्याचारस्यार्थान्वेषणोपायादेरयःशूलतयाध्यवसानादतिशयोक्तिरेवेयं॥ एवं दांडाजिनिकइत्यादिष्वपि द्र
ष्टव्यम्॥ मालोपमादयस्तूपमायामनातिरिच्यंत इति न पृथग्लक्षिताः॥ तथा हि॥ सौहब्वलरुणमुहं वणमालवविअइंदहरिवइस्सदुरम्॥ किन्तिवपवणतण
यं अणिबवलाइं सेवलज्जणदिट्ठी॥ इयमभिन्ने साधारणे धर्मे ज्योत्स्नेव नयनानंदः स्फुरेव मदकारणं॥ प्रभुतेव समाक्रष्टसर्वलोका नितंबिनी॥ अतिभिन्ने
वानम्भिन्नकस्यैव बहूपमानोपादानम्॥ मालोपमा॥ तथा॥ यामइव याति दिवसो दिनमिव मासोथ मासवद्वर्षं॥ वर्षमिव यौवनमिदं यौवनमिव जीवितं
जगतः॥ नभइव विमलं सलिलं सलिलमिवानंदकारि शशिबिंबं॥ शशिबिंबमिव लसत्कृति तरुणीवदनं शरत्कुरुते॥ अत्र यथोत्तरमुपमेयस्योपमा २०
नत्वे पूर्ववद्भिन्नाभिन्नधर्मत्वे रसनोपमाः॥ अलिवलयैरलकैरिव कुसुमस्तबकैः स्तनैरिव वसंते॥ भांति लता ललना इव पाणिभिरिव किसलयैः

सपदि॥ तथा॥ कमलदलैरधरैरिव दशनैरिव केसरैर्विराजंते॥ अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः॥ अत्रोपमानोपमेययोरवयवि
नोः समस्तविषया॥ अवयवानां चैकदेशविषया नयाननमिवांभोजमंभोजमिव ते मुखं॥ निलीनानलिनीषांडकथं तुलांलभेमहि॥ अत्रोभयोरु
पमेयत्वे उपमानत्वे वा पर्यायोपमा॥ त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव त्वन्मूर्तिरिव मूर्तिस्ते त्वमिव त्वं कृशोदरि॥ अत्रैकस्योपमानत्वोपमेयत्वे
नत्वयः॥ गुणैर्यदि व्योम्नि पृथक्ताव्याहावा काशगंगापयसा पतेतां तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥ अत्रासद्भूतस्योपमानसं
भावनादुत्पाद्योपमा॥ तासां तु पश्चात्कनकप्रभाणां काली कपालाभरणा चकासे॥ बलाकिनी नीलपयोदराजिः पुरःपरिक्षिप्तशतह्रदेव॥ अत्रपये
ष्टविशेषणैरुपमेयं परिकल्प्य तादृशमेव सिद्धमुपमानमुपात्तमिति कल्पितोपमेत्यादौ॥ आसां हि पृथग्लक्षणकरणे एवंविधवैचित्र्यसहस्रसंभवा
दतिप्रसंगः स्यादिति॥ ५॥ असम्भसंभावनमिवादिद्योत्योत्प्रेक्षा॥ प्राकरणिकेऽर्थेऽसंतो ये धर्मा गुणक्रियालक्षणास्तदभावलक्षणा वा तेषां संभा
वनं तद्योगोत्प्रेक्षणमुत्प्रेक्षा॥ सा चेयमन्येत्राके ध्रुवं प्रायो नूनमित्यादिभिः शब्दैर्द्योत्यते॥ यथा॥ बलं जगद्ध्वंसनरक्षणक्षमं क्षमा च किं संगमकेळू
सागसि॥ दृशीव संचिन्त्य विमुच्यमानसं रुषेव रोषस्तव नार्थिनिर्ययौ॥ अत्र रोषलक्षणस्य गुणस्योत्प्रेक्षा॥ असंतोषादिवारूढकर्णयोः प्राप्तशासनः॥
स्वधाम कामिनीनेत्रे प्रसारयति मन्मथः॥ अत्र संतोषगुणाभावस्य॥ विपतिविसर्पतीव कुमुदेषु बहूभवतीय योषितां प्रतिफलतीव जरठशरकां
डविपांडुगंडभित्तिषु॥ अंभसि विकसतीव हसतीव सुधाधवलेषु धामसु ध्वजपटपल्लवेषु ललतीव समीरचलेषु चंद्रिका॥ अत्र क्रियायाः
कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ॥ अपश्यंताविवान्योन्यमीदृक्षां क्षामतां गतौ॥ अत्र दर्शनक्रियाभावस्य एवं च॥ हिरण्मयी साललतेव
जंगमाच्युता दिवः स्थास्नुरिवाचिरप्रभा॥ शशांककांतैरधिदेवताकृतिः सुता ददे तस्य सुताय मैथिली॥ अकालसंध्यामिव धातुमत्तां॥ तथा॥ आव
र्जिता किंचिदिव स्तनाभ्यां वासो वसाना तरुणार्करागं॥ पर्याप्तपुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव॥ तथा॥ अचिराभामिव घनान्ज्योत्स्ना
मिव कुमुदबंधुनाविकलां॥ रतिमिव मन्मथरहितां श्रियमिव हरिवक्षसः पतितां॥ तथास्थितः पृथिव्या इव मानदंडइत्यादावुत्प्रेक्षावुत्प्रेक्षाबुद्धिर्न

विधेया यद्यप्येषुस्वरूपेनोविशेषणतश्चौपमानंकल्पितं ॥ तथाप्यार्थमेव ॥ उपमानोपमेययोःसाधर्म्यस्यतद्वाचकानांचप्रतीयमानत्वात् ॥ ५ ॥
सादृश्येभेदेनारोपोरूपकमेकानेकविषयं ॥ सादृश्येनिमित्तेसतिभेदेनविषयिणोर्निर्देशेन आरोपः तथाभूतेपितथात्वेनाध्यवसायोस्य
यस्येकोत्तानयतीतिरूपकम् आरोप्यमाणरूपेणारोपविषयस्यरूपवतःक्रियमाणत्वात् ॥ सादृश्यग्रहणंकार्यकारणभावादिनिमित्तांतरव्यु
दासार्थं ॥ तेनायुर्घृतमित्यादौनरूपकं ॥ भेदग्रहणमभेदारोपनिरासार्थं ॥ तत्रत्वतिशयोक्तिर्वक्ष्यते ॥ तच्चएकमनेकंचारोपस्यविषयोयत्र
तत्तथा ॥ तत्रैकविषयं ॥ यथा ॥ कुरंगीवांगानिस्तिमितयतिगीतध्वनिषुयत्सखींकांतोदंतंश्रुतमपिपुनःप्रश्नयतियद्विनिद्रंयच्चांतःस्वपिति
तदहोवेद्म्यभिनवांप्रवृत्तोस्याःसेक्तुंहृदिमनसिजःप्रेमलतिकां ॥ यत्रत्वेकस्मिन्विषयेऽनेकान्यारोप्याणितदप्येकविषयंयथा ॥ सौंदर्यस्यत
रंगिणीतरुणिमोत्कर्षस्यहर्षोद्गमःकांतेःकार्मणकर्मनर्मरहसामुल्लासनावासभूः ॥ विद्यावक्रगिरांविधेरनवधिप्रावीण्यसाक्षात्क्रियाबाणाःपं
चशिलीमुखस्यललनाचूडामणिःसाप्रिया ॥ यत्रचैकत्रविषयेआरोप्यश्रौतंविषयांतरेतुगम्यंतदप्येकविषयंयथा ॥ जस्सरणंतेउरएकरेकुण
तस्समंडलग्गलयमाससंमुहीविसहसापरम्मुहीहोइरिउसेणा ॥ अत्ररणस्यांतःपुरत्वारोपःश्रौतोमंडलाग्रलतायानायकत्वंरिपुसेनायाश्च
प्रतिनायकात्वमर्थसामर्थ्यादवसीयते ॥ अनेकविषयंयथा ॥ यस्याबीजमहंकृतिर्गुरुतरोमूलंममेतिग्रहोनित्यत्वस्मृतिरंकुरःसुतसुहृज्ज्ञात्या
दयःपल्लवाः ॥ स्कंधोदारपरिग्रहःपरिभवःपुष्पंफलंदुर्गतिःसामेत्वच्चरणार्हणापरशुनातृष्णालताछूयतां ॥ यथावा ॥ इंद्रस्त्वंनवबाहुज
यलक्ष्मीद्वारतोरणस्तंभौखड्गःकृतांतरसनारसनांवसरस्वतीराजन् ॥ एवंचान्योन्यरूपकाप्रभेदावर्ण्यंते ॥ यथा ॥ ललनाःसरोरुहिण्यःक
मलानिमुखानिकेसरैर्दशनैः अधरैर्दलैश्चतासांनवबिसनालानिबाहुलताः ॥ इदंसहजावयवरूपकं ॥ गाजानगाःकुचामेघाःशृंखलाःपन्नगाअ
पि ॥ यंतारोहिशिरोभागेभ्रमराहरिणास्तथा ॥ इदमाहार्यावयवं ॥ अलिकुलकुंतलभाराःसरसिजवदनाशुकवाककुचाः ॥ राजंतिहंसव
सनाःसंप्रतिवापीविलासिन्यः ॥ इदमुभयावयवमित्यादि ॥ तेनलक्षिताः उक्तलक्षणेनैवसंगृहीतत्वात् ॥ एवंविधवैचित्र्यसहस्रसंभवाच्चाति

प्रसंगःस्यात् ॥ यदाह ॥ नपर्यंतोरूपकानांरूपकोपमयोरतः ॥ दिग्मात्रंदर्शितंधीरैरनुक्तमनुमीयतामिति ॥ ५ ॥ दृष्टार्थसिद्धेर्दृष्टांतोनिदर्शनं ॥ दृ
ष्टस्यसामान्यरूपस्यविशेषरूपस्यवाप्राकरणिकस्यार्थस्यसिद्ध्यैयोदृष्टांतःसातेदर्श्यते ॥ प्राकरणिकोऽर्थोऽत्रेतिनिदर्शनं ॥ यथा ॥ होइतगुणाणु
राउजडाणणवरंपसिद्धिसरणाणाकिरपण्डुवइससिमणीचंदेवापियामुहेदिट्ठे ॥ यथावा ॥ उपरिघनंघनपटलंदूरेदयितातदेवमदापतितं ॥
हिमवतिदिव्यौषधयःकोपाविष्टःफणीशिरसि ॥ यथावा ॥ देवीभावंगमितापरिवारपदंकथंभजत्येषा ॥ नखलुपरिभोगयोग्यंदैवतरूपांकितरत्नं ॥
॥ यथावा ॥ क्वसूर्यप्रभवोवंशःक्वचाल्पविषयामतिः ॥ तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरं ॥ यथावा ॥ अत्युन्नतपदाध्यासःपतनायेत्यर्थशालिनांशंसत्
आपांडुपततियत्रंतरोरिदंबंधनग्रंथेः ॥ एतेसाधर्म्येणनिदर्शनप्रकाराः ॥ वैधर्म्येणापियथा ॥ गुणानामेवदौरात्म्याद्धुरिधुर्यानियुज्यंते ॥ असंजातकि
णस्कंधःसुखंस्वपितिगौर्गलिः ॥ तथाहवैसाहसकर्मनर्मणःपाणिंग्रहाणात्तिकमानिनीपतेः ॥ भेदाःपरेषांविशरारुतामगुर्दधत्यवानस्थिरतांहिपां
सवद्रति ॥ ५ ॥ प्रकृताप्रकृतानांधर्मैक्यंदीपकम् ॥ बहुवचनंसमस्तव्यस्तपरिग्रहार्थम् ॥ तेनप्रकृताप्रकृतानांप्राकरणिकाप्राकरणिकानामर्थादु
पमानोपमेयत्वे ॥ प्रकृतानामप्रकृतानांचकेवलानांधर्मक्रियादिर्यदैकएवप्रयुज्यतेतदादीपवदेकस्थानस्थमनेकदीपनाद्दीपकम् ॥ यथा ॥ चं
दमऊएहिंनिसाणलिणीकमलेहिं ॥ कुसुमगुच्छेहिंलयाहंसेहिंसरयसोहाकव्वकहासज्जणेहिंकीरइगरुई ॥ अत्रकाव्यकथाप्रकृताशेषाण्य
प्रकृतानि ॥ गुरुकीकरणमेकाक्रिया ॥ यथावा ॥ मदोजनयतिप्रीतिंसानंगंमानभंगुरं ॥ सप्रियासंगमोत्कंठांसासह्यांमनसःशुचम् ॥ अत्रमदादीय
प्राकरणिकतयाविवक्षितेतदुपमेयम् ॥ शेषाण्युपमानानि ॥ नचक्रमिकत्वमुपमारूपान्दीतिवाच्यम् ॥ रामइवदशरथोभूद्दशरथइवरघुराजापि
रघुसदृशः ॥ अजइवदिलीपवंशश्चित्रंरामस्यकीर्तिरियमित्यादौक्रमिकत्वेप्युपमादर्शनात् ॥ प्रकृतानांधर्मैक्यंयथा ॥ पांडुक्षामंवदनमिति ॥ य
थावा ॥ हंसाणसरेहिंसिरीसारिज्जइअहसराणंहंसेहिं ॥ अण्णोण्णंचियएएअप्पाणंनवरगरुयन्ति ॥ अप्रकृतानांयथा ॥ कुमुदकमलनीलनीरजा
लिर्ललितविलासजुषोर्दृशोःपुरस्का ॥ अमृतममृतरश्मिरंबुजन्मप्रतिहतमेकपदेतवाननस्य ॥ स्खियतिकूणतिवेल्लतिविचलतिनिमिषतिविलो

कपतितिर्यक्॥ अंतर्नंदति चुंबितुमिछति नवपरिणाया वधः शयने॥ इत्यादौ तु जातेरेव चमत्कारो न दीपकस्येति कारकदीपकं न लक्ष्यं ने॥ ४॥ सामान्ये विशेषे कार्यकारणे प्रस्तुते तदन्यस्य तुल्ये तुल्यस्य चोक्तिरन्योक्तिः सामान्ये प्रस्तुते तदन्यस्य विशेषस्य विशेषे सामान्यस्य कार्ये कारणस्य कारणे कार्यस्य सदृशे तत्सदृशस्य चान्यस्याप्रस्तुतस्योक्तिरभिधानमन्योक्तिः॥ अत्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेप इत्यर्थः॥ एरावणं स्पृशनिर्मन्त्रयंत मरुद्भिर्यज्ञं परामृशति योधसार्थान्॥ भंगस्तदानि ५ विषमीकुरुते महेंद्रस्त्वकं कयानिशिनयाति नरेंद्रनिद्रां॥ अत्र त्यक्षयेन कश्चित्कालं शेत इति सामान्ये प्रस्तुते विशेष उक्तं॥ अहो संसारनैर्घृण्यमहो दौरात्म्यमापदा॥ अहो निसर्गजिह्मस्य दुरंतागतयो विधेः॥ अत्र क्वापि वस्तुनि विनष्टे विशेषात्मनि प्रस्तुते दैवस्वातंत्र्यं सर्वत्र सामान्यरूपमप्रस्तुतं वर्णितम्॥ ययांत्याप्यदायप्रीतिं नोपशांतिश्च मनेषु च॥ तैर्बांधवास्ति सहृदो लोकः सार्थपरोऽपरः॥ अत्र जरासंधः कार्यरूपाश्छेद्य वचनं नामात्मनोभिव्य —॥ सहृद्बांधवरूपत्वं प्रस्तुतं वर्णयति॥ तस्मिन्नपारि आयं कुरु हृत्सञ्छिविरहृयंमकुमहस्स उरक्रमगामिभहण पुरउ अमुद्यंदं च हरजडापश्चारं॥ अत्र जांबवान् वृद्धसेवाचिरजीवित्वं व हारकौशकौंदो मंत्रिना कारणे प्रस्तुते कौस्तुभलक्ष्मीविरहितहरिवक्षः स्मरणादिकमप्रस्तुतं कार्यं वर्णयति॥ तुल्ये प्रस्तुते तुल्यस्याभिधाने द्वौ प्रकारौ श्लिष्टविशेषणतासादृश्यमात्रं वा तुल्यांतरस्याक्षेपहेतुः॥ यथा॥ नालस्य प्रसरो जडेष्वपि कृतावासस्य कोशे रुचिर्दंडे कर्कशता मुखे च मृदुता मित्रे महान्प्रश्रयः॥ आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे यस्यैषा स्थितिरंबुजस्य वसतिर्युक्तैव तत्र श्रियः॥ अत्राप्रस्तुतेनांबुजेन तुल्यविशेषणबलात्तुल्यः सत्पुरुष आक्षिप्यते॥ आदाय वारि परितः सरितां मुखेभ्यः किं तावदर्जितमनेन दुरर्णवेन॥ क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च॥ अत्रार्णवस्य गर्हणया न्यायोपार्जितधनत्वादिप्रतीयमानसादृश्यः कश्चित्पुरुषविशेषण आक्षिप्यते॥ विशेष्यश्लिष्टता तु अन्योक्तिप्रयोजकतया न वाच्या॥ यथा॥ पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयने न महानपि स्यात्॥ अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषोत्तमेन॥ अत्र पुरुषोत्तमशब्दस्यार्थद्वयवाचकत्वेपि सत्पुरुषचरितस्य प्रस्तुतत्वादभिधा एकत्र नियंत्रितेति सत्पुरुष एवान्योन्य विष्णुस्त्वक्षरितस्याप्रस्तुतत्वात्॥ नत्वनिपत्तिस्तु शब्दश

क्तिमूलाध्वनेर्विषयत्वेपि च सत्पुरुषस्य विष्णोरिव विश्वोद्धरणे शक्तिर्नास्ति तथापि गुणवत्त्वात्संभवतीति न दोषः॥ अन्योक्तिश्च क्वचित्स्तुतिरूपा यथा॥ नालस्य प्रसर इति॥ क्वचिन्निंदारूपा यथा॥ आदाय वारीति॥ क्वचिदुभयरूपा यथा॥ निष्कंदामरविंदिनीं स्थपुटिनोद्देशां कसेरुरुज्झितां जंबालाविलमंबु कर्तुमितरा सूतेव गाहीकृतान दंष्ट्रायां च तुरणबीभिर्पटले गाह्मा विनायामि यं यस्या एव शिशोः स्थितावियदिभूः सा पुत्रिणी पौत्रिणी अत्र पूर्वार्द्धे निंदा उत्तरार्द्धे तु स्तुतिः॥ केचिदनुभयरूपा यथा॥ इतो वसति केशवः पुरमितस्तदीयद्विषामितोपि शरणागताः शिखरिपक्षिणः शेरते॥ इतोपि च वडवानलः सह समस्तसंवर्तकैरहो विततमूर्जितं भरसहं च सिंधोर्वपुः॥ अत्र निंदास्तुतिर्वा विस्मयोक्तावेवास्तमयत इत्यनुभयरूपा॥ ७॥ व्यंग्यस्योक्तिः पर्यायोक्तं॥ व्यंग्यस्य प्रतीयमानस्यार्थस्य अभिधानं यत्तत्पर्यायेण भंग्यंतरेण कथनं पर्यायोक्तं॥ अत एव चान्योक्तेरस्य भेदः॥ नहि नत्र गम्यमानस्यार्थस्य भंग्यंतरेणाभिधानमपि त्वप्रस्तुतद्वारेण तस्याक्षेप इति॥ शत्रुच्छेददृढेच्छस्य मुनेरुत्पथगामिनः॥ रामस्यानेन धनुषा देशिता धर्मदेशना॥ अत्र भीष्मेण भार्गवो जित इति व्यंग्यस्य दर्शिता धर्मदेशनेत्यनया भंग्या भणनम्॥ ७॥ विशेषविवक्षया भेदाभेदयोगायोगव्यत्ययोऽतिशयोक्तिः प्रकृतस्यार्थस्य विशेषवर्णने दक्षमाभेदस्य व्यत्ययो भेदाभिधानं यत्तदतिशयाभिधानादिकातिशयोक्तिः॥ यथा॥ कधान दृशा सेरुपवनवक्रैरनुसृतां किरन् धैरस्तामछां लवलिफलपाकप्रणयिनीम्॥ उपप्राकाराग्रं प्रहिणु नयने तर्कय मनाग नाकाशे कोयं गलितहरिणः शीतकिरणः॥ अत्र मुखचंद्रयोर्भेदेपि अभेदः॥ यथा वा॥ अपि दियर किं न पेच्छसि आआसं किं मुहा पलोएसि॥ जायाए बाहुमूलम्मि अद्धयंदाण परिवाडिं॥ अत्र नखार्द्धचंद्राणां अभेदस्य व्यत्ययो भेदो द्वितीया यथा॥ अण्णं लडहत्तणयं अण्ण विय का वि वत्तणच्छाया॥ सामा सामण्णपयावइसंरेहविआ न होइ॥ अत्र लट्ठभत्तादेरभेदवर्णस्यैव भेदेनाभिधानं॥ योगस्य संबंधस्य व्यत्ययो मंबंधस्तृतीया यथा॥ मल्लिकामालभारिण्यः सर्वांगीणार्द्रचंदनाः॥ क्षौमवत्यानलक्ष्यंते ज्योत्स्नायामभिसारिकाः॥ अत्राभिसारिकाणां लक्षणक्रियायोगेपि ज्योत्स्नाबाहुल्योत्कर्षविवक्षया योग उक्तः॥ यथा वा॥ अयां गतरलेदृशो मधुरवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखं॥ इतिस्फुरितमंगके मृगदृशां स्वतो लील मान

४०

दशनमदोद्याःकृतपदोपिसंलक्ष्यते॥ अत्रमदोदयस्यलक्षणंपिस्वाभाविककिरमाणामुत्कर्षविवक्षयालक्षणम्यायोगउक्तः॥ यथा॥ पत्नोन्निण
सत्त्वविउजैसिपसरंतपल्लुवारुणराउ॥ मज्जणतम्मिसमनुनहमयनंबेमरोंअणेसअमरिसोइति॥ अयोगस्यव्यत्ययोयोगश्चतुर्थोयथा॥ पश्चा
त्पर्यस्यकिरणानुदीर्णचंद्रमंडलं॥ प्रागेवहरिणाक्षीणामुदीर्णोरागसागरः॥ अत्रानुदूतेचंद्रेरागसागरवृद्धेरयोगेपिचंद्रस्योद्दीपनविभावनाति
शयप्रतिपादनार्थंयोगउक्तः॥ यथावा॥ पुराणियस्यांसवरांगनानिवरांगनारूपपुरस्कृतांग्यः॥ रूपंसमुन्मीलितसद्विलासमस्त्रंविलासाकुसुमा
युधस्य॥ तथा॥ नतज्जलंयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदंनषट्पदोसौकलगुंजितोनयोनगुंजितंतन्नजहारयन्मनः॥ अत्रवरांग
नादीनांपंकजादीनांचनिःशेषतयापुरजलादिव्याप्तेरयोगेपियोगउक्तः॥ यथावा॥ उदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नियातिचास्तं
वहतिगिरिरयंविलंबिघंटाद्वयपरिवारितवारणेंद्रलीलां॥ अत्रवारणेंद्रलीलांगिरिर्वहतीत्यसंबंधेपिसंबंधः॥ यद्वागिरिवारणेंद्रगतयोर्भेदेप्यै
क्यमध्यवसितमिति॥ यथावा॥ दिवमप्युपयातानामाकल्पमनल्पगुणगणायेषां॥ रमयंतिजगंतिगिरःकथमिवकवयोननेवंद्याः॥ अत्रदिवं
गतकविगुणानांरमणायोगेपियोगउक्तः॥ यथा॥ हृदयेचक्षुषिवाग्निवतवंसेवाभिनवयौवनावसति॥ वयमत्रनिरवकाशाविरमकृतंपादपतनं
ने॥ अत्रैकस्ययुगपदनेकत्रस्थित्यायोगेपियोगउक्तः॥ एवंविधेचसर्वत्रविषयेऽतिशयोक्तिरेवप्राणत्वेनावतिष्ठते॥ तांविनाप्रायेणालंकारत्वायोगादि
तिसामान्यमीलितैकावलीदृष्टांतविशेषाद्यलंकारोपन्यासःश्रेयान्॥ ६९॥ विवक्षितस्यनिषेधइवोपमानस्याक्षेपश्चाक्षेपः॥ विशेषविवक्षये
त्यनुवर्त्तते॥ वस्तुमिष्टस्यप्राकरणिकत्वात्प्रधानस्याशक्यवक्तव्यत्वमतिप्रसिद्धत्वंवाविशेषंवक्तुंनिषेधइवनतुनिषेधएवनिषेधमुखेनविशेषाव
तात्पर्यादित्येकआक्षेपः॥ उपमानस्यचआक्षेपःतिरस्कारःसोन्यः॥ निषेधोयथा॥ अहंत्वांयदिनोक्षेयक्षणमप्युत्सुकाततः॥ इयदेवास्त्वतोन्येन
किमुक्तेनाप्रियेणते॥ अयंवक्ष्यमाणमरणविषयोनिषेधाभासआक्षेपः॥ उक्तविषयोपियथा॥ ज्योत्स्नामौक्तिकदामचंदनरसःशीतांशुकांतद्रवः ४०
कर्पूरंकदलीमृणालवलयान्यंभोजिनीपल्लवाः॥ अंतर्मानसमास्त्वयाप्रभवतातस्याःस्फुलिंगोत्करव्यापारायभवंतिहंतकिमनेनोक्तेननब्रूमहे

उपमानाक्षेपोयथा॥ तस्यास्तन्मुखमस्तिसौम्यसुभगंकिंपार्वणेनेंदुनासौंदर्यस्यपदंदृशौयदिचतेकिंनामनीलोत्पलैः॥ किंवाकोमलकांति
भिःकिसलयैःसत्येवतत्राधरेहाधातुःपुनरुक्तवस्तुरचनारंभेष्वपूर्वोग्रहः॥ यथावा॥ गर्वमसंवाह्यमिमंलोचनयुगलेनवहसिकिंभद्रे॥ संती
दृशानिदिशिसरःसुतनुनीलमलिनानि॥ अत्रलोचनयुगलस्योपमानीकृतस्याक्षेपः॥ यथावा॥ अहमेवगुरुःसुदारुणानामितिहालाहल
तातमास्मदृप्यः॥ ननुसंतिभवादृशानिभूयोभुवनेस्मिन्वचनानिदुर्जनानां॥ अत्रहालाहलस्योपमानस्याक्षेपइतिप्रतीपमलंकारांतरम्॥ ७
अर्थानांविरोधाभासोविरोधः॥ जातिगुणक्रियाद्रव्यरूपाणांपदार्थानांसजातीयेनविजातीयेनवावस्तुवृत्त्याविरोधेपिपरस्परप्रतिबंधलक्ष
णोव्याघातलक्षणोवायोविरोधस्तदाभासमानोविरोधः॥ तत्रजातेर्जात्यायथा॥ एकस्मिन्नेवनतौबिभर्त्तियुगपन्नरत्वसिंहत्वे॥ मनुजत्वव
राहत्वंतथैवयोविभुरसौजयति॥ गुणेनयथा॥ द्रोणाश्वत्थामरामेषुभुक्ताश्रुत्वाद्यंकितं॥ ब्राह्मण्यमथसौर्यंचकोनचित्रीयतेपुमान्॥ क्रिय
यायथा॥ सिंहोपिपरिभूयते॥ द्रव्येणयथा॥ सृजतिचजगदिदमवतिचसंहरतिचहेलयैवयोनियतं॥ अवसरवशतःशफरोजनार्दनःसोपिचित्रमि
दं॥ गुणेनगुणस्ययथा॥ सत्यंत्वमेवसरलोजगतिजराजनितकुब्जभावोपि॥ ब्रह्मन्परमसिविमलोविततोध्वरधूममलिनोपि॥ क्रिययायथा॥ पेसलम
पिखलवचनंदहतितरांमानसंसतत्त्वविदं॥ परुषमपिसुजनवाक्यंमलयजरसवत्प्रमोदयति॥ द्रव्येणयथा॥ क्रौंचाद्रिरुद्दामदृषद्दृढोसौयन्मार्ग
णानर्गलशातपाते॥ अभूत्नवांभोजदलाभिजातःसभार्गवःसत्यमपूर्वसर्गः॥ क्रियायाःक्रिययायथा॥ बालमृगलोचनायाश्चरितमिदंचित्रम
त्रयदासौमां॥ जयतिसंतापयतिचदूरेहृदयेचमेवसति॥ द्रव्येणयथा॥ सीतांददाहनैवाग्निर्हिमंदहतिभूरुहः॥ नाप्यंतेशशिनाचित्रंविरहेकामिनो
भृशं॥ द्रव्यस्यद्रव्येणयथा॥ समदमतंगजमदजलनिःसंगतरंगिणीपरिष्वंगात्॥ क्षितितिलकत्वयितटजुषिशंकरजटापगापिकालिंदी॥ एवंदशभेदाः
एषुपरस्परप्रतिबंधोविरोधः॥ व्याघातोयथा॥ अपसज्जनसांगत्यनवसत्येवनैकृतं॥ अक्षालितविशुद्धेषुहृदयेषुमनीषिणां॥ अत्रक्षालना
भावेविशुद्धिर्व्याहन्यते॥ यथावा॥ महार्द्देनिकुलेजन्मरूपंस्मरसुहृद्वयः॥ तथापिनसुखप्राप्तिःकस्यचित्रीयतेनधीः॥ तथा॥ सएकस्त्रीणिजय

तिजगंतिकुसुमायुधः॥ हरतापितनुयस्यशंभुनानदूतंबलं॥तथा॥ कर्पूरइवदग्धोपिशक्तिमान्योजनेजने॥ नमोस्त्ववार्यवीर्यायतस्मैकुसुमधन्व
४१ नो॥ एवंकारणसामग्र्येफलाभावोव्याहन्यते॥यथावा॥ साबालावयमप्रगल्भमनसःसास्त्रीवयंकातराःसापीनंपरिणाहिनंस्तनभरंधत्तेसखि
दावयं॥ साक्रांताजघनस्थलेनगुरुणागंतुंनशक्तावयंदोषैरन्यजनाश्रितैरपटवोजाताःस्मइत्यद्भुतं॥ अत्रान्यदेशस्थेनकारणेनान्यदेशस्थकार्यो
त्पादोव्याहन्यते॥यथावा॥ दिशामलीकालकभंगतांगतंस्त्रयीवधूकर्णतमस्त्यद्भुतं॥ अत्रान्यदेशस्थेनकारणेनान्यदेशस्थकार्योत्पादोव्याहन्यते
॥यथावा॥दिशामलीकालकभंगितांगतस्त्रयीवधूकर्णतमालपल्लवः॥ चकारयस्याध्वरधूमसंचयोमलीमसःशुक्लतरंनिजंयशः॥ अत्रमलीम
सेनशुक्लतरीकरणंव्याहन्यते॥यथावा॥ अनंदममंदमिमंकुवलयदललोचनेददासित्वंविरहस्त्वयैवजनितस्तापयतितरांशरीरं॥ अत्रानंद
दानंशरीरतापेनव्याहन्यते॥ शिरीषादपिमृद्वंगीक्वेयमायतलोचना॥ अयंक्वचकुकूलाग्निकर्कशोमदनानलः॥ अत्रमार्दवकार्कश्येनव्याहन्यते
॥तथा॥ विपुलेनसागरशयस्यकुक्षिणाभुवनानियस्यपपिरेयुगक्षये॥ मदविभ्रमासकलयापपेपुनःसपुरस्त्रियैकतमयैकयादृशा॥ अत्रही
नेनगुरुकार्यकरणंव्याहन्यते॥तथा॥ किंददातुकिमश्नातुभर्तव्याभरणाकुलः॥ उदारमनिरान्तेतिजगत्त्रितयमात्रके॥ अत्राधिक्येनस्वल्प
कार्याकरणंव्याहन्यते॥यथावा॥ अहोविशालंभूपालभुवनत्रितयोदरं॥ मातिमातुमशक्योपियशोराशिर्यदत्रते॥ अत्रमानाशक्यत्वेनमानंव्या
हन्यते॥तथा॥ भवत्संभावनोत्थायपरितोषायमूर्छते॥ अपिव्यातदिगंतानितांगानिप्रभवंतिमे॥ अत्रांगानामतिविपुलतयापरितोषामानंव्या
हन्यते॥यथावा॥ दृशादग्धंमनसिजंजीवयंतिदृशैवयाः॥ विरूपाक्षस्यजयिनीस्ताःस्तुवेवामलोचनाः॥ अत्रदृशैवदाहोजीवनंचव्याहन्यते॥यथावा॥
धवलोसिजइविसुंदरतहवितएमज्झरंजियंहिअयं॥ रायभरिएविहिअएसुहयनिहित्तोनरत्तोसि॥ अत्रधवलनरंजनंरागभृतहृदयेनारंजनं
चव्याहन्यते॥ एवंचविभावनाविशेषोक्तिअसंगतिविषमाधिकव्याघातातद्गुणापृथगलंकारत्वेननवाच्याःविरोधएवांतर्भावात्॥ उक्तिवैचित्र्य ४१
मात्राद्भेदेचलक्षणाकरणेलंकारानंत्यप्रसंगः॥ ५॥ सहार्थबलाद्धर्मस्यान्वयःसहोक्तिः॥ धर्मस्यक्रियागुणलक्षणस्यसहार्थसामर्थ्याद्योन्वयः॥

प्रतिपाद्यते।र्थादनेकेषुवस्तुषुसमासहभावस्योक्तिःसहोक्तिः॥यथा॥ रघुर्भृशंवक्षसितेनताडितःपपातभूमौसहसैनिकाश्रुभिः॥ निमेषमात्रादवधूय
चव्यथांसहोत्थितःसैनिकहर्षनिःस्वनैः॥ सहदीर्घाममश्वासैरिमाःसंप्रतिरात्रयः॥ पांडुराश्चममैवांगैःसार्धंताश्चंद्रभूषणाः॥ ५॥ श्लिष्टविशेषणैरु
पमानधीःसमासोक्तिः॥ श्लेषवद्भिरुपमेयविशेषणैर्योपमानस्यप्रतीतिःसासमासेनसंक्षेपेणार्थद्वयकथनात्समासोक्तिः॥यथा॥ उपोढरागेण
विलोलतारकंतथागृहीतंशशिनानिशामुखं॥ यथासमस्तंतिमिरांशुकंतयापुरोपिरागाद्गलितंनलक्षितं॥ अत्रनिशाशशिनोरुपमेययोरुपोढ
रागादिश्लिष्टविशेषणबलान्नायिकयोरुपमानयोःप्रतीतिः॥ ५॥ स्वभावाख्यानंजातिः॥ अर्थस्यतादवस्थ्यंस्वभावःसचसंस्थानंस्थानकंव्यापा
रादिस्तस्यवर्णनंजातिः॥ तत्रसंस्थानंयथा॥ पर्याणस्खलितरिक्तजःकरतलाक्षिप्तोत्तरीयांचलाबलाद्भिस्तुरंगैर्गताविधुरतामज्ञातवल्गाग्रहाः
नेपथ्यैःकथयंतिभूपतनयादुःश्लिष्टसंपादितैर्निर्लक्ष्योर्पितचक्षुषःपरिचयोपात्तांश्रियंश्रोत्रियाः॥ स्थानकंयथा॥ सदक्षिणापांगनिविष्टमुष्टिंनतां
समाकुंचितसव्यपादं॥ ददर्शचक्रीकृतचारुचापंप्रहर्तुमभ्युद्यतमात्मयोनिं॥ व्यापारोयथा॥ स्रजंतांनयतःस्मरामितेशरमुत्संगनिषण्णधन्वनः॥ मधु
नासहसस्मिताःकथानयनोपांतविलोकितंचतत्॥ ५॥ स्तुतिनिंदयोरन्यपरताव्याजस्तुतिः॥ स्तुतेर्निंदापरतानिंदायाश्चस्तुतिपरतायत्रोच्यतेसा
व्याजरूपाव्याजेनवास्तुतिर्व्याजस्तुतिः॥यथा॥ दिनमवसितंविश्रांताःस्मस्त्वयामरुत्पथेपरमुपकृतंशेषंचकुर्द्विपावयमक्षमाः॥ भवतुसकृत्तेरध्वन्या
नामशेषजलोंभवानिपमपिघनच्छायाभ्रयात्तवोपतदंशमी॥ किंचनीतैःपरग्रहमतैःकिंतुनाहंसमर्थस्तृष्णाच्छाहुंप्रवृत्तिमुखंरदाक्षिण्यात्मभावः
गेहेगेहेविपणिषुतथाचत्वरेपानगोष्ठ्यामुन्मत्तेवभ्रमतिभवतोवल्लभाहंसकीर्तिः॥ ५॥ वाक्यस्यानेकार्थताश्लेषः॥ पदानामेकार्थत्वेपियत्रवाक्य
स्यानेकार्थतासश्लेषः॥यथा॥ द्विजाःप्रसादयन्नेषनेत्राभिःप्रसन्नैःसदा॥ नकस्यानंदमसमंविदधातिदिवाकरः॥ अत्राभिधेयाभिमंत्रणाद्वा
वयस्याद्भूपोवाच्यो॥ ५॥ उत्कर्षापकर्षहेत्वोःसाम्यस्यचोक्तावनुक्तौचोपमेयस्याधिक्यंव्यतिरेकः॥ उपमेयस्यप्राकरणिकस्ययदाधिक्यमर्था
दुपमानात्सव्यतिरेकः॥ सचोत्कर्षापकर्षहेत्वोःक्रमेणयुगपद्वोपादानेत्रिविधायामुक्तौयुगपदनुपादानेनुक्तौचैकविधायांचतुर्विधः॥ पुनश्चसा

यथा चकोरकावनुक्तौ चाष्टभेदः यस्याचर्जयतोनित्यां पुनष्कतुंलैर्गुणैः रुद्धंतेनेवस्येवगांभीर्यैकनिधःस्मयः अत्र गांभीर्यैकनिधित्वमुपमेयोत्क
४२ र्षहेतुरुक्तः तुल्यस्यान्यजनस्येवनस्मयोहंतरुध्यते इत्यत्रैव एवंपाठेनुक्तत्वमुपमानापकर्षहेतुर्भवति अमिमात्रमहायोयंप्रभूतापिपराभवं
नैवान्यतुल्यजनवत्सगांभीर्यधर्मनिधिः अत्रोपमानोपमेयगतौ युगपदुत्कर्षापकर्षहेतू उक्तौ शौर्यपर्णोबुवानाशाखंपितप्रसिद्धता समुद्र
हंसीना पूर्वगर्वमन्यतश्चिवन् अत्रोत्कर्षापकर्षहेत्वोर्द्वयोरप्यनुक्तिः एवंसाम्योक्तौचत्वारोभेदाः साम्यानुक्तौयथा नवीनवर्यावनमोद्भेदनगोगिनाम
निःसदा मुखेनस्मितमुग्धेनजयत्येषामरोरुहं अत्रोपमेयोत्कर्षः इत्यादिपदविरहात्साम्यस्यानुक्तिः अत्रैवविडंबयतिकलंकेनानिशोवास्मिन
मंबुजमितिपाठपरिणामेउपमानापकर्षः आननेनाकलंकेनजयतींदुंकलंकिनं अत्रयुगपदुत्कर्षापकर्षौ अहोविडंबयत्येषावदनेनसरोरुह
अत्रोत्कर्षापकर्षहेत्वोरनुक्तिः साम्यंत्वाक्षेपात्सर्वत्रप्रतीयते श्लेषव्यतिरेकस्तुसंकरालंकारविषयइतितत्रैवादाहरिष्यते ५ विशेषस्यसा
मान्येनसाधर्म्यवैधर्म्याभ्यांसमर्थनमर्थांतरन्यासः साधर्म्येणवैधर्म्येणवाविशेषोयत्रसामान्येनसमर्थ्यते सोऽर्थांतरन्यसनसमर्थानन्या
सः तत्रसाधर्म्येणयथा रथस्थमालोक्यरथांगपाणिंहर्षेणनोक्तेनार्थागितिसोभिदध्यौ वैराणिकार्यायपनिबंधनानिर्गन्मगापवर्गुणेषुरक्ताः वैधर्म्ये
णयथा अन्यथान्यथनितागतचिंतंचित्तमाथमभिज्ञांकिनयत्यापीनभूरिस्फुरयापिनमेदेनिर्दलिताहिमनस्मामदहेनः ६ स्तुत्येसंशयोक्तिःससंदे
हः स्तुत्येअलंकारांतरगर्भीकारेप्यप्रस्तुतवस्तुवर्णनार्थसंशयेयोक्तिर्निर्णयांता निर्णयोतावाभेदकस्यानुक्तावुक्तौवाससंदेहः यथा
सरोजपत्रेपरिलीनषट्पदे विशालदृष्टेःस्विदमूविलोचने शिरोरुहाःस्विन्नतपक्ष्मसंततिः द्विरेफवृंदंतुनिःशब्दनिश्चलं अमूदहासस्फुरद्दंतकेसरंमुखं
स्विदेतदिकचंनुपंकजं इतिप्रलीनांनलिनीवनेसखीविदांबभूवुःसुचिरेणयोषितः अत्ररूपकगर्भीकारेनिर्णयांतःसंशयः यथावा अथज ४२
यायतुमेरुमहीभृतोरसभयानुदिग्गतदिदृक्षया अलियमीसहिहेमाचलमुच्छ्रितंसमुदितंतुविलंघयितुंनभः अत्रातिशयोक्तिगर्भीकारेणानि
र्णयांतः यथावा अयंमार्तंडःकिंसखलुतुरगैःसप्तभिरितःकृशानुःकिंसर्वाःप्रसरतिदिशोनैषनियतं कृतांतःकिंसाक्षान्महिषवहनोसा

वितिचिरं समालोक्याजौत्वांविदधतिविकल्पान्प्रतिभटाः अत्ररूपकगर्भीकारेणाभेदकस्योक्तौसंशयः ७ प्रकृताप्रकृताभ्यांप्रकृतापलापोपह्नु
तिः अप्रकृतेनप्रकृतस्यापलापएकाअपह्नुतिः अप्रकृतेनप्रकृतस्यापलापोन्या तत्राद्यायथा शैलेंद्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रो
मांचादिविसंस्थुलाखिलविधिव्यासंगभंगाकुलः हाशैत्यंतुहिनाचलस्यकरयोरित्यूचिवान्सस्मितं शैलांतःपुरमातृमंडलगणैर्दृष्टोवतादःशिवः
अत्रगिरिजाकरस्पर्शकारणोपुलकवेपथुसात्त्विकप्रसक्तौप्रकृतेनेवतुहिनाचलशैत्येमापह्नुतोद्वितीयायथा निमंविरोगितिहंगारोमदनो
मुखरागमुहुः अयमारुप्यमाणस्यकंदर्पधनुषोध्वनिः यथावा विलसदमरनारीनेत्रनीलाब्जखंडान्यधिवसतिसदायःसंयमाधःकृतानि ननु
ललितकलापिवर्त्ततोयोमदोरवितरतुसकुमारोब्रह्मचर्यश्रियंवः यथावा इदंकेनेतिएवंमिमांसंयंतरैरपूर्त्या ७ पर्यायविनिमयोपरिवृत्तिःए
कस्यानेकत्रानेकस्यचैकत्रक्रमेणवृत्तिःपर्यायः समेनसमस्याकृष्टेननिकृष्टस्यनिकृष्टेनोत्कृष्टस्यवाव्यतिहारोविनिमयः सवेनोपरिवृत्तिःयथा
जौनीएअहरताउरत्तिंउद्यासिउविपिशयमेण सोविमदासङ्गसेसवत्तिनयणेसुसंकंतो अत्रैकस्यानेकत्रवृत्तिः रागस्यचवस्तुतोभेदेपएकत्व
याध्यवसितत्वादेकत्वमविरुद्धं नहेहंनतभिभीति अत्रानेकस्यहार्दिकवह्निजेवर्त्तने विनिमयःसमेनसमस्ययथा आदायकर्णकिसलयमि
यमस्मादत्रचरणमर्पयति उभयोःसदृशविनिमयादन्योन्यमवंचितंमन्ये योबलोव्याप्तभरसीविमरसेनयांतिगावति अत्रसंसर्गसभ्रमोदत्वात
पाहस्वर्वतान् अत्रोत्कृष्टेनाभयेननिकृष्टस्यखर्वत्वस्य तस्यचप्रवयसोजरायुषःस्वर्गिणःकिमिवशोच्यंतधुना येनजर्जरकलेवरव्ययात्
क्रीतमिंदुकिरणोज्ज्वलंयशः अत्रानुकृष्टेनोत्कृष्टस्य ५ हेतोःसाध्यावगमोनुमानं अन्यथानुपपत्त्येकलक्षणाल्लक्षणाद्धेतोःसाध्यस्यज्ञि
ज्ञापितस्यार्द्धस्यप्रतीतिर्यत्रवर्ण्यतेतदनुमानम् यथा सपुत्रमागमिष्यन्नूनंपतितोसिपादयोस्तस्याः कथमन्यथाललाटेयावकरसतिल
कपंक्तिरियं यथावा निर्यातुंशक्यमस्तीतिमध्यंतवनितंबिनी अन्यथानुपपत्त्यैवपयोधरभरस्थितेः यथावा संकेतकालमनसंविदंज्ञात्वा
विदग्धया हसन्नेत्रार्पिताकूतंलीलापद्मंनिमीलितं अत्रकमलनिमीलनेननिशासमयःप्रतिपाद्यतइत्यनुमानभेदंदं ५ महीयाद

नात्स्मरणंस्मृतिः॥ पूर्वानुभूतस्यार्थस्य तादृग्दर्शनात्संस्कारोद्बोधे सति यत्स्मरणं सा स्मृतिः॥ यथा॥ अदृश्यंत पुरस्तेन खेलाः खंजनपंक्तयः अस्मार्यंत च निःश्व
स्य प्रियानयनविभ्रमाः ७२ विपर्ययो भ्रांतिः सदृशदर्शनाद्विपर्ययज्ञानं भ्रांतिः॥ यथा॥ नीलेंदीवरशंकया नयनयोर्बंधूकबुद्ध्याधरे पाणौ पद्मधिया मधू
ककुसुमभ्रांत्या तथा गंडयोः॥ लीयंते कवरीषु बांधवकुलव्यामोहजातस्पृहा दुर्वारा मधुपाः कियंति भवती स्थानानि रक्षिष्यति॥ नन्वेतद्रूपकं प्रथमा वातिश
योक्तिः॥ तत्र वस्तुनो भ्रमस्याभावात्॥ क्रियाफलाभावो नर्थश्च विषमं नकेवलं क्रियाफलाभावोऽर्थात्कर्तुर्यावदनर्थश्च भवति यत्र तद्विषमं यथा उत्कंठा
परितापरणरणकोज्जागरस्तनोस्तनुता फलमिदमहह मयाप्तं सख्या यन्मृगलोचना दृष्टा॥ अत्र मृगलोचनादर्शनेन न केवलं सुखं न प्राप्तं यावत्प्रत्युत उ
त्कंठादिरनर्थः प्राप्तः ७२ योग्यतया योगः समं॥ उत्कृष्टमुत्कृष्टस्य निकृष्टं निकृष्टस्य योग्यमिति योग्यतया योगः समं ७२ यथा॥ धातुः शिल्पातिशयनिकष
स्थानमेषा मृगाक्षी देवो रूपेप्ययमनुपमदनपत्रः स्मरस्य॥ जातं दैवादुचितमनयोः संगतं यत्तदस्मिन् शृंगारस्यापनतमधुना राज्यमेकातपत्रं॥ यथा वा॥ चित्रं
चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितरचनाथथथथभथथथथभथथथ सविधाता विधाता॥ यन्निंबानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥ ७२ हेतौ कार्ये चैकत्र हेतुकार्यांतरोक्तिर्युगपद्गुणक्रियाश्च समुच्चयः॥ कस्यचित्कार्यस्य एकस्मिन्हेतौ साध
के सति हेत्वंतराभिधानं कार्ये चैकस्मिन्प्रस्तुते कुतश्चिन्निमित्तात्कार्यांतराभिधानं च समुच्चयः॥ युगपद्गुणौ च क्रिये च गुणक्रिये च गुणक्रियाश्च समुच्चयः
बहुवचनं व्याप्त्यर्थं॥ हेतौ हेत्वंतरं यथा॥ दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलं स्त्रीत्वं धैर्यवि
रोधि मन्मथसुहृत्कालः कृतांतोऽक्षमी नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं मया॥ अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वंति तेषु सत्सु प्रियतमदू
रस्थित्याद्युपन्यासः॥ यथा वा॥ मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः॥ उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं॥ कार्ये कार्यांतरं यथा॥ स्फुरदद्भुतरूपमुत्प्र
तापज्वलनं त्वां सृजतानवद्यविद्यं॥ विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥ अत्र त्वां सृजतैकस्मिन्कार्ये प्रस्तुते मनोभवादीनां कार्यांत
राणामुपनिबंधः॥ युगपद्गुणौ यथा॥ विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च॥ प्रखलमुखानि नराधिप मलिनानि च तानि जातानि॥ क्रिये

यथा॥ प्रतिगृहीतुं प्रणयिप्रियत्वात्त्रिलोचनस्तामुपचक्रमेव॥ संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणं॥ गुणक्रिये यथा॥ कलुषं च तवाहि
तेष्वकस्मात्सितपंकेरुहसोदरश्रि चक्षुः॥ पतितं च महीपतींद्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥ पृष्टेऽपृष्टे वाऽन्यापोहपरोक्तिः परिसंख्या॥ पृष्टेऽपृष्टे वा
सत्यन्यव्यवच्छेदपरा योक्तिः सा परिसंख्यानात्परिसंख्या॥ उभयत्रोपमानस्य वाच्यत्वं प्रतीयमानता चेति चत्वारोऽस्या भेदाः॥ पृष्टे यथा॥ कोऽलंकारः स
तां शीलं न तु कांचननिर्मितं॥ किमादेयं प्रयत्नेन धर्मो न तु धनादिकं॥ का विसमा दिव्वगई किं लद्धं जं जणो गुणग्गाही॥ किं सुक्खं सुकलत्तं किं दुग्गिज्झं खलो
लोउ॥ अत्र दैवगतिरेव विषमेत्यादिरन्यापोहः प्रतीयते॥ अपृष्टे यथा॥ धेहि धर्मे धनधियं मा धनेषु कदाचन॥ सेवस्व सद्गुरूपज्ञां शिक्षां मा तु नितं
बिनीं॥ कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति॥ यथा वा॥ राज्ये सारं वसुधा वसुधायां पुरं पु
रे सौधं॥ सौधे तल्पं तल्पे वरांगनानंगसर्वस्वं॥ दानं वित्ताद्दृतं वाचः कीर्तिधर्मौ तथायुषः॥ परोपकरणं कायादसारात्सारमुद्धरेत्॥ पोढमहिलाणं जं
सुट्ठु सिक्खियं तं रए सुहावेइ॥ जं जं असिक्खियं नववहूण तं तं दिहिं देइ॥ एषु कौटिल्यं कचनिचय एवेत्यादि राज्ये सारं वसुधेत्यादि वित्तादित्यादि वित्तात्सा
रं दानमेवेत्यादि प्रौढमहिलानां सुशिक्षितमेवेत्याद्यपोह्यमानस्य प्रतीयमानत्वं॥ अन्यापोहाविप्रश्नोत्तरोक्तौ न वैचित्र्यं किंचिदिति नोत्तरं पृथग्लक्षितं
उत्तरात्प्रश्नादिप्रतिपत्तिस्त्वनुमानमेव॥ यथा॥ वाणिअयहत्थिदंतेति॥ अत्र विशिष्टोत्तरान्यथानुपपत्त्या प्रश्नानुमानं॥ तथा॥ १- गंगणाहूलं सहीउ आमक
रेहामितं तहासवं॥ अद्दत हरं भिउं मेधीरं समुद्दाणएतम्मि॥ अत्र भ्रकुट्यादिभिर्मानं कुर्विति सख्याः पूर्ववाक्यमनुमीयते॥ ७२ यथोत्तरं पूर्वस्य हेतु
त्वे कारणमाला॥ उत्तरमुत्तरं प्रति पूर्वस्य पूर्वस्य कारणत्वे कारणमाला॥ यथा॥ निर्द्रव्यो ह्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो निस्तेजाः परिभूय
ते परिभवान्निर्वेदमागच्छति॥ निर्विण्णः शुचमेति शोकविवशो बुध्या परित्यज्यते निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदं॥ कारणमात्रं तु नवै
चित्र्यपात्रमिति न हेतुरलंकारांतरं॥ स्वातंत्र्यांगत्वसंशयैकपद्यैरेषामेकत्र स्थितिः संकरः॥ परस्परनिरपेक्षत्वं स्वातंत्र्यं॥ उपकारत्वमंगत्वं॥ एकस्य
ग्रहोऽन्यस्य त्यागे साधकबाधकप्रमाणाभावादनिर्णयः संशयः॥ एकस्मिन्पदे अर्थालंकारयोः समावेशः एकपद्यं॥ एभिरेषां पूर्वोक्तानाम

लंकाराणामेकत्रवाक्येवाक्यार्थेवावस्थानंसंकीर्यमाणस्वरूपत्वात्संकरः॥स्वातंत्र्येणशब्दालंकारयोःसंकरोयथा॥कुङ्कुमसंरंभलोभपरिभ्रमद्भ्रमर
४४ संभृतशोभया॥वल्गितयावितर्दिकेकलमेखलाकलकलकलोलकलोलदृशान्यया॥अत्रयमकानुप्रासयोः॥अर्थालंकारयोर्यथा॥लिंपतीवतमोंगा
निवर्षतीवांजनंनभः॥असत्पुरुषसेवेवदृष्टिर्निष्फलतांगता॥अत्रोत्प्रेक्षोपमयोः॥शब्दार्थालंकारयोर्यथा॥सोनत्थिपत्थगामेजोएअंमहंतलायंतं
तरुणाणहिययलूडिंपरिसक्कंतिंणिवारेइ॥अत्रानुप्रासरूपकयोः॥अंगत्वेनसंकरोयथा॥कर्कंधूफलमुच्चिनोतिशबरीमुक्ताफलाकांक्षयाकूजोत्कल
कदंबकस्यपुरतःकाकोपिहंसायते॥कीर्त्यातेधवलीकृतेत्रिभुवनेक्ष्मापाललक्ष्मीःपुनःकृष्णंवीक्ष्यबलोयमित्यपहितश्रीदृंगार्नेजल्पति॥अत्रांति
शयोक्तिमपिस्यभ्रांतिरूढता॥तदाश्रयेणचातिशयोक्तिश्चमत्कारहेतुरित्यनयोरंगांगिभावः॥त्वंसमुद्रश्चदुर्वारौमहासत्त्वौसतेजसौ॥इयतायु
वयोर्भेदःसजडात्मापटुर्भवान्॥अत्रश्लेषोव्यतिरेकस्यांगं॥कृष्णार्जुनानुरक्तापिदृष्टिःकर्णावलंबिनी॥यातिविश्वसनीयत्वंकस्यतेकलभाषि
णि॥अत्रश्लेषोविरोधस्यांगं॥आक्षिपंत्यरविंदानिमुग्धेतवमुखश्रियम्॥कोशदंडसमग्राणांकिमेषामस्तिदुष्करं॥अत्रश्लेषोर्थांतरन्यासस्यां
गं॥संशयेनसंकरोयथा॥निग्रंथदुर्गगहंमाष्फुलंपयाडलंसमारुहस्य॥आरूढनिबडियाकिंदुर्गाणनकयाइहग्गामे॥अत्रशब्दगतपाठापाठत्वयो
रन्यतरस्याःप्राकरणिकत्वाभावान्नज्ञायतेकिमियंसमासोक्तिरुतान्योक्तिरितिसंशयः॥तथा॥नयनानंददायींदोर्बिंबमेतत्प्रसीदति॥अधुना
पिनिरुद्धाशमपिशीर्णमिदंतमः॥अत्रमुखेनसहाभेदारोपात्किमतिशयोक्तिःकिमेतदितिमुखनिर्देशेदुस्समारोपणाद्रूपकम्॥किंमुख
नैर्मल्यप्रस्तावोऽन्योक्तिः॥अथैतयोःसमुच्चयविवक्षायांदीपकम्॥किंप्रदोषवर्णनेविशेषणसाम्यात्समासोक्तिः॥किमदर्शनोद्दीपकःकालो
पवर्णनतात्पर्यात्पर्यायोक्तमित्यनेकालंकारसंशयः॥तथा॥शशिवदनासितसरसिजनयनासितकुंददशनपंक्तिरियं॥गगनजलस्थ
लसंभवहृद्याकाराकृताविधिना॥अत्ररूपकमुपमावेतिसंशयः॥यत्रतुमोहमहाचलदलनेसाक्षनिशितवज्रंकोविहरेकापीत्यादावारोपितकुलि ४४
शकोटिरूपात्मकार्मोहस्यमहाचलेनोपमितिमात्रस्यदर्शनकर्तृत्वंनहिनदृश्यावर्जकंस्यादितिरूपकस्यज्योत्स्नेवहासद्युतिगर्भदीपिका

दीमुख्यत्वंस्यावगम्यमानाहासितद्युतिर्वल्लक्ष्येवानुकूलंभजतइत्युपमायाःसाधकंप्रमाणमस्ति॥स्मरंतिज्योत्स्नायाःशशिमुखिचकोरास्तवदृशे
त्यादौतत्वारोपेस्मरणानुपपत्तेरूपकमस्य॥राजनारायणंलक्ष्मीस्त्वामालिंगतिनिर्भरमित्यादौसदृशं तिप्रेयसीप्रयुक्तस्यालिंगनस्यासंभ
वादुपमायाश्चबाधकंप्रमाणमस्तिनात्रसंशयः॥एकवाचकानुप्रवेशेनसंकरोयथा॥रोलंबकेसरमुदारितदिगंतपत्रमामूललंबिचलदंशुपत्रगरिमानं
येनोद्धृतंकुवलयंललितासलीलंमुक्तंसकार्थमिवपातुसवोवराहः॥अत्रैकपदानुप्रविष्टौरूपकानुप्रासौ॥यद्यप्यनेकविषयमिदंरूपकम
भिव्यक्त्यापितथापिप्रतिपदंरूपकमशक्यवादेकपदानुप्रवेशेनविरुध्यतेइत्युक्ता॥शब्दार्थालंकाराःकःपुनरनयोराश्रितत्वाविशेषेप्ययं
शब्दस्यालंकारोऽयमर्थस्येतिविशेषः॥उच्यते॥दोषगुणालंकाराणांशब्दार्थोभयगतत्वव्यवस्थायामन्वयव्यतिरेकावेवनिमित्तं॥निमित्तांत
रस्याभावात्॥ततश्चयोऽलंकारोयदीयोभावाभावावनुविधत्तेसतदलंकारोव्यवस्थाप्यतइति॥यद्यपिपुनरुक्तवदाभासार्थांतरन्यासादयःकेचिदु
भयान्वयव्यतिरेकानुविधायिनोपिदृश्यंतेतथापितत्रशब्दस्यार्थस्यवावैचित्र्यमुद्भटमित्याश्रयालंकारत्वमनयोरेवशब्दालंकारत्वेनार्थालंकारत्वेन
चोक्ताः॥इहचापुष्टार्थत्वलक्षणदोषाभावमात्रंसाभिप्रायविशेषणात्तिरूपः॥परिकरोऽपभ्रष्टमतादोषाभावमात्रंयथासंख्यंदोषाभिधानेनैवगता
र्थम्॥विनोक्तिस्तुतथाविधहृद्यत्वविरहात्॥भाविकंतुभूतभाविपदार्थप्रत्यक्षीकारात्मकमभिनेयप्रबंधएवभवति॥यद्यपिमुक्तकादावपिदृश्यतेन
थापिनतत्सहृदयोदारतंतुत्वंतद्धिमहत्सुलक्षणं॥अतिशयोक्तेर्जातेर्वार्ताभयंन॥महापुरुषावर्णावारूपंनयदिरसपरेतदाध्वनेर्विषयः॥अथचयाविध
वर्णनीयवस्तुपरंमस्तदागुणीभूतव्यंग्यस्येतिनालंकारः॥रसवत्प्रेयस्वदूर्जस्विभावसदाहिनानिगुणीभूतव्यंग्यप्रकाराएव॥आशीस्तुप्रियो
क्तिमात्रंभावभावानत्वगुणीभूतव्यंग्यस्यवाविषयः॥प्रत्यनीकंचप्रतीयमानोत्प्रेक्षाप्रकारएवेतिनालंकारांतरतयावाच्यं॥इत्याचार्यश्रीहेमचंद्रविरचिता
यामलंकारचूडामणिसंज्ञस्वोपज्ञकाव्यानुशासनवृत्तौशब्दार्थालंकारवर्णनोनामषष्ठोऽध्यायःसमाप्तः॥६॥इहचकाव्यंनायकादिप्रतिबद्धंभवतीतिनाय
कादिलक्षणमुच्यते॥तत्रचतुर्धाउत्तममध्यमाधमभेदेनपुंसांस्त्रीणांचतिस्रःप्रकृतयोभवंति॥तत्रकेवलगुणमय्युत्तमास्तल्पदोषाबहुगुणामध्य

मादोषवत्यथमानद्बुधनप्रकृतयोनायकयो।भुजगपिटचेटीविटपकादयोगमयंति। उत्तममध्यमप्रकृतियुक्तम्। समगुणकथाव्यापीनायकवमैम
४९ प्रयुणोनेतत्वादिगुणायाग्गीनस्थगाणशोभादिगुणान्वितश्च। तत्रमेनत्वादिगुणवाहुल्यान्मध्यमाप्रकृतावपिसमग्रगुणता। नतृगुणाश्चेमे नेताविनी
तोमधुरस्त्यागीदक्षःप्रियंवदः रक्तलोकःशुचिर्वाग्मीरूढवंशःस्थिरोयुवा। बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः। शूरोदृढश्चतेजस्वीशास्त्रचक्षुश्च
धार्मिकः। कथाप्रबंधस्तद्व्यापीनयतिव्याप्नोतिइतिव्यनंफलंचेतिनायकः। तस्यासात्त्विकान्गुणानाह। शोभाविलासललितमाधुर्यस्थैर्यगांभीर्यौदार्यतै
जांस्यष्टौसत्वजास्तद्गुणाः। इहसत्वंदेहविकारस्तस्माज्जाताः। क्रमेणलक्षयति ॥२॥ दाक्ष्यशौर्योत्साहनीचजुगुप्सोत्तमस्पर्धागमिकाशोभा।
यतःशरीराकाराद्दाक्ष्यादिगम्यतेसाशोभेत्यर्थः। दाक्ष्यंयथा। स्फूर्जद्वज्रसहस्रनिर्मितमिवप्रादुर्भवत्यग्रतोरामस्यत्रिपुरांतकृद्दिविषदांतेजोभिरिद्धंधनुः
शुंडारःकलभेनयद्वदचलेवत्सेनदोर्दंडकस्तस्मिन्नाहितएवगर्जितगुणंकृष्टंचभग्नंचतत्। शौर्यंयथा। त्वरेणदंदिताशोषिगाश्रेणरणमूर्द्धनि। रामव्या
जेनलोकेषुशौर्यमुत्सारितंनणाम। उत्साहोयथा। मूर्द्धाजावबतोभिवाद्यचरणावापृच्छ्यसेनापतीनाश्वास्याश्रमुखान्मुहुःप्रियसखाग्रेष्यात्समादिश्य
च। आरोपितगर्हेमहेंद्रशिखरांदंभोभिधेलंघनेरंहस्तोरघुनाथपादरजसामुद्बौःस्मरन्मारुतिः। नीचजुगुप्सायथा। उत्तालताडकोत्पातदर्शनेप्यप्रकंपि
तः। प्रयुक्तस्तस्यमाथायस्त्रैणेनविचिकित्सति। उत्तमस्पर्धायथा। एतांपश्यपुरस्तटीमिहकिलक्रीडाकिरातोहरःकोदंडेनकिरीटिनासरभसंचूडांतेर
ताडितः। इत्याकर्ण्यकथाद्भुतंहिमनिधावद्रौसुभद्रापतेर्मंदंमंदमकारियेननिजयोर्दोर्दंडयोर्मंडनं ॥२॥ धीरागतिर्दृष्टिःसस्मितंवचोविलासः। यथा। दृष्टि
स्तृणीकृतजगत्त्रयसत्वसाराधीरोद्धताननयतीवगतिर्धरित्रीं। कौमारकेपिगिरिवद्गुरुतांदधानोवीरोरसःकिमयमित्युतदर्पएव ॥२॥ मृदुः
शृंगारचेष्टाललितं। यथा। कश्चित्कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं। रजोभिरंतःपरिवेषबंधिलीलारविंदंभ्रमयांचकार ॥२॥ क्षो
भेप्यनुल्बणत्वंमाधुर्यं। महत्यपियुद्धनियुद्धव्यायामादौक्षोभहेतावनुल्बणत्वंमधुरचेष्टामाधुर्यं। यथा। कपोलजानकाःकरिकलभदंत ४६
द्युतिमुषिस्मरस्मेरंगंडोडुमरपुलकंवक्त्रकमलं। मुहुःपश्यन्शृण्वन्रजनिचरसेनाकलकलंजटाजूटग्रंथिंद्रढयतिरघूणांपरिवृढः ॥२॥

विघ्नेप्यचलनंस्थैर्यम्। सत्यपिविघ्नेव्यवसायादपरिभ्रंशःस्थैर्यम्। यथायथासमारंभोदैवात्सिद्धिंनगच्छति। तथातथाधिकोत्साकोधीराणांहृदि
वर्द्धते। हर्षादिविकारानुपलंभकृद्गांभीर्यं। यस्यप्रभावाद्धर्षक्रोधादीनांविकाराद्दृष्टिविकासमुखरागादयोनोपलभ्यंतेतन्निमित्तमितिदेह
स्तद्गांभीर्यं। आहूतस्याभिषेकायविसृष्टस्यवनायच। नमयालक्षितस्तस्यस्वल्पोप्याकारविभ्रमः ॥२॥ स्वपरेषुदानाभ्युपपत्तिसंभाषणान्यौ
दार्यं। अभ्युपपत्तिःपरित्राणाद्यर्थितांगीकरणंपरजनविषयंदानादिचेष्टात्मकमेवौदार्यं। स्वग्रहणंतुदृष्टांतार्थं। स्वेष्विवपरेष्वपीत्यर्थः।
दानंयथा। शिरामुखैःस्यंदतएवरक्तमद्यापिदेहेममयांसमस्ति। तृप्तिंनपश्यामितवैवतावत्किंभक्षणात्वंविरतोगरुत्मन्। अभ्युपपत्ति
र्यथा। एतेवयममीदाराःकन्येयंकुलजीवितं। ब्रूतकेनात्रवःकार्यमनास्थाबाह्यवस्तुषु। संभाषणंयथा। उत्पत्तिर्जमदग्नितःसभगवान्देवःपि
नाकीगुरुःशौर्यंयत्तुनतद्गिरांपथिननुव्यक्तंयतःकर्मभिः। त्यागःसप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिःसत्यब्रह्मतपोनिधेर्भगवतः
किंवामलोकोत्तरं ॥२॥ पराधिक्षेपाद्यसहनंतेजः। परात्तत्रार्ननुगुणोर्मिश्रादिबाधिक्षेपापमानादेरसहनंतेजः। यथा। ब्रूतनूतनकूष्मांडफला
नांकेभवंत्यमीअंगुलीदर्शनाद्येननजीवंतिमनस्विनः। नायकभेदानाह ॥२॥ धीरोदात्तललितशांतोद्धताभेदास्तच्चतुर्द्धा। सइतिनायकः। धीरश
ब्दःप्रत्येकमभिसंबध्यते। तेनधीरोदात्तः धीरललितधीरशांतः धीरोद्धतइति। दक्षिणधृष्टानुकूलशठभेदैरेकैकश्चतुर्द्धा। एतेशृंगारर
साश्रयिणोभेदाः। इतिषोडशभेदानायकस्य। धीरोदात्तादीन्लक्षयति ॥२॥ गूढगर्वःस्थिरोधीरःक्षमावानविकत्थनोमहासत्वोदृढव्र
तोधीरोदात्तः गूढगर्वोविनयच्छन्नावलेपः अविकत्थनोऽनात्मश्लाघापरः महासत्वःक्रोधाद्यनभिभूतांतस्तत्वः। दृढव्रतोऽंगीकृतनिर्वाह
कः। यथारामादिः ॥२॥ कलासक्तःसुखीशृंगारीमृदुर्निश्चिंतोधीरललितः। कलासक्तःगीताद्यासक्तः। सुखीभोगप्रवणःशृंगारप्रधा
नःसुकुमाराचारः। सचिवादिसंविहितयोगक्षेमत्वाच्चिंतारहितः। यथावत्सराजः ॥२॥ विनयोपशमवान्धीरशांतः। यथामालतीमाधव
मृच्छकटिकादौमाधवचारुदत्तादिः ॥२॥ शूरोमत्सरीमायीविकत्थनश्छद्मवान्रौद्रोवलिप्तोधीरोद्धतः। मत्सरीअसहनः। मंत्रादिबले

नाविद्यमानयस्तु प्रकाशकामायीछद्ममात्रं रौद्रश्चंडः अवलिप्तः शौर्यादिमद्वान् यथाजामदग्न्यरावणादिः द्वेधाधीरोद्धताज्ञेयाः स्युर्द्धीरल
४६. लितानृपाः सेनापतिरमात्यश्चधीरोदात्तौप्रकीर्तितौ धीरप्रशांताविज्ञेयाब्राह्मणावणिजस्तथा इतिचत्वारएवेहनायकाःसमुदाहृताहृतं
नरश्लोकौ अथनायकस्यशृंगारित्वेऽवस्थाभेदानाह ५ ज्येष्ठायामपिसहृदयोदक्षिणः कनिष्ठायांरक्तोज्येष्ठायामपिसमानहृदयोदक्षिण
श्रीलत्वाद्दक्षिणः यथा प्रसीदत्यालोकेकिमपिकिमपिप्रेमगुरवोरतक्रीडाःकोपिप्रतिदिनमपूर्वोऽस्यविनयः सविश्रंभःकश्चित्कथयतिचकिं
चित्परिजनोनचाहंप्रत्येमिप्रियसखिकिमप्यस्यविकृतं व्यक्तापराधोधृष्टः यथा लाक्षालक्ष्मललाटपट्टमभितःकेयूरमुद्रागलेवक्त्रेकज्जल
कालिमानयनयोस्तांबूलरागोऽपरः दृष्ट्वाकोपविधायिमंडनमिदंप्रातश्चिरंप्रेयसोलीलातामरसोदरेमृगदृशःश्वासाःसमाप्तिंगताः ५ एकभा
र्यानुकूलः यथा इयंगेहेलक्ष्मीरियममृतवर्तिर्नयनयोरसावस्याःस्पर्शोवपुषिबहुलश्चंदनरसः अयंकंठेबाहुःशिशिरमसृणोमौक्तिकसरः
किमस्यानप्रेयोयदिपरमसत्यस्तुविरहः ५ [illegible] यथा एकत्रासनसंगतेप्रियतमेइतिनायकविजेयप्रतिनायकमाह ५ व्यसनी
पापकृल्लुब्धःस्तब्धोधीरोद्धतःप्रतिनायकः यथा रामयुधिष्ठिरयोरावणदुर्योधनौ ॥ ५ ॥ ५ [illegible] तद्गुणास्तुपरमान्या
नायिकात्रिधातद्गुणायथोक्तसंभविनायकगुणयोगिनीनायिकासास्वकीयापरकीयासामान्याचेतित्रिधास्वस्त्रीलक्षणमाह ५ स्वयमूढादिशीला
दिमतीस्या आदिग्रहणादार्जवलज्जागृहाचारनैपुण्यादिपरिग्रहः शीलंयथा कुलबालिकापदस्थहनुवपालायणविभ्रमविलासा पवसति
व्रपवसितगतित्वपिच्छामइत्ते ५ यथा कौशल्याभ्यांमुग्धामध्याप्रौढेतिसात्रिधावयःकृताविशेषः कौशलंकामोपचारनैपुणं ताभ्यांमुग्धा
मध्याप्रौढेत्युक्तं तत्रवयसामुग्धायथा दोर्मूलावधिसूत्रितस्तनमुरःस्निग्धकटाक्षेदृशोर्किंचित्तांडवपंडितंस्मितसुधासिक्तोक्तिषुभ्रूलते
चेतःकंदलितंस्मरव्यतिकरैर्लावण्यमंगेर्धृतंतन्वंग्यास्तरुणिम्निसर्पतिशनैरन्यैवकाचिद्गतिः कौशलेनयथा दत्तेसादरमर्पितेपथुमतकृत ४६.
शंभोर्भालविधुरंत्रयया वपुरादर्शितम्रायकृतिप्रियापुरःप्रतिपत्तिमूढमपिवालमभूत् वयसामध्या यथा तरंगितागानिस्खलदमलालावण्यजल

लधौप्रथिमतः पाण्यस्तनजघनमुन्मुद्रयतिच दृशोर्लीलारंभाःस्फुटमपवदंतेसरलतामहोसारंगाक्ष्यास्तरुणिमनिसर्गःपरिणतः कौशलेनयथा
स्वेदांभःकणिकाचितेपिवदनेजातेपिरोमोद्गमेविश्रंभेपिगुरौपयोधरभरोत्कंपेपिवृद्धिंगते दुर्वारस्मरनिर्भरेपिहृदयेनैवाभियुक्तःप्रियःस्तन्वंग्याहठकेशकर्ष
णघनश्लेषामृतेलुब्धयातवयसाप्रगल्भायथानितंबोमंदत्वंजनयतिगुरुत्वाद्गुतगतेर्महत्वादुत्तुंगस्तनकलशभारःश्रमयति विकासिन्यांकांत्याप्रकटयति
रूपंमुखशशीमनांगनीमामीप्रसभमपिमारोहृदिपत्र कौशलेनयथा उद्दतैर्निभृतमेकमनेकैश्छेदवन्मृगदृशामणितानि श्रूयतेस्मभणितंकलकोचानपु
रध्वनिभिरक्षतमेव ५ धीराधीराधीराधीराइतिभेदाद्द्वैधा अंतेमध्याप्रौढेत्रिधाधीरामध्याधीराधीरामध्याअधीरामध्या एवंप्रौढापित्रिधा ५
पोढापिज्येष्ठाकनिष्ठाभेदात्द्वादशधा मध्याप्रौढयोःप्रत्येकंत्रिभिदत्वात्षड्विधापित्यिप्रियाकनिष्ठाभेदात्द्वादशधास्वीयाभवति तत्रप्रथममूढाज्येष्ठा पश्चादूढाक
निष्ठाअभ्यासांकोधचेष्टामाह सोत्प्रासवक्रोक्त्यासबाष्पयावाक्पारुष्येणक्रोधिन्योमध्याधीराद्याः मध्याधीरादयास्तिस्रोपियथासंख्यंसोत्प्रासवक्रोक्त्यादि
भिःक्रोधंकुर्वंति तत्रसोत्प्रासवक्रोक्त्यामध्याधीरायथा नत्वंदूतीयमनुच्यरानयाम्यापिबतिचपातिचयास्केरोहस्त्वाम् व्रजविटपममुंदमतस्ते
भवतुयतःसदृशोश्चिरायोगः सबाष्पयासोत्प्रासवक्रोक्त्याधीराधीरायथा बालेनाथेतिवाक्पारुष्येणाधीरायथाधिक्कीलिसमुपेत्यचुंबसिबला
न्निर्लज्जलज्जाकृतेवस्त्रांतंशठमुंचमुंचशपथैःकिंधूर्तनिर्बाधसे खिन्नाहंतवरात्रिजागरतयातामेवयाहिप्रियांनिर्माल्योज्झितपुष्पदामनिकरेकाषट्पदा
नांरतिः ५ उपचारावहित्थाभ्यामानुकूल्यौदासीन्याभ्यांसंतर्जनाताडनाभ्यांप्रौढाधीराद्याः प्रौढाधीरादयास्तिस्रोपियथासंख्यमुपचारावहित्थादिदि
कनयेणक्रोधिन्योभवंति तत्रधीराप्रौढासोपचारायथा एकत्रासनसंगतिःपरिहृताप्रत्युद्गमाद्दूरतस्तांबूलानयनच्छलेनरभसाश्लेषोपिसंवि
घ्नितः आलापोपिनमिश्रितःपरिजनंव्यापारयंत्यांतिकेकांतंप्रत्युपचारतश्चतुरयाकोपःकृतार्थीकृतः सैवसावहित्थायथा बंधूभंगास्तेप्रकटित
मुकुलेधवाभावसोपाऊंभाप्रणयमधुरागाद्गदगिरः वरंमानारोपसमभजनितोऽनादरविधिर्नैगूढांतःकोपाकठिनहृदयेसंवृत्तिरियं प्रौढा
धीराधीरानुकूलायथा यत्पाणिर्ननिवारितोनिवसनग्रंथिंसमुद्ग्रंथयन्भ्रूभेदोनकृतोमनागपिमुहुर्यत्खंडमानेधरे यन्निःशंकमहार्पितंवपुरहो

पत्युःसमालिंगनेमानिन्याःकथितोनुकूलविधिनातेनैवमन्युर्महान् ॥ सैवोदासीनायथा ॥ आयस्ताकलहंपुरेवकुरुतेनस्रंसनेवाससोभग्नभ्रूरतिखंडयमानमधरंधत्तेनकेशग्रहे ॥ अंगान्यर्पयतिस्वयंनबतिनोवामाहठालिंगनेतन्व्याशिक्षितएषसंप्रतिकुतःकोपप्रकारःपरः ॥ प्रौढाअधीरासंतर्जनेनयथा ॥ तथाभूदस्माकंप्रथममविभिन्नातनुरियंततोनुत्वंप्रेयानहमपिहताशाप्रियतमा ॥ इदानींत्वंनाथोवयमपिकलत्रंकिमपरमयाप्तंप्राणानांकुलिशकठिनानांफलमिदं ॥ सैवमाध्यायथा ॥ कोपात्कोमलबाहुलोलेतिपरस्त्रीलक्षणमाह ॥ परोढापरस्त्रीकन्याचपरेणोढापरस्त्रीसाचनागिनिरसेउपकारिर्गतिनाम्याःप्रपंचःकृतः ॥ ऊढेत्युपलक्षणमवरुद्धापिपरस्त्रीत्यस्याने १ परोढायथा ॥ दृष्टिंहेप्रतिवासिनीति ॥ कन्यानुपित्राद्यायत्तत्वादनूढापिपरस्त्रीयथा ॥ दृष्टिःश्रोत्रावमंतुनाप्रतिकलंप्राणाःस्यमाप्यस्यतेहूर्वाकारमुरस्तथापिकुचयोःशोभांनवामीहते ॥ नोधत्तेगुरुतांतथाप्यपविताभोगानितंबस्थलीतन्व्याःस्त्रीवृत्तमन्मथंविजयतेनेत्रैकपर्यंवपुः ॥ सामान्यांलक्षयति ॥ ५२ ॥ गणिकासामान्या ॥ कलाप्रागल्भ्यधौर्त्यभाग्यांगणयतिकलयतिगणिका ॥ सामान्यानिर्गुणास्यसगुणास्यचसाधारणी ॥ केवलधनलाभार्थंघनेनकृत्रिमप्रेमत्वात् ॥ यथा ॥ गाढालिंगितपीडितस्तनतटंस्विद्यत्कपोलस्थलंसंदष्टाधरमुक्तसीत्कृतलसद्भ्रान्तभ्रुनृत्यत्करं ॥ चाटुप्रायवचोविचित्रभणितंघातैरुदैश्चांकितंवेश्यानांधृतिधामपुष्पधनुषःप्राप्नोतिधन्योरतं ॥ स्वपरस्त्रीणामवस्थामाह ॥ ५७ ॥ स्वाधीनपतिकाप्रोषितभर्तृकाखंडिताकलहांतरितावासकसज्जविरहोत्कंठिता ॥ विप्रलब्धाभिसारिकाचेतिस्वस्त्रीणामष्टावस्थागतिगुणाकृष्टत्वेनपार्श्वस्थितत्वात्स्वाधीनंभायत्तःपतिर्यस्याःसातथा ॥ यथा ॥ गात्रेपत्रलतेरद्दति ॥ कार्यतःप्रोषितोदेशांतरंगतोभर्तायस्याःसातथा ॥ यथा ॥ श्वासाबाष्पजलंगिरःसकरुणामार्गेचनेत्रार्पणंकेनेदंनकृतंप्रियस्यविरहेकस्यासवोनिर्गताः ॥ सत्येवयदिनेननास्मिकठिनाःपांथकथंप्रोषिताःप्राणाःसंप्रतिमोकलंकमलिनातिष्ठंतुवायांतुवा ॥ वनितांतरव्यासंगादनागतेप्रियेदुःखसंतप्ताखंडिता ॥ यथा ॥ नवनखपदमंगंगोपयस्यंशुकेनस्थगयसिमुहुरोष्ठंपाणिनादंतदष्टं ॥ प्रतिदिशमपरस्त्रीसंगशंसीविसर्पन्नवपरिमलगंधःकेनशक्योवरीतुं ॥ ईर्ष्याकलहेननिष्क्रांतभर्तृकत्वात्संगमसुखेनांतरिताकलहांतरितायथा ॥ निश्वासावदनंदहंतिहृदयंनिर्मूलमुन्मथ्यतेनिद्रानैतिनदृश्यतेप्रियमुखं

नक्तंदिनंरुद्यते ॥ अंगंशोषमुपैतिपादपतितःप्रेयांस्तथोपेक्षितःसख्यःकंगुणमाकलय्यदयितेमानंवयंकारिताः ॥ परिपाद्यांफलार्थेयानात्प्रस्तवएववादुःखेचैवप्रमोदेचषडेतेवासकाःस्मृताः ॥ उचितेवासकेस्त्रीणामृतुकालेपिवाबुधैः ॥ द्वेष्यायामथचेष्टानांकर्तव्यमुपसर्पणमितिनियेनवासकेरतिसंभोगकालस्तत्यांगसंगादिनासज्यापमुणावासकसज्जा ॥ यथा ॥ तल्पंकल्पनविधेर्नेतरंभर्तृमार्गमवलोकनेमुहुः ॥ दर्पणेक्षणमुदीक्षतेचपुर्हर्षभूषणमनिंद्यभूषणा ॥ प्रियंमन्याविरयति ॥ भर्तरिविरहोत्कंठितायथा ॥ अन्यत्रव्रजतीतिकाखलुकथानाप्यस्यतादृक्सुहृद्योमानकृतिनागतश्चमहहाकीयंविधेःप्रक्रमःइत्यल्पेतरकल्पनाकवलितस्वांतानिशांतांतरेबालावृत्तविवर्तनव्यतिकरानाप्नोतिनिद्रांनिशि ॥ दूतीमुखेनस्वयंवासंकेतंकृत्वाकेनापिकारणेनवंचिताविप्रलब्धा ॥ यत्संकेतगृहंप्रियेणकथितंसंप्रेष्यदूतींस्वयंतच्छून्यंसुचिरंनिषेव्यसुदृशापश्चात्तभाग्याशमा ॥ स्थानोपासनसत्वतायविगलत्सांद्रांजनैरश्रुभिर्भूमावक्षरमालिकेवलिखितादीर्घंरुदत्यानतेः ॥ अभिसरत्यभिसारयतिकामार्ताकांतमित्यभिसारिका ॥ यथा ॥ उरसिनिहितस्तारोहारःकृताजघनेघनेकलकलवतीकांचीपादौरणन्मणिनूपुरौ ॥ प्रियमभिसरस्येवंमुग्धेत्वमाहतडिंडिमायदिकिमपरंत्रासोद्भ्रांतादिशोमुहुरीक्षसे ॥ तथा ॥ नचमेवगच्छतियभालघुतांकरुणांयथाचकुरुतेशमस्व ॥ निपुणंतथैवमधिगम्यवादरभिदूतिकाचिदितिसंदिदिशे ॥ अन्वर्थएवासांलक्षणमित्याहस्यलक्षणंनकृतं ॥ ५९ ॥ अस्याश्चतस्रःपरस्त्रीपारक्योर्नुकन्योर्दोषसंकेतात्पूर्वंविरहोत्कंठितेपश्चाद्दूषिकादिनासहाभिसरंत्यावभिसारिकेकुतोपिकारणात्संकेतस्थानमप्राप्तेनायकेविप्रलब्धेइति ॥ अवस्थैतेवानयोरितिनायिकानांप्रतिनायिकामाह ॥ ६० ॥ ईर्ष्याहेतुःसपत्नीप्रतिनायिका ॥ यथारुक्मिण्याःसत्यभामा ॥ दूत्यश्चनायिकानांलोकसिद्धाएवेतिनोक्ताः ॥ घनस्त्रीणामलंकारानाह ॥ ६१ ॥ सत्वजाविंशतिःस्त्रीणामलंकाराः ॥ संवेदनरूपात्परतंयत्तत्तोन्यदेहप्रवेशधर्मत्वेनैवस्थितंसत्वं ॥ यदाह ॥ देहात्मकंभवेत्सत्वमिति ॥ ततोजाताःसत्वजाः ॥ राजस्तामसत्वशरीरेषुसंभवात् ॥ चांडालीनामपिहिरूपलावण्यसंपदोदृश्यंतेनतुचेष्टालंकाराः ॥ तासामपिवाभवंतउत्तमतामेवसूचयंति ॥ अलंकारादेहमात्रनिष्ठानतुचित्तवृत्तिरूपाः ॥ नयौवनेउद्भिन्नादृश्यंतेबाल्येतुद्भिन्नाबार्द्धकेतिरोभूताः ॥ यद्यपिचेनेपुरुषस्यापि

संतितथापियोषितांनएवालंकाराइतितदुक्तेनैववर्णिताः पुंसस्तूत्साहएवांतएवपरोलंकारः तथाचसर्वेष्वेवनायकभेदेषुधीरत्वमेवविशेषणमे
दैर्नयोक्तम् तदाद्यादितास्तुशृंगारादयोधीरललितइत्यादौ अलंकाराश्चकेचनक्रियात्मकाःकेचिद्गुणस्वभावाः क्रियात्मकाअपिकेचनप्राङ्जन्मा
भ्यस्तरतिभाववासनावशेनसत्वोद्बुद्धेनदेहमात्रेसतिभवंतितेअंगजाइत्युच्यंते अन्येत्वयतंजन्मसमुचितकामावस्थास्फुटीभवद्रतिभावानुविद्धेदेहेपरि
स्फुरंतितेस्वाभाविकाः स्वस्मात्रतिभावाद्धृदयगोचरीभूताद्भवंतीति तथाकस्याश्चिन्नायिकायाःकश्चिदेवस्वाभाविकोलंकारोभवतिअन्यस्याअन्यः कस्या
श्चिद्द्वौत्रयइत्याद्यातेपिस्वाभाविकाः भावहावहेलास्तुत्रयएवासर्वास्वेवसत्वाधिकास्तेसमाद्भूताइत्याचक्षते तथाशोभादयःसप्तएवअंगजाःस्वाभा
विकाश्चक्रियात्मानःशोभादयस्तुगुणात्मानस्तेचायत्नजाः यत्नजाताःक्रियात्मकाः इत्यालोचयंतस्तेदेहेक्रियेतिपदार्थविदः ततोन्येऽयत्नजाः तान्क्र
मेणलक्षयति ५ भावहावहेलास्त्रयोंगजाअलंकृताःभूयोविकारात्मकाः यद्यपिदेहात्मकंभवेत्सत्वंस्वाश्रयसमुत्थितः भावास्समुत्थितोहावोहा
वाद्धेलासमुत्थिता इतिभरतवचनात्क्रमेणैषांहेतुभावस्तथापिपरंपरयातीव्रतमसत्वस्यांगस्यैवकारणत्वादंगजाइत्युक्ताः एवंपरस्परसमुत्थि
तत्वेप्यमीषामंगजत्वमेव तथाहिकुमारीशरीरेषोढतमकुमार्यंतरगतहेलावलोकनेहावोद्भवाभावश्चदृष्टमितिपूर्वं अन्यथानुभावस्यैवोद्भवः एवंभावे
पिदृष्टेहावोहेलावायदानुहावावस्थोद्भिन्नपूर्वापरत्वहेलादर्शनेतदाहेलातोपिहेला एवंहावाद्वावोभावाद्वावइत्यपिवाच्यम् एवंचशीलतादिश्र
वणात्सरसकाव्यादेरपिहेलादीनांप्रयोगोभवतीतिमंतव्यम् एतदन्योन्यसमुत्थितत्वंतथांगस्यास्यैवविकाराःस्मर्गतवासनात्मकतयावर्तमानंरत्याख्यभा
वंभावयन्नस्त्वयंभावः यथा दृष्टिःसालसतांबिभर्तिनशिशुक्रीडासुबद्धादराश्रोत्रंप्रेषयतिप्रवर्तितसखीसंभोगवार्तास्वपि पुंसामंकमपेतशं
कमधुनानारोहतिप्राग्यथा बालानवयौवनव्यतिकरावष्टभ्यमानाशनैः बहुविकारात्माकाभूतारकचिबुकग्रीवादिदर्शभंः स्वचित्तवृत्तिपर ४८
मनुहृतींददतींकुमारींहावयतीतिहावः सावाद्यापिस्वयंरतेःप्रबोधंनमन्यतेकेवलंतत्संस्कारबलतस्तथाविकाराक्रोतिर्यैर्द्रष्टातथाकल्पयति
यथा स्मितंकिंचिन्मुग्धंतरलमधुरोधदृष्टिविभवःपरिस्पंदोवाचामभिनवविलासोक्तिसरसः गतानामारंभःकिसलयितलीलापरिकरःस्पृष्टांस्या

Dr. BHAU DAJI

स्तारुण्यंकिमिवहिनरम्यंमृगदृशः यदानुरतिवासनाप्रबोधानांप्रबोधांतरमिमिमन्यतेकेवलंसमुचितविभावोपग्रहविरहान्निर्विषयतयास्फुटीभावं
नप्रतिपद्यतेतदातज्जनितबहुतरांगविकारात्माहेलाहावस्यसंबंधिनीक्रियां प्रसरत्वावेगवाहित्वमित्यर्थः वेगेनहिगच्छन् हलतीत्युच्यतेलोकइति
एवंबोद्धिबोद्धियविश्रामयन्हावसएवप्रसरणेशैत्रैकस्वभावोहेलेति यथा कुरंगाबांगनीति अत्रत्यंतर्गतरतिप्रबोधमात्रमुक्तंनत्वभिलाष
शृंगारइतिमंतव्यं तदेतत्त्राम्हणस्योपनयनमिवभविष्यत्पुरुषार्थसाधनपीठबंधत्वेनयोषितामामनंति ५ लीलाद्योदशस्वाभाविकाः विशि
ष्टविभावलाभरतौस्वविषयत्वेनस्फुटीभूतायांतदुपबृंहणकृतादेहविकाराःलीलाविलासविच्छित्तिविभ्रमविब्बोककिलकिंचितमोट्टायितकुट्टमितल
लितविहृतनामानः एतेचप्राप्तसंभोगत्वेप्राप्तसंभोगत्वेचसंभवंति शोभादयश्चसप्तवक्ष्यमाणाःप्राप्तसंभोगतायामेवलीलादीनलक्षयति
५ वाग्वेषचेष्टितैःप्रियस्यानुकृतिर्लीला प्रियगतानांवाग्वेषचेष्टानांप्रियबहुमानातिशयेनतत्तद्यद्रूपेणाअनियंत्रीनमनुकृतिर्लीलाय
था जंजंकरेसिजंजंचजपसिजहनुमत्तिअत्तिअंसेसि तंतमणुसिक्खिराएदिअहेदिअहेनसंवडई ५ स्थानादीनांवैशिष्ट्यविलासःस्था
नमूर्द्धता आदिशब्दादुपवेशनगमनहस्तभ्रूनेत्रकर्मपरिग्रहः तेषांवैशिष्ट्यंविलासः यथा अत्रांतरेकिमपिवाग्विभवातिवृत्तंवैचित्र्यमुल्ल
सितविभ्रममायताक्ष्याः तद्भूरिसात्विकविकारविशेषरम्यमाचार्यकंविजयिमान्मथमाविरासीत् ५ गर्वाद्ल्पाकल्पन्यासःशोभाकृद्विच्छित्ति
सौभाग्यगर्वादनादरेणकृतोमाल्याच्छादनभूषणविलेपनादेर्यदल्पस्यापिअस्याकल्पस्यन्यासः सौभाग्यमहिम्नाशोभाहेतुर्विच्छित्तिः यथा
सहिपिच्छकण्णऊराजायावाहस्सगव्विरीभमइ मुत्ताहलरइअपसाहणाणमज्झेसवत्ताण ५ इष्टेप्यवज्ञाविब्बोकः सौभाग्यगर्वादि
ष्टेपिवस्तुन्यनादरोविब्बोकःयथा निर्भिद्यदशनच्छदंततोवाचिभर्तुरवधीरणापरा शैलराजदुहितासमीपगामालसापविशिंजयामहे
नुकं ५ गद्ग्भूषणानांव्यत्यासोविभ्रमः सौभाग्यगर्वाद्वचनादीनामन्यथानिवेशोव्यत्यासोविभ्रमः वचनेन्यथावक्तव्येऽन्यथाभाषणं
हस्तेनादातव्येपादेनादानंरसनायाःकंठेन्यासः यथा चकारकाचित्सितचंद्रिकांककांचीकलापंस्तनभारपृष्ठे प्रेयप्रतिप्रेषितचित्तवृत्तिर्नि

तंबबिंबेचबबंधहारं ॥ ५ ॥ स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाषसंकरः किलिकिंचितं ॥ सौभाग्यगर्वस्मितादीनांसंकरः किलिकिं
चितंयथा ॥ रतिक्रीडाद्यूतकभमपिसमासाद्यसिमयंमयालब्धेतस्याःक्वपितनकलकंगार्द्धमधरोकृतभ्रूभंगांसोप्रकटितविलक्षार्द्धरुदि
तस्मितक्रुद्धोद्भ्रांतंपुनरपिविदध्यान्ममयिमुखं ॥ ५ ॥ प्रियकथादौतद्भावभावनोत्थाचेष्टामोट्टायितम् ॥ प्रियस्यकथायांदर्शनेवातद्भावभा
वनंतन्मयत्वंततोयाद्भूताचेष्टालीलादिकासामदनांगपर्यंतांगमोट्टनान्मोट्टायितं ॥ प्रियस्यकथायांदर्शनेवातद्भावभावनंतन्मयत्वंततोयो
द्भूताचेष्टालीलादिकासामदनांगपर्यंतांगमोट्टनान्मोट्टायितं ॥ यथा ॥ स्मरदवथुनिमित्तंगूढमन्वेतुमस्याःसुभगतवकथायांप्रस्तुतायांसखी
भिः ॥ हरतिविनतपृष्ठोदप्रपीनस्तनोपान्ततवलयितबाहुर्जृंभितैःसाङ्गभंगैः ॥ ५ ॥ अधरादिग्रहाद्दुःखेपिहर्षःकुट्टमितं अधरस्तनकेशा
दीनांग्रहणात्प्रियतमेनेतिशेषः दुःखेपिहर्षःकुट्टमितं ॥ ५ ॥ यथा ॥ ईषन्मीलितलोललोचनयुगंव्यावर्त्तितभ्रूलतंसंदष्टाधरवेदनाप्रल
पितंमामेतिमंदाक्षरं ॥ तन्वंग्याःसुरतावसानसमयेदृष्टंमयायन्मुखंस्वेदार्द्रीकृतपांडुगंडपुलकंतत्केनविस्मार्यते ॥ ५ ॥ मसृणांगन्यासोल
लितं ॥ अंगानांहस्तपादभ्रूनेत्राधरादीनांमसृणःसुकुमारोविन्यासोललितं ॥ यथा ॥ सभ्रूभंगंकरकिसलयावर्त्तनैरालपंतीसापश्यंतीललि
तललितंलोचनस्यांचलेन ॥ विन्यस्यंतीचरणकमलेलीलयास्वैरपातैर्निःसंगीतंप्रथममवयसानर्त्तितापंकजाक्षी ॥ कर्त्तव्यवशादायातेएव
हस्तादिकर्मणियद्वैचित्र्यंसविलासः ॥ यत्रतुबाह्यव्यापारयोगएवनकश्चिद्दस्तिनादातव्यबुद्धिरथवसुकुमारकरादिव्यापारणंतल्ललितं ॥
अन्येतुललितविलासइतिपाठंप्रमाणयंतोविलासमेवसातिशयंललितसंज्ञमाहुः ॥ व्याजादेःप्राप्तकालस्याप्यवचनंविहृतं ॥ व्याजोमौग्ध्यादिप्रख्या
पनाशयः ॥ आदिग्रहणान्मौग्ध्यालज्जादिपरिग्रहः ॥ तेनोभाषणावसरेप्यभाषणंविहृतं ॥ यथा ॥ पत्युःशशिचंद्रकलामनेनस्पृशेतिसख्याःप
रिहासपूर्वं ॥ सारंजयित्वाचरणौकृताशीर्माल्येनतांनिर्वचनंजघान ॥ केचिद्बाल्यकौमारयौवनसाधारणविहारविशेषंक्रीडितं ॥ क्रीडितमेवचप्रि
यतमविषयंकेलिंचालंकारावाहुः ॥ यथा ॥ मंदाकिनीसैकतवेदिकाभिःसाकंदुकैःकृत्रिमपुत्रकैश्च ॥ रेमेमुहुर्मध्यगतासखीनांक्रीडारसंनिर्वि

शतीवबाल्ये ॥ व्यायोद्धितुंलोचनतोमुखानिलैरपारयंतंकिलपुष्पजंरजः ॥ पयोधरेरसिकाचिदुन्मनाःप्रियंजघानोन्नतपीवरस्तनी ॥ शोभादयस्त
प्तायत्नजाः ॥ ७ ॥ शोभाकांतिदीप्तिमाधुर्यधैर्यौदार्यप्रागल्भ्यनामानःसप्तालंकाराअयत्नजाः ॥ क्रमेणलक्षयति ॥ ७ ॥ रूपयौवनलावण्यैःपुंभो
गोपबृंहितैर्मदमध्यतीव्रांगच्छायांशोभाकांतिदीप्तिश्च ॥ तान्येवरूपादीनिपुरुषेणोपभुज्यमानानिच्छायांतरमश्नुवंतीतिसाछाया ॥ मंदमध्यती
व्रत्वंक्रमेणसंभोगपरिशीलनादाश्रयतीशोभाकांतिदीप्तिश्च ॥ शोभायथा ॥ करविलसयंधूत्वाविमार्ग्रतिवासमी ॥ क्षिपतिकमनोमालाशेषंप्र
दीपशिखांप्रतिरुणयतिमुहुःपल्लकैर्नवेविहस्यसमाकुलासुरतविरतौरम्यातन्वीमुहुर्मुहुरीक्षितुः ॥ कांतियदा ॥ उत्तिष्ठंत्यारतांतेभरमुरगपतौपा
णिनैकेनकृत्वाधृत्वाचान्येनवासोविगलितकबरीभारमंसंवहंत्याः ॥ भूयस्तत्कालकांतिद्विगुणितसुरतप्रीतिनाशौरिणावःशय्यामालिंग्यनीतंवपुर
लसलसद्बाहुलक्ष्म्याःपुनातु ॥ दीप्तिर्यथा ॥ आलोलामलकावलींविलुलितांबिभ्रच्चलत्कुंडलंकिंचिन्मृष्टविशेषकंतनुतरैःस्वेदांबुनःशीकरैः ॥ तन्व्या
यत्सुरतांतकांतनयनंवक्त्रंरतिव्यत्ययेतत्त्वांपातुचिरायकिंहरिहरस्कंदादिभिर्देवतैः ॥ ५ ॥ चेष्टामसृणत्वंमाधुर्यंललितेषुक्रीडादिषुयथामसृ
णत्वंचेष्टायास्तथादीनेष्वपिक्रोधादिषुयत्तन्माधुर्यं ॥ यथा ॥ कृतोदूरोदेवस्मितमधुरमाभ्यद्भुमविधिःशिरस्याज्ञान्यस्ताप्रतिवचनमन्यानतिम
ति ॥ नदृष्टेःशैथिल्यंमिलनइतिचेतोदहतिमांनिगूढांतःकोपाकठिनहृदयेसंवृतिरियं ॥ ५ ॥ अचापलाविकत्थनत्वंधैर्यम् ॥ चापलानुपहतत्व
मात्मगुणानाख्यानंनचधैर्यम् ॥ यथा ॥ ज्वलतुगगनेरात्रौरात्रावखंडकलःशशीदहतुमदनःकिंवामृत्योःपरेणविधास्यति ॥ ममतुदयितःश्ला
घ्यस्तातोजननन्यमलान्वया ॥ कुलममलिनंनत्वेवायंजनोनचजीवितम् ॥ ५ ॥ प्रश्रयऔदार्यम् ॥ अमर्षेर्ष्याक्रोधाद्यवस्थास्वपिप्रश्रयऔद्यवस्थास्व
पिप्रश्रयऔदार्यं ॥ यथा ॥ भ्रूभंगेसहसोद्गतेपिवदनंनीतंपरांनम्रतामीषन्मांप्रतिभेदकारिहसितंनोक्तंवचोनिष्ठुरम् ॥ अंतर्बाष्पजडीकृतंप्रभुतया
चक्षुर्नविस्फारितंक्रोधश्चप्रकटीकृतोदयितयामुक्तश्चनप्रश्रयः ॥ प्रयोगेनिःसाध्वसत्वंप्रागल्भ्यं प्रयोगःकामकलादौवानुपर्विकइत्यर्थः ॥ य
दाह ॥ अन्यदाभूषणंपुंसःशमालज्जावयोषितः ॥ पराक्रमःपरिभवेवैयात्यंसुरतेष्विव ॥ मनःक्षोभपूर्वकोऽंगमादःसाध्वसंतदभावःप्रागल्भ्यंयथा

शाभ्युल्लंघितवतीष्टकारणमिहति ॥ अत्रत्रोगभावोतिदीप्तयौवनान्धरूपादिगनाएवंचिंतापाश्चावेगचापलामर्षश्रामानांत्वभावत्वमाधुर्याद्याधर्मानचित
वृत्तिस्वभावादृतिंवेनेषुभावशंकाचकारः ॥ शाक्याचार्यराहुलादयस्तुमौग्ध्यमदभाविकत्वपरितपनादीनप्यलंकारानाचक्षतेतेःस्माभिर्नेरलम
नानुसारिभिरुपेक्षिता ॥ ५१ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायामलंकारचूडामणिसंज्ञायांस्वोपज्ञकाव्यानुशासनवृत्तौ [illegible]

अथप्रबंधात्मककाव्यभेदानाह ॥ काव्यंप्रेक्ष्यंश्रव्यंच ॥ नानृषिःकविरितिकवयःवर्णयंतिवर्णनादर्शनाद्वर्णनाच्चकविस्तस्यकर्मकाव्यं ॥ एवंदर्शनेसत्यपि
वर्णनायाअभावादितिहासादीनांनकाव्यत्वमितिनलक्षणंनवश्यते ॥ तथाचाहभट्टतौतः ॥ नानृषिःकविरित्युक्तमृषिश्चकिलदर्शनात् ॥ विचि
त्रभावधर्मांशतत्त्वप्रख्याचदर्शनं ॥ सतत्त्वदर्शनादेवशास्त्रेषुपठितःकविः ॥ दर्शनाद्वर्णनाच्चाथरूढालोकेकविश्रुतिः ॥ तथाहिदर्शनेस्वच्छेन
नित्येप्याद्यकवेर्मुनेः ॥ नोदिताकविताऽलोकेयावज्जातानवर्णना ॥ इति ॥ प्रेक्ष्यमभिनेयं ॥ श्रव्यमनभिनेयं प्रेक्ष्यंविभजते ॥ ५२ ॥ प्रेक्ष्यंपाठ्यंगेयंच ॥ तत्रपाठ्यमभिन
त्ति ॥ ५३ ॥ पाठ्यंनाटकप्रकरणनाटिकासमवकारेहामृगडिमव्यायोगोत्सृष्टिकांकप्रहसनभाणवीथीसट्टकादि ॥ तथाचनाटकादीनिपाठ्यनानिवा
क्यार्थाभिनयस्वभावानिभरतमुनिनोपदर्शितानिसद्वृत्तंकेचित् ॥ [illegible] ॥ प्रख्यातवस्तुविषयंप्रख्यातोदात्तनायकंचैव ॥ राजर्षिवंश्यचरितंतथैवदिव्या
श्रयोपेतं ॥ नानाविभूतिभिर्युतमृद्धिविलासादिभिर्गुणैश्चापि ॥ अंकप्रवेशकाढ्यंभवतिहितन्नाटकंनाम ॥ यत्रकविरात्मशक्त्यावस्तुशरीरंचनायकंचैव
औत्पत्तिकंप्रकुरुतेप्रकरणमितितद्बुधैर्ज्ञेयं ॥ यदनार्षमथाहार्यंकाव्यंप्रकरोत्यभूतगुणयुक्तं ॥ उत्पन्नवस्तुबीजंप्रकरणमितितदपिविज्ञेयं ॥ यन्नाटकेम
योक्तंवस्तुशरीरंचवृत्तिभेदाश्च ॥ तत्प्रकरणेपियोज्यंसलक्षणंसर्वसंधिषुतु ॥ विप्रवणिक्सचिवानांपुरोहितामात्यसार्थवाहानाम् ॥ चरितंयन्नैक
विधंतज्ज्ञेयंप्रकरणंनाम ॥ नोदात्तनायककृतंनदिव्यचरितंनराजसंभोगः ॥ बाह्यजनसंप्रयुक्तंतज्ज्ञेयंप्रकरणंनाम ॥ दासविटश्रेष्ठियुतंवेशस्त्र्युप
चारकारणोपेतं ॥ मंदकुलस्त्रीचरितंकाव्यंकार्यंप्रकरणेतु ॥ प्रकरणनाटकभेदादुत्पाद्यंवस्तुनायकंनृपतिं ॥ अंतःपुरसंगीतककन्यामधिकृ
त्यकर्तव्या ॥ स्त्रीप्रायाचतुरंकाललिताभिनयात्मिकासुविहितांगी ॥ बहुनृत्तगीतपाठ्यारतिसंभोगात्मिकाचैव ॥ राजोपचारयुक्ताप्रसादनक्रोधदंभसंयु

क्ता ॥ नायकदेवीदूतीसपरिजनानाटिकाज्ञेया ॥ समवकारस्तु ॥ देवासुरबीजकृतःप्रख्यातोदात्तनायकश्चैव ॥ त्र्यंकस्तथात्रिकपटस्त्रिविद्रवःस्या
त्रिशृंगारः ॥ द्वादशनायकबहुलोह्यष्टादशनालिकाप्रमाणश्चेति ॥ दिव्यपुरुषाश्रयंगतोदिव्यस्त्रीकारणोपगतयुद्धः ॥ सुविहितवस्तुनिबद्धोविप्रत्य
यकारणश्चैव ॥ उद्धतपुरुषप्रायःस्त्रीरोषग्रथितकाव्यबंधश्च ॥ संक्षोभविद्रवकृतःसंस्फेटकृतस्तथाचैव ॥ स्त्रीभेदनापहरणावमर्दनप्राप्तवस्तु
शृंगारः ॥ ईहामृगस्तुकार्यःसुसमाहितकाव्यबंधश्च ॥ यच्चाव्यायोगेकार्यायेपुरुषावृत्तयोरसाश्चैव ॥ ईहामृगेपितस्याःकेवलमत्रस्त्रियायोगः ॥ प्रख्या
तवस्तुविषयःप्रख्यातोदात्तनायकश्चैव ॥ षड्रसलक्षणयुक्तश्चतुरंकोवैडिमःकार्यः ॥ शृंगारहास्यवर्जैःशेषैरन्यैरसैःसमायुक्तः ॥ दीप्तरसकाव्ययोनि
र्नानाभावोपसंपन्नः ॥ निर्घातोल्कापातैरुपरागेणेंदुसूर्ययोर्युक्तः ॥ युद्धनियुद्धाधर्षणसंस्फेटकृतश्चविज्ञेयः ॥ मायेंद्रजालबहुलोबहुपुस्तोत्थान
योगयुक्तश्च ॥ देवभुजगेंद्रराक्षसयक्षपिशाचावकीर्णश्च ॥ षोडशनायकबहुलःसात्वत्यारभटिवृत्तिसंपन्नः ॥ कार्योडिमःप्रयत्नान्नानाश्रयभावसंयुक्तः
व्यायोगस्तुविधिज्ञैःकार्यःप्रख्यातनायकशरीरः ॥ अल्पस्त्रीजनयुक्तस्त्वेकाहकृतस्तथाचैव ॥ बहवश्चतत्रपुरुषाव्यायच्छंतेयथासमवकारे ॥ नतुतत्प्रमा
णंयुक्तःकार्यस्त्वेकांकएवायं ॥ नचदिव्यनायककृतःकार्योराजर्षिनायकनिबद्धः ॥ युद्धनियुद्धाधर्षणसंघर्षकृतश्चकर्तव्यः ॥ एवंविधस्तुकार्योव्यायो
गोदीप्तकाव्यरसयोनिः ॥ वक्ष्याम्यतःपरमहंलक्षणमुत्सृष्टिकांकस्य ॥ प्रख्यातवस्तुविषयस्त्वप्रख्यातःकदाचिदेवस्यात् ॥ दिव्यपुरुषैर्वियुक्तःशेषैर
न्यैर्भवेत्पुंभिः ॥ करुणरसप्रायकृतोनिवृत्तयुद्धोद्धतप्रहारश्च ॥ स्त्रीपरिदेवितबहुलोनिर्वेदितभाषितश्चैव ॥ नानाव्याकुलचेष्टःसात्वत्यारभटिकै
शिकीहीनः ॥ कार्यःकाव्यविधिज्ञैःसततंह्युत्सृष्टिकांकस्तु ॥ प्रहसनमपिविज्ञेयंद्विविधंशुद्धंतथाचसंकीर्णं ॥ वक्ष्यामितयोर्युक्त्यापृथक्पृथग्लक्षणविशेषं
भगवत्तापसविप्रैरन्यैरपिहासवादसंबद्धं ॥ कापुरुषसंप्रयुक्तंपरिहासाभाषणप्रायं ॥ अविकृतभाषाचारंविशेषभावोपपन्नचरितमिदं ॥ नियतगतिवस्तु
विषयंशुद्धंज्ञेयंप्रहसनंतु ॥ वेश्याचेटनपुंसकविटधूर्ताबंधकीचयत्रस्युः ॥ अनिभृतवेषपरिच्छदचेष्टितकरणंचसंकीर्णं ॥ आत्मानुभूतशंसीपरसंश्रय
वर्णनाप्रयुक्तश्चविविधाश्रयोहिभाणोविज्ञेयस्त्वेकहार्यश्च ॥ परवचनमात्मसंस्थैःप्रतिवचनैरुत्तरोत्तरग्रथितैः ॥ आकाशपुरुषकथितैरंगविकारैरभिनयेत्

९१ धूर्तविटसंप्रयोज्यो नानावस्थांतरात्मकश्चैव ॥ एकांकोबहुचेष्टः सततंकार्योबुधैर्भाणः ॥ सर्वरसलक्षणाढ्यायुक्तांगैर्लास्यांगैस्तथा च यदशभिः ॥ वीथीस्या
देकांकात्तथैकहार्या द्विहार्या वा विष्कंभकप्रवेशकरहिता यस्य कभाषया भवति ॥ अप्राकृतसंस्कृतया ससट्टकोनाटिकाप्रतिमट्टेति ॥ आदिशब्दाल्लो
ल्लाहलादिलक्षितास्तोटकादयोग्राह्याः ॥ गेयंविभजंते गेयं डोंबिकाभाणप्रस्थानशिंगकभाणिकाप्रेरणरामाक्रीडहल्लीसकरासकगोष्ठीश्रीग
दितरागकाव्यादि ॥ पदार्थाभिनयस्वभावानि डोंबिकादीनि गेयानि रूपकाणि चिरंतनैरुक्तानि ॥ तद्यथा ॥ छलानुरागगर्भाभिरुक्तिभिर्यत्र भूपतेः ॥ आव
र्ज्यते मनः सा तु मसृणा डोंबिका मता ॥ सिंहस्य कराटीनां वर्णनं यत्र यत्नतः ॥ नर्तकीभिर्न भाणः स्याद्दुद्धतांगप्रवर्तितः ॥ गजादीनां गतिं तुल्यां कृत्वा प्रस्थानं
तथा ॥ अजमविहंगमसृणेन तत्प्रस्थानं प्रवर्तते ॥ सख्याः समक्षं पत्युर्यदुद्धतं वचनमुच्यते ॥ मसृणं च क्वचिद्वृत्तं चरितं शिंगकं तु तत् ॥ बालक्रीडानियु
द्धादितथाम्रकरसिंहजाः ॥ धवलादिकृता क्रीडा यत्र सा भाणिका मता ॥ हास्यप्रायं प्रेरणं तु स्यात्प्रहेलिकयान्वितं ॥ ऋतुवर्णनसंयुक्तं रामाक्रीडं तु भाष्य
ते ॥ मंडलेन तु यन्नृत्तं हल्लीसकमिति स्मृतं ॥ एकस्तत्र तु नेता स्याद्गोपस्त्रीणां यथा हरिः ॥ अनेकनर्तकीयोज्यं चित्रताललयान्वितं ॥ आचतुःषष्टियुगल
द्रासकं मसृणोद्धतं ॥ गोष्ठी यत्र विहरतश्चेष्टितमिहं कैटभद्विषः किंचित् ॥ रिष्टासुरप्रमथनप्राभृतितद्विधं तिगोष्ठीति ॥ यस्मिन्कुलांगनापत्युः सख्याग्रव
र्णयेद्गुणान् ॥ उपालंभं च कुरुते गेयं श्रीगादितं तु तत् ॥ रूपांतरप्रयोगेण रागैश्चापि विचित्रितं ॥ नानारसं कनिर्वाह्यकथं काव्यमिति स्मृतमिति ॥ आदिग्रहणा
त्कुम्याउलितादिपद्यादिपरिग्रहः ॥ प्रपंचस्तु ब्रम्हभरतकोहलादिशास्त्रेभ्योऽवगंतव्यः ॥ श्रव्यमुक्ता श्रव्यमाह ॥ श्रव्यं महाकाव्यमाख्यायिका कथा चंपूरनिबद्धं
च ॥ एतानि क्रमेण लक्षयति ॥ ७ ॥ पद्यं प्रायः संस्कृतप्राकृतापभ्रंशग्राम्यभाषानिबद्धभिन्नान्त्यवृत्तसर्गाश्वाससंध्यवस्कंधकबंधं सत्संधिशब्दार्थवैचित्र्योपेतं महाका
व्यं ॥ ७ ॥ छंदोविशेषरचितं प्रायः संस्कृतादिभाषानिबद्धैर्भिन्नान्त्यवृत्तैर्यथासंख्यं सर्गादिभिर्निर्मितं ॥ मुखप्रतिमुखगर्भविमर्शनिर्वहणसंधिसंगतं
शब्दार्थवैचित्र्योपेतं महाकाव्यमनुखादयः संधयो भरतोक्ता द्रष्टव्याः ॥ बीजसमुत्पत्तिर्नानार्थरससंभवा काव्यशरीरानुगता तन्मुखं परिकीर्तितं ॥ बीजस्योद्घाट ९१
नं यत्र दृष्टनष्टमिव क्वचित् ॥ मुखन्यस्तस्य सर्वत्र तद्वै प्रतिमुखं स्मृतं ॥ उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा ॥ पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः ॥ गर्भनिर्भिन्नबी

जार्थाविलोभनकृतेषिवा ॥ क्रोधव्यसनजो वापि स विमर्श इति कीर्तितः ॥ समानयनमर्थानां मुखाद्यानां सबीजिनां ॥ नानाभावोत्तराणां यद्भवेन्निर्वहणं तु तदिति ॥ शब्द
वैचित्र्यं यथा ॥ असंक्षिप्तग्रंथत्वं ॥ अविषमबंधत्वं ॥ अनतिविस्तीर्णपरस्परसंबद्धसंध्यादित्वं आशीर्नमस्कारवस्तुनिर्देशोपक्रमत्वं ॥ वक्तव्यार्थप्रतिज्ञानं तत्प्रयोजनो
पन्यासं कविप्रशंसा दुर्जनकुत्सनं स्वलघुत्वदादिवाक्यत्वं दुष्करचित्रादिसर्गत्वं ॥ स्वाभिप्रायस्वनामेष्टनाममंगलांकितसमाप्तित्वमिति ॥ अर्थवैचित्र्यं यथा ॥ चतुर्वर्ग
फलोपायत्वं ॥ चतुरोदात्तनायकत्वं ॥ रसभावनिरंतरत्वम् ॥ ७ ॥ विधिनिषेधव्युत्पादकत्वं ॥ सुसूत्रसंविधानकत्वं ॥ नगराश्रमशैलसैन्यावासार्णवादिवर्णनं ॥ ऋतु
रात्रिंदिवार्कास्तमयचंद्रोदयादिवर्णनं ॥ नायकनायिकाकुमारवाहनादिवर्णनं ॥ मंत्रदूतप्रयाणसङ्ग्रामाभ्युदयादिवर्णनं ॥ वनविहारजलक्रीडामधुपानमानापगम
रतोत्सवादिवर्णनमिति ॥ उभयवैचित्र्यं यथा ॥ रसानुरूपसंदर्भत्वं अर्थानुरूपसंदर्भत्वं ॥ अर्थानुरूपछंदस्त्वं ॥ समस्तलोकरंजकत्वं ॥ सदलंकारवाक्यत्वं ॥
देशकालपात्रचेष्टाकथांतरानुषंजनं मार्गद्वयानुवर्तनं चेति ॥ तत्र संस्कृतभाषानिबद्धसर्गबंधं हयग्रीववधादि ॥ प्राकृतभाषानिबद्धाश्वासकबंधं सेतुबंधादि
अपभ्रंशभाषानिबद्धसंधिबंधमब्धिमथनादि ॥ ग्राम्यापभ्रंशभाषानिबद्धावस्कंधकबंधं भीमकाव्यादि ॥ प्राकृतग्रहणात्संस्कृतभाषयाप्याश्वासकबंधो हरिप्र
बोधनादौ न दुष्यंति ॥ प्रायोग्रहणाद्रावणविजयहरिविजयसेतुबंधादितः समाप्तिपर्यंतमेकमेव छंदो भवतीति ॥ गलितकानि तु तत्रैकैरपि विदग्धमानि
भिः क्षिप्तानीति तद्विदो भाषंते ॥ ७ ॥ नायकाख्यातस्ववृत्ता भाव्यर्थशंसिवक्त्रादिः सोच्छ्वासा संस्कृता गद्ययुक्ताख्यायिका ॥ धीरप्रशांतस्य गांभीर्यगुणोत्कर्षस्य
यत्स्वगुणोपवर्णनं न संभवतीत्यर्थाद्ध्वां धीरोद्धतादिना नायकेन स्वकीयं वृत्तं सदाचारूपं चेष्टितं कन्याहरणसङ्ग्रामसमागमाभ्युदयादि वर्णितं यत्राख्यायते
अनागतार्थशंसीनि वक्त्रापरवक्त्रादीनि यत्र वध्यंते यत्र वांतरप्रकरणसमाप्तावुच्छ्वासा वध्यंते सा संस्कृतभाषानिबद्धा अपादः पदसंतानो गद्यं तेन युक्ता
युक्तग्रहणादंतरांतराप्रविरलपद्यनिबंधेप्यदुष्टा आख्यायिका ॥ यथा हर्षचरितादिः ॥ धीरशांतनायका गद्येन पद्येन वा सर्वभाषा कथा ॥ आख्यायिकावन्नस्वचरि
तव्यावर्णकोऽपि तु धीरशान्तो नायकस्तस्य तु वृत्तमन्येन कविना वा यत्र वर्ण्यते ॥ या च काचित् गद्यमयी यथा कादंबरी काचित्पद्यमयी यथा लीलावती ॥ या च सर्व
भाषा काचित्संस्कृतेन काचित्प्राकृतेन काचिन्मागध्या काचिच्छूरसेन्या काचित्पैशाच्या काचिदपभ्रंशेन वध्यते सा कथा ॥ प्रबंधमध्ये परप्रबोधनार्थं नलाद्युपाख्या

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नर्भवीपाख्यानमभिनयन्पठन्गायत्यादिकोग्रंथिकःकथयतितद्गोविंदवदाख्यानम्॥ तिरश्चामतिरश्चांवाचेष्टाभिर्यत्रकार्यमकार्यंवानिश्चीयतेतत्पंचतंत्रादिवत्
रा
धूर्तचरितकुट्टनीमतमदारमार्जारादिकवच्चनिदर्शनं॥ प्रधानमधिकृत्ययत्रद्वयोर्विवादःसार्द्धप्राकृतरचिताचेटकादिवत्प्रवल्हिका॥ प्रेतमहाराष्ट्रभाषयाक्षुद्रक
थागोरोचनानंगवत्यादिवन्मथल्लिका॥ यस्यांपुरोहितामात्यतापसादीनांप्रारब्धानिर्वाहेउपहासः~~कथयतितद्गोविंदवदाख्यानम् तिरश्चामतिरश्चांवाचे
ष्टाभिर्यत्रकार्यमकार्यंवानिश्चीयतेतत्पंचतंत्रादिवत् धूर्तविटकुट्टनीमतमदारमार्जारादिकवच्चनिदर्शनं प्रधानमधिकृत्ययत्रद्वयोर्विवादःसार्द्धप्राकृत
रचिताचेटकादि~~सापिमंथल्लिका यस्यांपूर्वंवस्तुनलक्ष्यतेपश्चात्तुप्रकाश्यतेसामत्स्यहसितादिवन्मणिकुल्या॥ एकंधर्मादिपुरुषार्थमुद्दिश्यप्रकारवैचित्र्येणानंतवर्ण
नप्रधानशूद्रकादिवत्परिकथा॥ मध्यादुपांततोवाग्रंथांतरप्रसिद्धमितिवृत्तंयस्यांवर्ण्यतेसेंदुमत्यादिवत्खंडकथा॥ समस्तफलांतेतिवृत्तवर्णनासमरादित्यादि
वत्सकलकथा॥ एकतरचरिताश्रयेणप्रसिद्धकथांतरोपनिबंधउपकथा॥ लंभांकिताद्भुतार्थानरवाहनदत्तादिचरितवद्बृहत्कथा॥ एतेचकथाप्रभेदाएवेतिन
पृथग्लक्षिताः॥९॥ गद्यपद्यमयीसांकासोच्छ्वासाचंपूः॥ सं— साभ्यांगद्यपद्याभ्यांरचिताअभिप्रायेणान्यच्चनामानिस्वनाम्नापरनाम्नावाकविः॥ करोतीतियुक्ताउच्छ्वास
निबद्धावंसः॥ यथावासवदत्तादमयंतीवा॥९॥ अनिबद्धंमुक्तकादि॥ मुक्तकसंदानितकविशेषककलापककुलकपर्याकोशप्रभृत्यनिबद्धम्॥ एषांलक्षणमाह॥ ए
कद्वित्रिचतुश्छंदोभिर्मुक्तकसंदानितकविशेषककलापकानि॥ एकेनछंदसावाक्यार्थसमाप्तिर्मुक्तकं॥ यथाऽमरुकस्यशृंगारशतरसस्यंदिनोमुक्तकाः॥ द्वाभ्यांसं
दानितकं॥ त्रिभिर्विशेषकंचतुर्भिःकलापकं॥ एतानिचविशेषानभिधानात्सर्वभाषाभिर्भवंति॥९॥ पंचादिभिश्चतुर्दशांतैःकुलकं॥९॥ छंदोभिरितिवर्तते॥९॥ मुक्त
कानामेकप्रघट्टकोपनिबंधःपर्या॥ अवांतरवाक्यसमाप्तावपिवसंतादिवर्णनीयोद्देशेनमुक्तकानामुपनिबंधःपर्या॥ साकोशोप्रचुरंदृश्यते॥९॥ स्वपरकृतसू
क्तिसमुच्चयःकोशः॥ यथासप्तशतकादिः॥ एकप्रघट्टकंएककविकृतःसूक्तवृंदावनमेघदूतादिःसंघातः॥ विप्रकीर्णवनोंनानामेकत्रसंधानंयदुवंशादिरोपवंशादि
वत्संहिता॥ एवमनंतोऽनिबद्धगणआदिग्रहणेनगृह्यतेति॥ इहचगंभीरत्वंग्राह्यार्थवैचित्र्ययोगश्चमहाकाव्यवदाख्यायिकाकथाचंप्वपिद्रष्टव्यः॥९॥ इत्याचार्य
हेमचंद्रविरचितायामलंकारचूडामणिसंज्ञस्वोपज्ञकाव्यानुशासनवृत्तावष्टमोध्यायःसमाप्तः॥८॥ शुभंभवतु॥८॥ ॥ग्रंथाग्र ३०११॥ ॥

Dr. BHAU DAJI